[illegible] २२२

[illegible] ११४

[illegible] ५२

[illegible] २२२

स [illegible] १९८५

९८

श्रीगोविंदपदांभोजे... [illegible]

भवानं ॥ ॥श्री॥ सरस्वत्यै नमः॥ ॥नमस्कृत्य गुरून्सर्वान् निगूढं मणिदीधितौ। श्रीभवानंदसिद्धांतवागीशेन प्रका-
श्यते॥१॥ ॥ॐ नम इति॥ परमात्मने सर्वोत्कृष्टात्मने नमः॥ उत्कर्षः। जगतः सृष्टिस्थितिप्रलयकर्तृत्वं॥ एकरू-
पस्य कथं सृष्ट्यादिविचित्रकार्यकारित्वं। तत्र हेतुमाह॥ ॐमिति॥ ब्रह्मविष्णुशिवात्मकायेत्यर्थः॥ ॐघटकैरकारोका-
रमकारैर्ब्रह्मादीनां प्रतिपादनात्। तस्य च नमस्कार्यताप्रयोजकं रूपांतरमपि दर्शयति। सर्वेति। सर्वभूतानि सर्वप्रा-
णिनः विष्टभ्यांतर्यामितया स्वस्वकार्ये नियोज्य परितिष्ठते। अंतर्यामिनो भगवतः प्रेरणयैव सर्वप्राणिनां स्वस्व-
कार्ये प्रवृत्तेरिति भावः। विष्टंभश्च धारणात्मकः संयोगविशेषः। भूतपदं मूर्तपरं। अत एव विश्वव्यापी विश्वशक्ति-
रपि नाकीत्यत्र विश्वशब्दोपादानमूर्त्तवचन इत्यवधार्यः। प्रयत्नवदीश्वरसंयोगस्यैव ब्रह्मांडादिपतनप्रतिबंधकत्वा-
त्। अत एव द्यावापृथिव्यौ विष्टे तिष्ठत इति श्रुतिरपि भगवत्संयोगस्य धारकत्वमाहेत्यपि वदंति। यत्तु आकाशेन मू-
रादतिरिच्यत इति मतानुसारेणेदमिति। तन्न॥ ईश्वरस्यैवाकाशतया भूतपदवाच्यत्वेन तथैव तत्प्रतियोगिकसंयो-

तेजोमनो गुरुत्वाभावो [illegible]
[illegible]
राम [illegible]

१

गामावाता॥ अखंडौ नित्यौ आनंदबोधौ यस्य तस्मै इत्यर्थः॥ नित्यं विज्ञानमानंदं ब्रह्मेति श्रुतिः॥ ब्रह्मस्वरूपावधारणा
परा आनंदविशिष्टस्य नित्यत्वं प्रतिपादयंतीति विशेषणाभ्यामानंदस्यापि नित्यत्वं प्रतिपादयति। तथा च श्रुतिबला
त्सिद्धे नित्यसुखे सुखत्वावांतरजातिरेव प्रमाणजन्यतावच्छेदकत्वेन कल्प्यत इत्याशयः॥ अखंडं दुःखासंभिन्नं॥ आ
नंदाय स्मादेवंभूतो परमात्मकबोधो यस्येति वार्थः॥ यस्येति षष्ठ्यर्थो विषयता। पूर्णापा। अप्रतिहतच्छाय॥ ननु सं
संगतिप्रदर्शनानुमाननिरूपणा प्रतिज्ञेया॥ प्रयोजनाभाव॥ संगताभिधानस्यैवोन्मत्तप्रलपितत्वादिशंकानि
रासप्रयोजनवत्वादित आह॥ पूर्वापरेति। संगतिप्रदर्शनस्य फलमेकवाक्यता प्रतिपत्तिः। अनुमाननिरूपणा प्रति
पत ज्ञायाः फलं शिष्यावधानमित्यर्थः॥ प्रयोजनवत्त्वावगत्यपूर्वग्रंथे प्रवृत्तानां तदेकवाक्यताज्ञानेनैवोत्तरग्रंथेऽपि
तत्प्रयोजनवत्ताज्ञानेन प्रवृत्तिसंभवादिति भावः॥ तत्र च अर्थैक्यादेकं वाक्यं साकांक्षं चेद्विभागे स्यादिति
जैमिनिसूत्रं। तत्र अर्थैक्यादित्येतावत्कृते भग्नो वा विभजनव्रषणावो विभजनव इत्यनयोर्विभागरूपार्थैक्यादिति

व्याप्तेः। अतः साकांक्षं चेति।। विभागे विच्छिद्यपाठे श्रोतुर्यदि परस्परार्थान्वयविषयिण्याकांक्षा भवति। यथा घटमानय
इत्यत्र घटमित्युक्ते। आयेनेत्युक्ते आनयपदश्रवणेत्याकांक्षा। एवमानयेत्येतावदुक्ते घटं पटं वेति श्रोतुराकांक्षा।। भ
गवान्विभजति त्वस्य विच्छेदे नैवमाकांक्षेति न ह्युदासस्य तावन्मात्रे च स्योनं ते सदनं कृणोमि घृतस्य धारया सु
शेवं कल्पयामि। तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः इत्यत्र कल्पयामीत्यंतः सदनार्थक
एको मंत्रः। तस्मिन्नित्यादिपरः सादनार्थकः। एतयोश्च विभागे साकांक्षत्वमस्ति कल्पयामीत्यंतस्य विच्छेदे
तस्मिन्कस्मिन्नित्याकांक्षासंभवात्। अतोऽर्थैकत्वादिति। तत्र सदनसादनयोरर्थयोर्भेदादिति भावः। अर्थैकत्वं च
न वाक्यार्थैकत्वमिति कारणवाक्यार्थानां भेदात्। किंतु तात्पर्यविषयैक्यं अभिहितं च प्रमाणतत्त्वविवेचन
मेव चतुर्ग्रंथानां तात्पर्यविषयः। कारणकथनानंतरं कार्यस्याकथने किमस्य कार्यमित्याकांक्षा चेति
न च विभिन्नतात्पर्यकेऽपि प्रसंगादिसंगतिसत्त्वात्तत्र संगतिरीदृशैकवाक्यताव्याप्तेति कथं तदपेकवाक्यता

प्रतिपत्तिरिति वाच्यं। एकवाक्यतापन्नयोरेव संगतिव्यवहारेण संगतिलक्षणोप्येकवाक्यतायामनुप्रवेशान्न विभि
न्नतात्पर्यके संगत्यभावादिति। अकारान्तप्रत्यक्षपदस्य मूले ऽसत्वात्प्रत्यक्षेति पाठनिर्देशो ऽनुचित इत्याशयेनाह।
प्रत्यक्षाविति। प्रत्यक्षप्रमित्यनन्तरं अनुमितिनिरूपणे प्रत्यक्षप्रमाणानन्तरं चानुमाननिरूपणे संगतेराका
ङ्क्षितत्वादुभयत्रैव तत्स्वदर्शनत्वं परत्वं मूलस्याह। अत्रोपजीव्योपजीवकभावइति।। अत्र प्रत्यक्षानुमानयोः अन
एव फलयोरेवादौ निरूपणात्। फलत इति। प्रथममनुपन्यस्ते। केचित्तु फलं स्वरूपयोः फलयोश्च कार्यकारणभा
वो ऽपि स्वरूपयोश्च संगतिः। जिज्ञासोपयोगित्वादित्याहुः। उपजीवकत्वं संगतिः सा च अनन्तराभिधानव्याप्या अ
न एवोपजीवकत्वादनन्तरं निरूप्यत इत्युक्तमिति प्राचां मतमनुसृत्याह। प्रत्यक्षफलस्येति। अनुमित्य
नुव्यवसायादेरित्यादिना ऽनुमित्यपेक्षणीया भानेज्ञानलक्षणासंनिकर्षसाध्यवानिति तापर्यावच्छेदकप्रकारकं विशि
ष्टवैशिष्ट्यप्रत्यक्षपरिग्रहः। न सर्वत्रेति। अयं घट इति प्रत्यक्षे व्यभिचारादित्यर्थः। तथानुमित्युपजीविकानुप

ज्ञातींद्रियमेवप्रत्यक्षास्त्वि यथा परमाणुराकाशसंयोगी गुरुत्वादित्यादेः तत्र व्याप्त्यादिज्ञानस्यापेक्ष्यानुमितिरूपत्वात् तज्ज्ञ
न्यानुमितौ न प्रत्यक्षोपजीवकत्वमत आह। अनुमितत्वस्येति अत्रापि पतनादिप्रत्यक्षस्य गुरुत्वाद्यनुमितिद्वारा
उपजीव्यत्वादित्याह। परंपरयावेति ननुयत्र किं विप्रत्यक्षज्ञाननिष्ठमुपजीवकत्वमपि संगतिरेव। तथा चाः
विनिगमकं इत्यत आह। प्रस्फुटत्वेति। अनंतराभिधानप्रयोजकतया मुनिना आह तद् इत्यर्थः॥ अयं त्वनुमि
तित्वरूपअमितिविभाजकोपाध्यवच्छिन्ननिष्ठउपजीवकतोत्कर्षः। उत्कृष्टोपजीवकता परंपरोपजीवकत्वस्यो
पिसंगतित्वे प्रत्यक्षफलत्वावच्छेदेनापि तदस्तीत्याशंकते। पद्यपीति॥ ॥अदृष्टजननीच्छा दृष्टप्रयोजिका का
र्यमात्रं प्रत्यक्षदृष्टं हेतु अदृष्टं च यागादिप्रवृत्त्यधीनं। प्रवृत्तिश्चेष्टसाधनताधीसाध्या यागादाविष्टसाधनता
ज्ञानं च वेदात् तत्र शक्तिग्रहः कारणांतरम् इदं पदं अत्र शक्तं वृत्त्यंतरं विना दृष्टो तत्र प्रयुज्यमानत्वात् इत्यनुमि
तिरूपमिति भवति च शक्त्यनुमितेः प्रत्यक्षफलप्रयोजकत्वं समयः शक्तिः शक्तिग्रहोपजीव्याऽव्यवधानेनोपजी

यामनुमितिं दर्शयति। मत्कर्तृकेति। पाको मत्कृतिसाध्यः मत्कृतिं विनाऽसत्वे सति मदिष्टसाधनत्वात् मत्वा दित्ये
वंरूपेत्यर्थः। आदिना मदिष्टसाधनत्वादिसंग्रहः। नन्वनुमितित्वरूपप्रमितिविभाजकोपाध्यवच्छेदेन प्रत्य।
क्षोपजीवकता। न ह्यप्रत्यक्षप्रमितित्वावच्छेदेनानुमित्युपजीवकत्वं ईश्वरप्रत्यक्षेऽभावादत आह। ईश्वरप्रत्य
क्षत्वेति। तथा च फलयोर्निरूपणे फलतावच्छेदेनोपजीवकत्वमेव पुरस्कर्तुमुचितं। तच्च प्रकृतेऽस्त्येवेत्यर्थ
ः। न च निरूप्यतावच्छेदकावच्छेदेनोपजीवकत्वमेव पुरस्कर्तुमुचितं। निरूप्यतावच्छेदकं च प्रत्यक्षत्वमीश्वरप्र
त्यक्षसाधारणमिति वाच्यं। इंद्रियार्थसंनिकर्षोत्पन्नमित्यादिना निरूपितप्रत्यक्षत्वस्य ईश्वरप्रत्यक्षावृत्तित्वा
दिति दृष्टद्वारकं दृष्टमात्रद्वारकं अदृष्टद्वारकमिति यावत्। नेत्याह दृष्टद्वारकस्यापि दृष्टस्य दृष्टत्वादिद्वारकत्वेऽपि न क्ष
तिः। इह अनुमितौ तथात्वे उपजीवकत्वे इतरस्मात् दृष्टद्वारकोपजीवकत्वस्य विगम्यत्वात्। विनिगमनाया नि
ऽभाविषयत्वात्। एकतरपक्षपातिनी हि युक्तिर्विनिगमना। अदृष्टद्वारकोपजीवकत्वं चोभयसाधारणत्वान्नैक

भाव०
४

नरमात्रनिष्ठप्रत्यक्षफले ऽदृष्टद्वारकानुमितरूपजीवकर्तृत्ववत्। अनुमानफले ऽप्यदृष्टद्वारकोपादानप्रत्यक्षो
पजीवकर्तृत्वस्य समत्वादिति तात्पर्यं ४। स्वरूपतः उपजीवकर्तृताविरहाण्णेति।। सर्वं चेति। इंद्रियापेक्षेति। अनुमित्यात्म
कव्याप्तिज्ञानेऽपि परंपरयेंद्रियस्यापेक्षणीयत्वमस्त्येवेति भावः ४। वस्तुतः सर्वत्र मनोलक्षणेंद्रियजन्यत्वमे
वेति भावः ४। ननु व्याप्तिज्ञानत्वेनैवानुमितिकरणत्वं तथा च करणीभूतमीश्वरव्याप्तिज्ञानं न किंचिदपेक्षोत्पत्तिक
मत आह। अनुमितिमिति। भावयतः। उपादानप्रत्यक्षविषयानुत्पादयतः। तत्करणेति। अनुमितिफलोपहि ने
तकारणतानिर्वाहकप्रत्यासत्तिर्विशेषणज्ञानत्वेन स्वजन्यपरामर्शः। सर्वत्र करणस्य व्यापारसंबंधेनैव फलो ग
पधायकत्वात्। किं विशेषणज्ञानत्वेनैव जनकतायां दसामानाधिकरण्यप्रत्यासत्तिरत ईश्वरीयव्याप्तिज्ञा
नेनास्मदादिपरामर्शोपहितं तथा च ताहृशस्वजन्यपरामर्शात्मकप्रत्यासत्तिविरहेण ईश्वरज्ञानस्यानवा
ता। अनुमितिफलोपहितकरणता [illegible] शून्यत्वात्। नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावापत्तेर्जन्यव्या राम
४

संबंधेनफ २

प्तिज्ञानत्वेनैवानुमितिकरणतावाच्येत्याशयः। एतेनाप्रत्यासन्नस्याप्यपरापरस्य दंडादेः करणत्वात्। प्रत्यासन्न
भावेन करणत्वाभावसाधक इति प्रत्युक्तं सामान्यतोऽनभिधानात्। यत्तु ईश्वरीयव्याप्तिज्ञानमपि स्वजन्यव्यापार
संबंधेनानुमितिफलोपहितं भवत्येव कार्यमात्रोपधायकस्य तस्य फलानुकूलव्यापारात्मकपरामर्शं प्रत्यु
पधायकत्वादिति। तन्न। एवं सति व्यधिकरणव्याप्तिज्ञानस्यापि कालोपाधिविधया परामर्शोपधायकत्वेन स्वव्य
धिकरणानुमितिफलोपहितकरणत्वप्रसंगेन विशेषणज्ञानत्वेन स्वजन्यपरामर्शस्यैव तत्प्रत्यासत्तितया।
ईश्वरव्याप्तिज्ञानस्यानुमितिफलोपहितकरणत्वस्यासंभवात्। न च येन केनापि रूपेण फलोपहितत्वेऽपि नित्यस स्वजन्यपरामर्शसंबंधेन
त्यादिव्याप्तेरबाध इति वाच्यं यथा प्रत्यासत्त्योर्विशेषयोः अन्वयव्यतिरेकसामान्यावच्छिन्नस्य स्वरूपयोग्यतायाः
क्रु रूपकं तयोः स्वरूपयोग्यताघटकसंबंधेन फलोपधानस्य तत्र व्याप्तावनिवेश्यत्वात्। अन्यथा कपालादेः ईश्वत
रूपेण घटजनकत्वेऽप्याकाशादेः संयोगादिसंबंधेन घटात्मकफलसंबंधसंभवात्। एतद्व्याप्त्युपादानस्यैव

भवा० ५

निःप्रयोजनकत्वापातात्। फलायोगव्यवच्छिन्नं कारणं करणं तादृशमनुमितिकरणं च परामर्शः तस्य कारण
तायां सामानाधिकरण्यं प्रत्यासत्तिः॥ फलोपहितकरणमेव निरूप्यं। अत एव वक्ष्यति फलोपहितकरणस्य लक्ष्य
त्वेति तथा च ईश्वरज्ञानस्य फलसमानाधिकरण्यविरहेण तादृशफलोपहितकरणत्वाभावादिति पूर्वे इति ३ कश्चि
त्। अनुमितिकरणत्वावच्छेदेन प्रत्यक्षोपजीवकत्वं व्यवस्थाप्य प्रत्यक्षकरणत्वावच्छेदेनानुमानोपजीवकत्वस्य
व्यतिरेकमाह। सर्वं पुनरिति। ननु व्याप्तिज्ञानत्वेनैवानुमितिकरणताऽनित्य[illegible]वत्तित्वेप्यदृष्टादिरूपसहकारिवि
रहेण फलव्यतिरेकसंभवात्तनित्यस्येति व्याप्तेरप्रयोजकत्वात्पूर्वमाह। इष्टद्वारा वेति। तथा च करणतावच्छेदक
धर्मसामानाधिकरण्येन स्वजनकादृष्टाजनकेंद्रियजन्यत्वमेवानुमानेऽनंतर्भाविधाननियामकमिति भा
वः॥ इंद्रियत्वसामानाधिकरण्येन स्वजनकादृष्टाजनकानुमानजन्यत्वं नास्तीत्याह। न चोत्पत्तिमदपीति। अ
पि नाकरणतावच्छेदकावच्छिन्नत्वं सूचितं। न च यत्र चन्द्रदर्शनानेन पूर्वचन्द्रनाशानंतरं चन्द्रांतरोत्पादः। त

राम ५

द्वघर्षणाजनकप्रवृत्तिजनकस्यादृष्टाद्वारकस्यकृतिसाध्यतानुमानस्योपजीवकमेवृपस्कृतंतरमेवमौषधपाना
नंतरंप्रक्षिप्तचक्रस्तत्पादेपीतिवाच्यं। तत्र घर्षणाजनकानुमानस्यौषधपानजनकस्यप्रयोजकत्वेनजनकत्वाभा
वात्। नचैवमदृष्टाद्वारकत्वंव्यर्थम् अदृष्टद्वारकानुमानस्येंद्रियजनकत्वाभावादितिवाच्यं। ईश्वरज्ञानस्याप्येत
त्कल्पेऽनुमितिकरणतयातद्वारणायैवतदुपादानात्। अदृष्टद्वारकोपजीवकत्वस्योभयत्रसत्त्वात्तुविनि
गमकत्वमितिभावः॥ ननियमइति तथात्वेऽपजीवकत्वादितिहेतुपंचम्यनुपपन्नेतिभावः। कश्चित्कार्येनिरू
प्यापीतिपथाऽत्रैवानुमितिनिरूपणानंतरंतत्करणनिरूपणमितिभावः॥ तत्रज्ञानजन्यजिज्ञासाप्रयो
ज्यत्वंपंचम्यर्थः॥ नत्वनंतरत्वंज्ञाप्यत्वमित्याशयेनाह। किंचातइति। तादृशनियमाभावेकिमनिष्टमित्यर्थः
॥ नन्वनंतराभिधानाव्याप्यत्वेसंगतित्वमनुपपन्नम् अनंतराभिधानव्याप्यत्वस्यैवतद्घटकत्वात् अतआह। नही
ति। संगतिलक्षणपर्यालोचनेनापितस्याऽनंतराभिधानाव्याप्यत्वंऽपितंतल्लक्षणमाह। छ। आनंतर्ये ६

भवानी
६

तिआनंतर्य्याभिधानप्रयोजिकाया जिज्ञासाया जनकं यज्ज्ञानं तद्विषय इत्यर्थः॥ जिज्ञासाजनकज्ञानविषये
घुवदावतिव्याप्तिवारणाय प्रयोजकांतं प्रत्यन्तस्य कारणत्वज्ञाने कारणस्य कार्य्यमावश्यकमिति क्रमेण का
र्य्यत्वरूपेण कार्य्यसामान्यज्ञानं ततः सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वात् कि
मस्य कार्यमित्याकारिका शिष्यजिज्ञासा ततः शिष्यस्य किमस्य कार्यमिति शब्दप्रयोगः॥ ततः शिष्यजिज्ञासा
ज्ञानं गुरोः ततइष्टसाधनताज्ञानेनानेनराभिधानमिति क्रमेण॥ जिज्ञासाया अनंतराभिधानप्रयोजकत्वेन
तज्ज्ञानगोचरेच्छा। जिज्ञासा तत्र ज्ञाने इष्टसाधनताज्ञानं हेतुरिति तद्विषये इष्टसाधनत्वेऽगतिर्व्याप्तिरितिवाच्यं
।तादृशजिज्ञासां प्रति समानविशेष्यकत्वप्रत्यासत्त्यानवच्छिन्नाया जनकतानवच्छेदकं प्रत्यप्रकारकज्ञानत्व
तत्त्वस्योक्तत्वात्। इष्टसाधनताज्ञानस्य हेतुतायां समानविशेष्यकत्वप्रत्यासत्तिः। ततु कार्य्यत्वप्रकार
कज्ञानत्वेन कार्य्यत्वावांतरधर्मप्रकारजिज्ञासात्वावच्छिन्नं प्रति हेतुतायां कार्य्यत्वेन वैत्कमगत्या घटज्ञा

राम
६

नापिकार्य्यत्वावांतरधर्मप्रकारकज्ञानस्यैवेच्छोद्देश्यात् । अवच्छेदकत्वेचतत्पर्य्याप्त्यधिकरणत्वात् । तेनकार्य्यत्वघ
टकैकदेशनिरासश्चएतद्ज्ञाभावैवचार्थपदंयत्प्रकारकेत्यभिधानाच्चनकार्य्येदोषमिरापत्तिव्याप्तिरितियत्र
तादृशजिज्ञासात्वव्याप्यधर्मावच्छिन्नकार्य्यताप्रतियोगिककारणतायांयत्प्रकारकज्ञानत्वमवच्छेदकंतत्त्व
मर्थः । उपायेच्छात्वावच्छिन्नप्रतिइष्टसाधनत्वज्ञानस्यहेतुत्वात् उपायेच्छात्वस्यचघटेच्छादिसाधारणेन
तादृशजिज्ञासात्वव्याप्यत्वाभावादिति । तन्न । कार्य्यत्वावांतरधर्मप्रकारकजिज्ञासात्वादीनांज्ञानंतत्पर्य्या
व्याद् भिधानप्रयोजकजिज्ञासात्वाद्यघटितत्वात् । तादृशकार्य्यकारणभावमादायप्रकृतलक्षणागमनासंभवा
त् । तद्व्यक्तित्वावच्छिन्नकार्य्यताप्रतियोगिककारणतायांचतद्व्यक्तित्वस्यैवावच्छेदकतयाकार्य्यत्वप्र
कारकज्ञानत्वस्यानवच्छेदकत्वात् तादृशेष्टसाधनत्वेकार्य्यकारणभावात्मकतयासंगतिरेवेतितत्रा
तिव्याप्तिर्नदोषायेतितन्नछे । पक्षधर्म्मानुमानयोः कार्य्यकारणभावोहितयोःसंगतिर्नत्विष्टसाधन

मु.वा. त्वं तथा च परं नंतरं यदभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोपदः सतयोः संगतिः एवं हेत्वप्रत्यक्षानु
७ मानसंगतिलक्षणोऽइष्टसाधनत्वेऽगतिव्याप्तेरपरीहारात्। एवं मे व्याप्यधर्मप्रकारकज्ञानेष्टसाधनताज्ञा
नमानं तु व्याप्याभिधानप्रयोजकजिज्ञासाजनकं सधर्मः संगतिः॥ अत एव सामान्यधर्मप्रकारकज्ञानस्य सा
तेऽपराविशेषधर्मप्रकारकजिज्ञासां प्रति जनकत्वाभावेपि न क्षतिः॥ न वा इष्टसाधनत्वेऽव्याप्तिरिति
केचित्। अत्र वदंति॥ गेहे घटोस्तीत्यभिधानानंतरं घटत्वसामान्यज्ञानात् को घट इति जिज्ञासायां कंबु
ग्रीवादिमान्घट इत्यनंतराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषये घटत्वेऽतिव्याप्तिः। एवमाधा
रत्वज्ञानानंतरं आधेयत्वसामान्यज्ञानात् किमस्याधेयमिति जिज्ञासायामाधेयस्यानंतराभिधानाहाधे
ति यत्वादाववाप्तीति॥ अत्र ब्रूमः। गेहे घटोस्तीत्यादौ घटत्वादिकं संगतिरेव उपोद्घातमध्ये निवेशात्। तथा हि॥
कृ चिंतांप्रतसिद्ध्यर्थामुपोद्घातं विदुर्बुधा इत्यनेन प्रकृतसिद्ध्यनुकूलचिंताकालावच्छिन्नप्रकृतानुकूलत्वमुपो राम
७

स्मृतस्य प्रकृते घटोपस्थापकत्वे प्रमाणस्य हि कारणत्वं

ह्वातः प्रकृते च तत्र तत्र विशिष्योपादेयं अनुकूलत्वं च कश्चिद्धटकत्वं कश्चिज्ज्ञापकत्वं कश्चिज्जनकत्वं यथा
व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमित्यत्राज्ञातव्याप्तिकस्य व्याप्तिपदवाच्यत्वेन ज्ञाने का व्याप्तिरित्या
कारिकायां जिज्ञासायां व्याप्तिनिरूपणामेवं डिपासन्निकृष्टे पर्वतीयधूमे व्याप्तिपदवाच्यत्वेन ज्ञाने का
व्याप्तिरित्याकारिकायां जिज्ञासायां व्याप्तिविशिष्टत्वधीर्न तदुपस्थापकं विनेति तदुपस्थापकं कित्याकांक्षा
यां सामान्यलक्षणानिरूपणमेवं विशिष्टज्ञानस्यानुमितिहेतुत्वे किं ज्ञापकमित्याकांक्षायां परामर्शस्या
नुमितिहेतुत्वव्यवस्थापनमिति तत्र तत्रोपोद्घातपरप्रयोगः। प्रकृतेवाज्ञातघटपदार्थस्य घटोस्तीत्यतो
घटपदवाच्यत्वेन ज्ञाने को घटपदवाच्य इति जिज्ञासायां कंबुग्रीवादिमान्घट इत्यादिक्रमेण निरूपणोप्र
कृतघटास्तित्वसिद्ध्यनुकूलचिंताकालीनस्य घटास्तित्वघटत्वस्य सत्वेनोपोद्घातत्वसंभवात्। एवमाधा
रत्वादिकमपि प्रसंगमध्ये निविशते आधारप्रसंगेन स्मृतस्याधेयस्यानुपेक्षणीयत्वज्ञानेन जिज्ञासोदयात्

लाघवाघव प्रकरणे

।केचित्तु।घटोस्तीत्यादौघटपदवाच्यत्वप्रभावेपुत्वादिकंच प्रसंगएवानुपेक्षणीयत्वंहि उपेक्षानर्हतावच्छेदकधर्म-
वत्त्वं सच धर्मो घटपदवाच्यत्वाभावाधारत्वादिः उक्तरूपेणैव तदनुगमान्नापि कामित्याहुः तत्रस्मृतिकालावच्छे-
देनोपेक्षानर्हत्वं प्रसंगः अत्रस्मृतिकालावच्छेदः स्वरूपसम्बन्धितरांश४ ज्ञातोपयोगीस्मृतिरनुपेक्षणीयता वा-
भिधानुरेवस्वयंस्मृतायां जिज्ञासानुदयात् स्वीयानुपेक्षणीयत्वज्ञानस्य जिज्ञासाजनकत्वाभावाच्च।केचित्
श्रोतुरेवस्मृतिरनुपेक्षणीयता च वक्तुरस्मिन्नष्टे वक्तुरुपेक्षा न भविष्यतीति प्रतिसंधाय श्रोतुर्जिज्ञासोदयादित्या-
हुः।एवं प्रकृतसिद्ध्यनुकूलचिन्ताकालावच्छेदेन प्रकृतानुकूलत्वमुपोद्घातः५।चिन्तासवक्तृगृहीत्वा।६ अत्रापितादृश-
कालावच्छेदः स्वरूपसदुपोद्घातपदनियामकः इतरांशः ज्ञातोपयोगी एवं प्रतिबंधकीभूतशिष्यजिज्ञासानि-
वृत्तौ अवसरएववक्तव्यत्वमवसरः अत्रापिनिवृत्त्यंशः स्वरूपसन्नितरांशएवज्ञातोपयोगीयथा अनुमाननिरू-
पणानन्तरं तादृशजिज्ञासानिवृत्तौ वक्तव्यत्वज्ञानात् किंवक्तव्यत्वमिति श्रोतृजिज्ञासानन्तरं उपमाननि-

चिह्नत्तव्यमि २

रूपणमितिजिज्ञासितार्थसिद्धत्वमवसरः इतिकश्चित्। तस्यापिशेषोक्तएवपर्यवसानंभवतिहि जिज्ञासाविषयसिद्धत्वे
इदंज्ञातमन्यत्किंवेति जिज्ञासेति। निर्वाहकत्वमेककार्य्यनिर्वाहकत्वंतच्च प्रयोजकत्वे। कारणतानवच्छेदक
साधारण्यात्। यथाव्याप्तिपक्षधर्मतयोरनुमितिजनकत्वेपितज्ज्ञानकीभूतज्ञानविषयता ऽवच्छेदकत्वेनैकका
र्य्यानुकूलत्वंतत्रसामान्यतोऽनुमितिलक्षणैककार्यानुकूलत्वज्ञानेकिंतदनुकूलमितिजिज्ञासायामनं
तरपक्षधर्मतानिरूपणमिति। एककार्य्यत्वंएकस्यकार्य्यताशेषोऽन्यतासावजन्यताजन्यज्ञानविषयतावय कारणस्य
याईश्वरशक्त्योरनुमानाजन्यत्वेपितज्जन्यज्ञानविषयत्वलक्षणैककार्यत्वसंगत्याईश्वरवादानंतरंमीमां
सकेनशक्तिराशंकितानेप्याप्यकेनईश्वरसिद्ध्यनंतरंशक्तिनिरस्यपरमप्रयोजनंत्वनुमानस्यापवर्गइत्यनेने
श्वरसिद्ध्यपवर्गयोरनुमानजन्यत्वलक्षणैककार्य्यताभिधानेनसामान्यलक्षणासंभवात्। परन्तु निर्वाहकत्व
मुपपादकत्वंमितितन्नउपपादकत्वंहिनज्ञापकत्वंघटकत्वंवावीणोप्रविद्यमानेनगतार्थत्वात्। नकारणत्वंहेतु

कार्यत्वसंगतिः क्वचित् सामान्यतोऽनेककार्य्यज्ञाने किमन्यत्कार्यमितिजिज्ञासायां विशेष २

एककार्यत्वेनैककार्यकारित्वं न ग्राह्यं हेतुत्वेन न्यूनवृत्तित्वात् बहुव्रीहिस्पष्टतापादकपुरुषस्यांतरंगत्वादिति भावः॥

भवा. तथा गतार्थत्वादेवं सर्वत्रोह्नीयं॥ अत्र च विभिन्नतात्पर्यकेसंगतिव्यवहाराभावात् एकवाक्यतापन्नत्वं सामान्य

८ लक्षणे विशेषलक्षणे च देयं। अत्र च तादृशजिज्ञासायोग्यत्वस्यातिप्रसक्तत्वात्। फलोपधानस्य च सर्वत्रासंभवा

त्। प्रसंगाद्यन्यतमत्वं तत्त्वमिति ध्येयं। ज्ञापकेचेति॥ कार्ये ज्ञाते कार्यंसा कारणमिति रीत्या कारणत्वस्य ज्ञाना

त् किमस्य कारणमिति जिज्ञासा कारणे ज्ञाते कारणस्य कार्यमिति रीत्या किमस्य कार्यमिति जिज्ञासेत्यर्थः। द्वयो

रेवेति। तथा च संगतेरनंतराभिधानव्याप्यत्वे सत्यनंतरासंभविताहशवादिमतेऽपि कारणे व्यभिचारादिति भाव दे

४। इत्थं च संगतेरनंतराभिधानाव्याप्यत्वे च। एवं चोपजीवकत्वादिति पंचमी न हेतुतायां किंतु ज्ञानजन्यजि

ज्ञासाप्रयोज्यतायामिति भावः। लाघवायेति। यद्यपि उपमान एव संगतिप्रदर्शने तादृशशब्देनैवा

भिधानेंऽशकत्वान्न शब्दलाघवं तथापि प्रकरणलाघवायेत्यर्थः॥ प्रकरणे च संगतिप्रदर्शने [illegible] प्रयोजि

काकांक्षाप्रत्यज्ञोपजीवकत्वादनंतराभिधाने किं नियामकमुपमानात्यागाभिधाने किं नियामकमिति राम

८

जिज्ञासाऔत्सर्गिकत्वेन तामनाहत्य उपमानग्रंथेन संगतिप्रदर्शने आकांक्षांतरकल्पनागौरवमितिभावः
ननु बहुवादिसंमतत्वेन संगतिरत आह। स्वप्रसिद्धतयेत्यादि॥ अनुमानस्य स्वप्रसिद्धत्वेन सामान्यधर्मप्रका
रकज्ञानस्य जिज्ञासाजनकस्य संभवादितिभावः। स्वप्रतिपन्नयेत्यत्र हेतुं निरसनीयेति। निरसनीया अल्प
वादिविप्रतिपत्तिविषयत्वेनेयेत्यर्थः। दुरूहत्वं केवलवदनिष्टसाधनत्वज्ञानान्न कदाचिदिच्छाप्रतिबंधः स्यात्।
अतः स्वबोधत्वप्रथमजिज्ञासायामुपपत्तेः। दुरूहत्वेहेतुं निरसनीयबहुवादीति॥ ननु स्वागमस्यास्यमप्यु
हितत्वं शक्यत्वादित्यादिन्यायेन स्वागममनुपेक्ष्य दुरूहेऽपि कस्यचिज्जिज्ञासा प्रथमं भवतीत्यत आह। औत्सर्गिकी
मिति। ननु प्रतिबंधकीभूताया जिज्ञासाया निवृत्तिः प्रतिबंधकाभावांतरवत् स्वरूपमतीहेतुर्न बहूनीतामानां
भावात् अत आह। यथा चेति। आकरेऽपि च मतत्वबोधादौ प्रतिबंधकजिज्ञासानिवृत्तौ सत्यामेव शपथवक्तव्यत्व
मवसरः वक्तव्यत्वेज्ञानादेव जिज्ञासेतिनलक्षणान्याख्याः स्मिरत एव ग्रंथशेषे अवसरसंगत्यभावसूचनायत्रा

किंचिद्धर्मावच्छिन्नशक्तिमत्वे ५

मुवानो
१०

चामितिशब्दस्यविरम्यतद्घटिशाब्दस्यवाग्व्यपनिबंधेः॥शाब्दांतरेति॥उपमितिविषयीभूतगवयपदातिरिक्तगोसदृश
पदादिशक्तिग्राहकमित्यर्थः॥शाब्दांतरसमग्राहकं केवलमतिदेशवाक्यार्थस्मृतिरूपव्यापारमात्रोपक्षानेउपा
योगिनउपमितौतत्रगोसादृश्यादीनामविषयत्वात॥अतउपमितिविषयीभूतगवयपदप्रवृत्तिनिमित्तत्वबो
धकमनुमानमुपजीव्यत्वेदर्शयति॥सप्रवृत्तीति॥समानविक्तिवेद्यतयागवयपदप्रवृत्तिनिमित्तत्वविषयकं
गवयपदंसप्रवृत्तिनिमित्तकंसाधुपदत्वातइत्याकारकमित्यर्थः॥गवयोगवयपदप्रवृत्तिनिमित्तवानित्युपमि
तौगवयपदप्रवृत्तिनिमित्तसविशेषणतयातद्ग्राहकस्योपजीव्यत्वादितिभावः॥इदंचचिंतामणिकारम
तेआचार्यमतेतुगवयोगवयपदवाच्यइत्येवोपमितिस्वीकारादितिध्येयं॥अत्रोपमितावयंक्रमः अगृहीत
गवयपदशक्तिकस्यकीदृग्गवयपदवाच्यइतिप्रश्नानंतरंगोसदृशोगवयपदवाच्यइत्याकारकमतिदे
शवाक्यार्थज्ञानेनततःसादृश्यविशिष्टदर्शनेतदेवकरणंततोऽतिदेशवाक्यार्थस्मृतिःसैवचव्यापारः

पिंड

राम
१०

वह्नितु वह्न्यादिसंमतत्वादि त्यत्रोपमानकारणत्वात् तुमान कार्यतया वा वह्न्यादि संमतत्वादि त्यर्थप्रतीतेः न कोप्यस्य दम इत्यव धेयं ॥५ तेनेत्युपजो यार्थकत्वमन्यानं नतिविदितं ७

न्यत्यात तद्दृश्यत्र २

॥ ततो गवयो गवयपदवाच्य इत्युपमितिरिति नन्वेतावता उपमितिं तदुपजीव्य त्वमादर्शितं न तु यमानस्वरूपं
यत्यपि इत्यत आह । अत्रेति । उपमितिकरणस्यापि कार्यत्वेनादृष्टजनकत्वं तौपपत्तिकानुमानसापेक्षमेवो
यमानमित्यर्थः ४ । अयं गवयपदवाच्य गवयपदवाच्यो गवयसंयोगादित्यनुमानव्यक्तिविशेषस्यापि गवयो गव
यपदवाच्य इत्युपमानोपजीवकत्वादाह । निखिलमेवेति । तच्चानुमानत्वावच्छेदेनोपजीव्यकत्वेति । न दोष इ
ति किंचित् । इत्यस्वरसबीजं तु वह्न्यादिसंमतत्वादिति मूलेन तादृशसंगतेरप्रदर्शनात् । ग्रंथासंदर्भः ४ । ननु सं
गतेरनियामकत्वेऽनंतराभिधानेकिं नियामकमत आह । संभवतीत्येवेति । एवं च निरूपणयोः कार्यकारणभा
वः संगतिमुद्रया नोक्त इति न दोषः ४ । निरूप्ययोरिव निरूपणयोरपि कार्यकारणभावो प्यथा कथं विजिज्ञा
साजनकद्वारा संगतिरेवेत्यपि कश्चित् । इह प्रत्यक्षानुमानस्थले निरूपणयोः प्रत्यक्षज्ञानानुमानज्ञानयो
ः एवं च प्रत्यक्षपूर्वकत्वेनानुमानज्ञानजननार्थं प्रत्यक्षज्ञानस्यापि प्रथमपेक्षितत्वाद्दीप्रत्यक्षसमभिहितमि
६

शुद्धमन्ते चेति
पाठ

नदीउपरिदेशवृष्टिमत्वसंबन्धिनी

न वा॰ २२ तिभाव॥ निरूपणायोर्ज्ञानजनकशक्त्योः कार्यकारणतावच्छेदकयोऽप्यप्रयोजकभावइत्यर्थइतितु कश्चित्॥ अथ
तत्पूर्वकं त्रिविधमनुमानंपूर्ववच्छेषवत्सामान्यतोदृष्टंचेतिसूत्रे अथशब्दःप्रत्यक्षलक्षणानंतरं अनुमानमुच्यतइति
शेषः॥ त्रैविध्यंदर्शयति॥ पूर्ववदित्यादिना पूर्वंकारणंल्लिंगकंयथा ऽत्यन्तमेघसंयोगेनमहापदानुमानंशेषंका त
र्यंतल्लिंगकंयथानदीउपरिदेशवृष्टिमतीविशिष्टपूरत्वादितिसामान्यतोदृष्टंकार्यकारणाभिन्नलिंगकंय
थाइच्छाद्यधिष्ठितागुणत्वादितियद्वापूर्ववदन्वयीविशेषोव्यतिरेकीसामान्यतः सामान्योनान्वयव्यतिरेकसा
धारणेनसहचारेणगृहीतमेवंचकेवलान्वयिसाध्यकंकेवलव्यतिरेकिसाध्यकंअन्वयव्यतिरेकिसाध्यक
मित्यर्थः॥ अत्रानुमानरेकिसाध्यकंअन्वयव्यतिरेकिसाध्यकमित्यर्थः॥ अन्वयानुमानमनुमितिः कारणलिंग व्याप्तिप्रत्यक्षपूर्वकानुमि तिकारणादित्यर्थः
केत्येवंव्याख्येयंसूत्रेतद्यतइत्यध्याहृत्यतादृशानुमितिर्यतस्तदनुमानमितिरीत्याऽनुमितिकरणस्यापिल
क्षणेलब्धे॥ फलायोगव्यवच्छिन्नंकारणंकरणमितिमतेचतत्कीयलिंगपरामर्शएवानुमानमित्यनुमा राम २२

ना र्द
प्रत्य
नपदं यथाश्रुतार्थकमेवतद्यतइत्यपिव्याहर्तव्यमिति व्याप्त्यादीत्यादिना साध्यसाधनतत्सहचारदर्शनादिप
रिग्रहः अत्र च तत्पूर्वकमित्यत्र तत्पदेन इंद्रियसंन्निकर्षोत्पन्नत्वेन प्रत्यक्षस्य इंद्रियार्थसंन्निकर्षोत्पन्नं ज्ञानमि
त्यादिपूर्वसूत्रेण प्रकांतस्य परामर्शस्तेन स्वरूपनिरूपणयोः फलनिरूपणयोः कार्य्यकारणभावावग
म० । अन्यथा प्रत्यक्षफलनिरूपणानुमितिकरणनिरूपणयोरेवोपजीव्योपजीवकभावमात्रेण संगति
३ स्यादिति ध्येयं । ननु एवमपि सौक्रमोपपादनेपि अत्र कमानोपपादित इत्यत आह । अत्रापीति । अत्रापि अनुमा
नखंडेपि सहचरप्रत्यक्षेति । यद्यपि व्यभिचारज्ञानविरहसहकृतसहचारदर्शनं व्याप्तिग्राहकमित्युक्तं तत्र च प्र
त्यक्षं विशेष्यमिति कथं तन्निरूपणस्य हेतुत्वं तथापि प्रत्यक्षं मध्यतिपाद्य प्रत्यक्षं व्याप्तिग्राहकमि[redacted]
ति बोधयितुं परेण न शक्यते तत्रापि प्रत्यक्षनिरूपणं हेतुरिति ध्येयं । अत्रापि प्रत्यक्षखंडेपि इंद्रियत्वेनें
द्रियजन्यज्ञानं प्रत्यक्षमिति लक्षणाकरणात्करणनिरूपणयोः कार्यकारणभावावगम० तस्यातेन रूपेण

नुमाननिरूपणात्स्य अनुमानोपमानयोरपिक्रमनियामकमाह। एवमिति। अनुमानस्योपमानांतर्गतत्वमप्रसक्ते
नयाननिराकृते उपमानस्य चानुमानांतर्गतत्वंप्रसक्ते एकदेशिनामनुमानेनैवोपमानमेन कार्यान्यथासिद्धु
पगमादत उपमानत्वेऽनुमानभिन्नत्वेनोपमानेनिरूपितमिति तदर्थमनुमानंप्राङ्निरूपितमिति भावः॥
~~ध्वनुमाननलक्षणकर्तव्ये उपमानत्वेऽनुमानभिन्नत्वेनोपमानेनिरूपितमिति तदर्थमनुमानंप्राङ्निरूपित~~
~~मिति भावः~~ ननु अनुमानलक्षणे कर्तव्येऽनुमितिः किमिति लक्षितेत्यत आह। लक्षणस्वरूपेति। लक्षणेति
त्करणमित्यादिना स्वरूपेत्यादिना प्रामाण्यमथानुमानेन प्रमाणाभिन्यादिना निरूपितेत्यादिना ~~क~~
~~स्वरूपयोगादिनाप्रामाण्यंमथानुमानेनप्रमाणभि~~ तत्त्वानुमानं त्रिविधमिति विभागादिसंग्रहः। एवमनुमे वि
धेनुमितेर्विशेषणत्वादिति भावः॥ प्रामाण्यं इति तृतीयाप्रकारिकायां निरूपणे शब्दः। तथा च लक्षण
स्वरूपप्रामाण्यादिप्रकारकशब्दतिषये अनुमाने विशेषणत्वेनात उपविष्टोऽयमनुमितिरित्यर्थात्तत्

स्वरूपादेनानुमानात्मकमितेरनुमाने संबंधः   इति सप्तमी अनु २   रादुत्तरग्रन्थे

प्रथमांतान्वयविरोधस्तथाचाधारसप्तमीविषयकनिरूपणाप्रकारत्वं च संबंधषष्ठीप्रकारित्वं विषयित्वं च व्यापा
रानुबंधितया बोध्यं। अनुमाने निरूपणीये मानं निरूपणीयं कर्तव्यं इत्यर्थ इति कश्चित्। अनुमाने निरूपणी
ये अनुमाननिरूपणार्थं तथा च निमित्तसप्तमी अनुमानस्य विशेष्यतया निरूपणस्य च विशेषणत
या पूर्ववाक्ये नवोधितत्वादनुमाननिरूपणा इति परामर्शस्यासंभवाद्विशेषणस्य निरूपणस्य निमित्त
तया विशिष्टे निमित्तत्वं विवक्षितत्वात्तथोक्तमित्यन्ये। उभयत्राप्यनुमितिर्निरूप्यत इत्यन्वयः। ननु भवतु
सर्वत्रानुमितेरनुप्रवेशोऽनुमितिघटितमेवानुमानलक्षणं किमिति कृतं अन्यथापि तल्लक्षणासंभवा   व्याप्तिज्ञानत्वादिना
दत आह। करणस्येति। अत्र मूर्त्तिः कारणत्वेन तत्क्रियाभेदेन भिन्नं भेदो वैजात्यं तथा च प्रत्यक्षादिकरणता   ग्रन्थस्येति
तोऽनुमितिकरणताया विभिन्नत्वमेव प्रत्यक्षानुमानयोर्विभिन्नप्रमाणत्वे व्याप्तिशब्दोभयविषयकस्यै
कस्मरणस्याभिन्नत्वेपि शब्दानुमानत्वेन पृथक्प्रमाणव्यवहारात्तथा च प्रत्यक्षादिप्रमितितोऽनुमितेर्वै

ननु व्याप्तिज्ञानत्वेनानुगमाभेद एव प्रत्यक्षानुमानयोर्भेदकं इत्यत आह। आत्मभेदस्य व्याप्तिज्ञानत्वेन अनुगमक
त्वेन संभवतीति भावः॥

४ स्थापनाये नीलपदस्य लक्षणैव। तथा उत्पलपदस्योत्पलत्वलक्षणायां गौरवं पर इत्यावेदं।

क्षिति

भवानी लक्षणपज्ञानार्थं अनुमितिलक्षणाभाव४। अत्र क्रियालक्षणावाक्ये। कर्मधारयोत्तरेति। ननु भावप्रत्ययस्यसा
१३ रा मानाधिकरण्यत्वेन तत्पदार्थतावच्छेदकसामानाधिकरण्यत्वेन वा शक्तिराधे नीलत्वोत्पलत्वयोः सामानाधिकर
13 ण्यलाभ४। तयोः पदार्थतावच्छेदकत्वेन सामानाधिकरण्येऽन्वयान्न च तत्पदे नीलत्वोत्पलत्वयोरेव लक्षणा। नीलउत्पलपदे
गौरवात्। नीलत्वोत्पलत्वयोरभेदस्याबाधितत्वात्। नीलोत्पलपदान्नीलाभिन्नोत्पलानुभवापलापात्ताच्च। द्विती
ये नीलोत्पलीयं नीलत्वोत्पलत्वसामानाधिकरण्यमित्येवं रीत्या प्रत्ययोत्तादृशसामानाधिकरण्येऽवच्छेदक वै
तासंबंधेन प्रकृत्यर्थस्य नीलोत्पलस्यान्वयोपपादनेनैकदेशान्वयाभावेष्यनंतशक्तिकल्पनापत्तेः एवं घट
त्वादौ प्रकृत्यर्थतावच्छेदकधर्मस्य प्रतिपादनेनीलोत्पलत्वमित्यत्र तादृशसामानाधिकरण्यस्येति बुद्धत्वि शक्तिवैलक्षण्य
भेदकल्पनमपीति अत्रेदं वदंति घटत्वमित्यादौ प्रकृत्यंशकेरेव प्रकृते तादृशसामानाधिकरण्यलाभ४।। तत्र कल्पनामिति।
हि घटेतरावृत्तित्वे सति सकलघटवृत्तित्वेन प्रकारेण घटत्वमुपस्थाप्यते तत्र प्रकृतिरेव घटस्यलाभ४।३ राम
१३

१ इतरवृत्तित्वस्य वृत्तित्वत्वापेक्षया गुरुतया तदवच्छिन्नाभावस्याप्रसिद्धत्वादित्यर्थः ॥३ २ तथा च घटेतरवृत्तित्वप्रतियोगिकाभावस्य द्रव्यत्वादावभिमतत्वात् घटत्वादौ बाधादित्यर्थः

ति तरावृत्तित्वादौ भावश्च तस्य शक्तिः। न चापि इतरवृत्तित्वावच्छिन्नाभावस्याप्र[illegible]म भावश्च साकल्यवृत्तिम
त्त्वविशेषकलितमित्यर्थः। इतरवृत्तित्वप्रतियोगिकाभावस्यातिप्रसक्तत्वात्। इतरवृत्तित्वत्वावच्छिन्नाभाव
स्याप्रसिद्धत्वात् घटत्वादौ बाधाच्च। विशिष्टस्य शक्यतासंभवात्। एवमन्यत्रापि एकपदोपात्तानामपि तावतां
परस्परोपश्लेषेणाबोधने तत्र प्रकृतिजन्यबोधे येन संबंधेन तत्तदुपात्तानामवच्छेदक[illegible]धर्मस्य प्रकारता तेन सं
बंधेन इतरावृत्तित्वं तद्वृत्तिमत्त्वार्थः। तेन घटत्वमित्यादौ न कंबुग्रीवादिमत्त्वादेर्भानं नीलोत्पलत्वमित्यादौ
नीलाभिन्नमुत्पलं तद्वृत्तिप्रकृत्यर्थः। तत्र प्रकृत्यर्थतावच्छेदकं नीलाभिन्नोत्पलत्वं तच्च नीलत्वसमवाय्यभिन्नस
मवेतोत्पलत्वं तस्य चोपाधितया स्वरूपसंबंधेनैव प्रकृतिजन्यबोधप्रकारता तेन संबंधेन च न तद्रूपाभिधाने
न सामानाधिकरण्यस्यापि भानं द्रव्यमेयांशस्यापि क्वचिद्भानेऽपि नीलत्वसमवायिसमवायस्यापि भानादिति म
प्रमेयत्वमित्यादौ चेतरावृत्तित्वांशो न भासते अप्रसिद्धत्वात्। किंतु सकलप्रमेयवृत्तित्वं। न च गुणान्य

घटेतरस्मिन्कालादौ कालिकसंबंधेन घटत्वस्य वृत्तावपि न क्षतिः। न चा५

३ विशिष्टनिरूपितापि समवायसंबंधावच्छिन्नाधिकरणता तत्स्वरूपसमवायेन · यद्वा विशिष्टस्य रूपं विशेष्यतदपि न समवायेनेत्यर्थः। ...तं ए वै न च गुणान्यत्वेत्यादि संगतिः

६ प्रकृत्यर्थतावच्छेदकभेदेन शक्तिभेदस्यावश्यकत्वादित्यर्थः।

भवा त्वविशिष्टसत्त्वमित्यादौ विशिष्टस्यानतिरेकितया तदितरासमवेतत्वस्य महत्त्वमित्यादौ च सकलमहद्वृ
२५ त्तित्वस्य महत्त्वपरिमाणे बाधादनन्वयप्रसंगा इति वाच्यं। तदितरत्वव्यापकात्यंताभावप्रतियोगितावच्छेदकत
॥ द्रूपताभावप्रतियोगितानवच्छेदकधर्मवत्त्वस्यैव तदुभयपदेन विवक्षितत्वात्। तदितरत्वव्यापकेति क
रणाच्च घटत्वमित्यादौ न द्रव्यत्वादेर्भानमिति। अत्र नव्याः। एवं सति एकत्वमित्यादौ परिमाणादेकथं न
लाभः। न च प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्टसंबंधेनैव तदितरावृत्तित्वेन तद्वृत्तित्वे च प्रतीयते। एक
त्वनिरूपितसमवायेन परिमाणादिके महत्त्वमिति न तत्रैकत्वपदवाच्यतेति वाच्यं। एवं सत्यनंतशक्तिकल्पना
वश्यकत्वे घटत्वादिषु प्रातिस्विकरूपेणैव शक्तिरस्तु। किमितरावृत्तित्वादिगौरवसहिष्णुतया यद्वा धर्मत्वे
नैव शक्तिरस्तु प्रकृत्यर्थतावच्छेदकनिरूपितसंबंधेन तत्र प्रकृत्यर्थस्यान्वयश्चेत् न घटत्वमित्यादौ न द्रव्यत्वा
देर्बोधः। अत एव गुणकिरणावल्यां पृथक्त्वमित्यादौ प्रकृत्यर्थतावच्छेदकावच्छेदेनैव गुणाभावप्रत्यय राम
२५

३ यत्र येन रूपेण बोधो मतिबाधकेन तत्र तेन रूपेणेत्यर्थः। यथा घटत्वमित्यादौ उपाधिरूपेण गुरुत्वमित्यादौ जातिरूपेण

एकत्रान्वयेन विशेष्यहेम(?)… कल्पना …

ऽप्रतिपादयति प्रतीतिस्कन्नताद्रूपे।धर्मितेन वेत्यन्यदेतदितिदीधितिकृतश्च विशीष्यहेःशक्तौ च नीलत्वोत्प
लत्वसामानाधिकरण्यं प्रकृते भावप्रत्ययार्थः। नीलोत्पलस्य प्रकृत्यर्थस्य तादृशसामानाधिकरण्ये ऽवच्छे
दकत्वेनान्वयः। घटपटत्वमित्यत्र द्वंद्वोत्तरस्येव नीलोत्पलत्वमित्यत्र कर्मधारयोत्तरस्यापि भावप्रत्ययस्य सा
मान्यशक्तोपस्थितयो नीलत्वोत्पलत्वयो कर्मधारयोत्तरभावप्रत्ययत्वावच्छिन्नया विशेषशक्तोपस्थिते
सामानाधिकरण्ये विशेषणत्वेनान्वयः। नीलाभिन्नोत्पलस्य च प्रकृत्यर्थस्याधेयत्वसंबंधेन नीलत्वोत्प
लत्वयोरवच्छेदकत्वसंबंधेन तत्सामानाधिकरण्ये वान्वय इत्यपि केचित्। बाधितेति। बाधितावाधितता
दृशसामानाधिकरण्यविषयके इत्यर्थः। भ्रांतानुमितीति। भ्रांतेर्भ्रमः। न च हृदो वह्निमानित्यादौ व्याप्तिवि
शिष्टवह्न्यादिहृदवृत्तित्वसामानाधिकरण्यस्य सिद्ध्या कथं तज्ज्ञानं भ्रम इति वाच्यं। तत्र हृदवृत्तित्वे व्याप्तिविशि
ष्टसामानाधिकरण्यावगाहिज्ञानमेव तत्र भ्रमः सामानाधिकरण्यपदार्थ इत्याशयात्। अत्र एवानेनेव

द्रान१ द्रान१

कोध प हृद धर्मितावच्छेदकावधिकमवाधितवाध्य(?) सामानाधिकरण्यं तदवगाहकत्वं।

एवं सविकल्प ... प्रमाणपरी इति भ्रान्तानुमितिरिति ... तद्व्याप्य ... प्रमात्मक ... सामानाधिकरण्यं ... इत्यर्थः । २

भवानी दोषेणोद्देश्यं निराकरिष्यति । के चित्तु पर्वतो वह्निमान् धूलीपटलादित्यादौ व्याप्तिविशिष्टपर्वतहेतुत्वसामानाधिक
रण्यं पक्षे न लौकिकदोषप्रसिद्धं तस्य धूलीपटले आरोपात्तु यथार्थानुमितित्वं न व्याप्तिरित्यर्थः । भ्रान्तानुमिती
२५ ति भ्रान्तस्यानुमितिः धूमजन्ययथार्थानुमितीत्यर्थ इत्याहुः । तत्संदर्भे विरोधाद्युपेक्षितो । नियमत इति यत्र वह्नि
15 व्याप्यवान् वह्निव्याप्तिविशिष्टपर्वतहेतुः धूमवांश्च पर्वत इत्याकारकः परामर्शः तत्र तत्संभवे । यत्र वह्नि
व्याप्यवानित्येव परामर्शस्तत्र न तदभावादित्यर्थः । ननु तेन रूपेणाहेतुत्वग्रहाद्यत्र तादृशबोधाभावस्तत्रा
२ नुमितिपलम्बनीयेत्यतो गौरवेणेति । ननु सामानाधिकरण्यमेकाश्रितकरणसम्बन्धः । एवं च समूहालम्बनात्
विशिष्टज्ञानस्य तदा न्यूनथानुपपत्त्या विशेषणप्रतियोगिकविशेष्यानुयोगिकसम्बन्धो विशिष्टधीविषयत्वे
नाभ्युपेयः । तथा च वह्निव्याप्यधूमवान् पर्वत इति तत्र धूमे वह्निव्याप्तिवैशिष्ट्यानुयोगित्वं पर्वते हेतुत्वप्रति
योगित्वरूपं तदुभयसामानाधिकरण्यमासन्नमेवेत्यत आह । संबंधसंबंधेति । समूहालम्बनाद्दा न्या राम

२५

व्याप्तिविशिष्टपर्वतवृत्तिधूमवानिति ... नानुमिति ... व्याप्यत्वावच्छिन्न ... विशेष्यता ... वह्निव्याप्यवानित्यत्र ... सामानाधिकरण्य
... विशिष्टैकार्थ ... ८

संबंधसंबंधाविषयकत्वेपीत्यत्र तात्पर्यं कदाचित् संबंधविषयताकत्वेनेको रचे।।२

४ विषयावैलक्षण्येपि विषयतावैलक्षण्यादेव वैलक्षण्यं विशिष्टज्ञानस्येति भावः।। ननु विषयावैलक्षण्ये

संबंध

थ्यानुपपत्त्याऽनुयोगित्वप्रतियोगित्वादिरूपसंबंधभानवत्सामानाधिकरण्यभानमपि भविष्यतीत्यतः
संबंधेति किंचित्। संबंधसंबंधाविषयकत्वेपि समूहालंबनव्यावृत्तस्य विशिष्टज्ञानस्योपपादितत्वात्
धियर्थः समूहालंबने सर्वत्र विशेष्यताविशिष्टज्ञाने विशेषणे प्रकारतासंसर्गे च संबंधताविशेष्ये विशेष्य
ताख्यविषयतेति विषयताविशेषात्तज्ज्ञानवैलक्षण्ये जितं साकारवादिना। तथा चार्थेनैव हि धियां विशेषइ
त्यनुरोधात्समूहालंबनाविषयोऽनुयोगित्वप्रतियोगित्वे च विशिष्टधीविषयइत्यपेयमत आह। अमस्य
लइति। ह्रदो वह्निमानिति भ्रमानुमितिस्थलइत्यर्थः। ननु भ्रमसदेव सामानाधिकरण्यं तत्र प्रसिद्धमत आह।
असदिति। असतो वैशिष्ट्यस्य सदुपरागेणापि भानस्य निरासादित्यर्थः। न च प्रतियोग्यप्रसिद्धिः। शुक्ति
विशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वस्य रजतत्वप्रकारतासामान्यस्य वाघत्किंचित्प्रमात्वघटक
प्रकारताख्यानियामकसंबंधनिरूपितत्वनियमबलेनार्थतस्तन्निरासात्। असद्वैशिष्ट्यभानेव रजत

५ तत्वलक्षणे सामानाधिकरण्यघटकं नो वा · आद्ये ऽप्रसिद्धा ... मानुमिता व व्याप्तेः । अन्ते · तथाविधलक्षणस्यैतल्लक्षणे ... पक्षे ... ।

भवा॰ २६ त्वप्रतियोगिकस्य तु कानुयोगिकवैशिष्ट्यस्य किंचित्त्वमात्रघटकस्य कारकैत्वानियामकतया शुक्तौ रजतत्वप्र
कारकज्ञानाया तादृशसंबंधनिरूपितत्वाभावेन तादृशनियमभंगादिति ॥ ननु पक्षहेतित्वे व्याप्तिविशिष्टत्वसा
16 मानाधिकरण्यपाचगाहिज्ञानमेव व्याप्तिविशिष्टत्वपक्षहेतित्वसामानाधिकरण्यज्ञानपदप्रतिपाद्यं तत्र
सामानाधिकरण्यव्याप्तिविशिष्टत्वपक्षहेतित्वयोरन्वयबाधेपि तादृशज्ञानान्वयेऽबाधात्तथा च तादृशज्ञा
नजन्यत्वं लक्षणानामाप्तमत [illegible] आह अथवान्तरेति ॥ तथा चैतादृशलक्षणे नैतादृशलक्षणवाक्यप्रतिपाद्य
मिति भावः । लक्षणवाक्यमुक्त्वा लक्षणवाक्यजन्यशाब्दबोधानुपपत्तिमप्याह । अथवान्तरेति तु कश्चित्
विषाणो विषाणत्वावच्छेदेन शशसंबंधेति शशविषाणोत्पत्त्रच पृष्ठस्यार्थलक्षणायां शशसंबंधिविषा
लि णोति शाब्दबोधे शशसंबंधिभेदस्यैव शशसंबंधाभावस्यापि विषाणे निर्णयो विरोधीत्यर्थः ॥ प्रमा
णप्रस्तावादिति प्रमाणतत्त्वमिह विविच्यते इत्यतः प्रमाकरणजन्यस्यैव प्रस्तुतत्वेन तदर्थं प्रमाणम
२६

शाब्दबोधानुपपत्तेः ... लक्षणे ... स्वस्वरूपः ॥ ४ शशसंबंधेनाभाव इति ... संबंधावच्छिन्न भेद ... अनुपपत्तिरिति ... ॥ २

इदं न समानाधिकरण्याभावप्रतियोगितावच्छेदकावच्छिन्नावच्छिन्न समानाधिकरणेधन ... तत्त्वादित्यत्र व्यापकतावच्छेदके इत्यर्थः।

लक्षणासंभवो चेत्यादित्यर्थः। प्रमैवेति। ननु प्रमाकरणलक्षणोपयोगिनी भ्रांतिरपीत्यर्थः। उपाध्या
यमते पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यं सर्वत्रानुमितिविषयः न तु पक्षतावच्छेदकावच्छेदे
नापि अवच्छेदकत्वस्य व्यापकताघटकत्वेन साध्यसंबंधविषयाभानासंभवात्तथा च गोषु प्रामाण्यावच्छि
न्नो घटो गोत्ववानित्यनुमितिः प्रमैवेत्यनेनोपपद्यते चेति। पक्षतावच्छेदकावच्छेदेन साध्यमानस्यानुभविकत्वा
त् संसर्गाग्रहादिसामान्यसामग्रीवशादनुमितावपि अवच्छेदकत्वं भासत एवेति भावः। चरमेति।। प्रथमज्ञा
नपदस्य तत्परत्वेन नैवातिव्याप्तिरिति भावः। प्रमापरमितियावदनुभविभिन्नत्वं प्रमात्वं। अव्याप्तेरिति।। अबाध्यत्वेवा
थत्वावगाहिना अपक्षधर्मेवा पक्षे अप्रमत्वावगाहिनेत्यर्थः। वस्तुतो वस्तुगत्या साध्यवान्यः पक्षस्तदवगा घ
हितया। ननु तस्या अनुमितेर्लिंगोपधानांशे अप्रमत्वेनालक्ष्यत्वमत आह। लिंगोपहितेति।। प्रमाणाभा
वादिति शेषः। ननु वस्तुगत्या साध्यवान्यः पक्षः तत्रेश्वरस्य तादृशज्ञाने प्रसिद्धमतस्तज्जनकत्वस्य तद

तथा च पक्षकत्वाभावो घट एव प्रसिद्ध इति मणिग्रन्थवत् एवकारोऽप्यर्थक एवेति भावः॥५

भाव. २७ नुमितोऽसत्त्वान्नाप्याप्तिरिति चेत् आहाऽईश्वरे इति। अतिप्रसंजकत्वादिति। तादृशपरामर्शत्वेन तस्य हेतुत्वाभावादनुपा
दानप्रत्यक्षत्वेन तज्जन्यत्वस्य प्रमामात्रेऽतिप्रसक्तत्वादिति भावः॥ अत एव तादृशप्रमानुमितावव्याप्ते
रेव तत्तज्ज्ञानत्वेनेति व्याप्तिविशिष्टपक्षधर्मताज्ञानमित्येवंरूपसप्तमीतत्पुरुषोऽपि नेत्यर्थः॥ पदार्थतावच्
छेदकेति। न चैवं स्वरूपैकशेषस्य द्वंद्वापवादकत्वानुपपत्तिरेकविषयत्वाभावादिति वाच्यं। पदजन्यप्रतीति
विशेष्यरूपस्य पदार्थस्य भेदापेक्षया पदजन्यप्रतीतिविषयभेद एव द्वंद्वस्य लाघवेन कल्पनात्। एवं च नीलघ
टयोरित्यत्र पदजन्यप्रतीतिप्रकारभेदात् घटोऽद्रव्यत्र विशेष्यभेदाद् द्वंद्वस्य प्रसक्तिः॥ अस्तो [illegible] त्यत्र ना
नार्थ एव स्वरूपैकशेषस्य सार्थकत्वाद्यथोक्ते नानुपपत्तिरिति। ननु नीलघटयोरभेद इत्यादौ द्वित्वं कुत्रा
न्वेति न तावद्विशेष्ये तस्यैकत्वात्। न विशेषणयोः पदार्थतावच्छेदकत्वेन निराकांक्षत्वात्। न च प्रकृ
त्यर्थद्वित्वसंख्यावाचकत्वं स्वपानवजन्मात्र द्वित्वसंख्याबोधकत्वं अत एवैकस्मिन्पार्थः परमाणो आ राम २७

३: पदार्थतावच्छेदकभेदेऽपि मतांतरमाह।

पङ्त्यन्तर्भूतगुणानादाय बहुवचनं समर्थितं वर्धमानोपाध्यायैरिति वाच्यं। एकस्मिन्घटे एको घटा
द्वयस्यासाधुत्वज्ञानाभावदशायां घटाद्वयबोधप्रसंगात्। ननु द्विवचनं पदसाधुत्वायैवेति चेत्तर्हि कर्मधा
रय एवास्तु किमर्थं पदार्थभेदमनादृत्य द्वंद्वकल्पनमिति चेत् नीलघटयोरित्यत्र कर्मधारये नीला २
भिन्नघटत्वेनोपस्थितो भेद इत्यस्य निराकांक्षत्वाद्नन्वयप्रसंगात्॰ ननु पदार्थयोरभेदस्थले।
पि द्वंद्वस्यासाधुत्वे कर्मधारय॰ किमर्थं पृथग्गीक्रियत इत्यत आह। पदार्थद्वयेति। तथा च यत्राभे
दसंसर्गकबोधे तात्पर्यं तत्र द्वंद्वासाधुत्वात्कर्मधारयादेव तादृशबोध इति भाव॰। भेदाभेदोदासी
नेति। भेदाभेदाविषयके तात्पर्ये॰ इदं च तादृशपदार्थद्वयबोधे विशेषणं। पदार्थयोर्भेद एव द्वंद्व इत्यनु
शासनस्य स्वरससिद्धमतमनुसृत्याह। विशिष्टपदस्येति। यत्र एकस्मिन्नेव चैत्रे चैत्रत्वचैत्रसंबंधानां पद
जन्यप्रतीतिविषयाणां भेदेन द्वंद्वोपपत्तिरतो विशिष्टेति। तदसत्। एकपदे द्वंद्वस्यानपवादकैकशेष

(एकवैजात्यप्रमापदप्रयुक्ते वैज पदद्वयेद्वंद्वसमस्तपदैकशेषापत्ति ... विशेषण॰पोविशेष्यो वैशेषिकी ... ॥१)

विशेषण॰२ विशेष्य॰१

भ॰वा॰ स्य चापादयितुमशक्यत्वात् किंच समस्यमानप्रत्येकपदार्थयोर्विशेषणयोर्यो भेदस्तयोर्द्वंद्वापादको न त्येक
१८ पे पदार्थयोरेव विशेष्ययोर्भेद इति नायं यथा॰ धर्मपरत्वे क्तो नपुंसके भावे क्त इत्यनुशासनाद्व्याप्तिवैशि
18 ष्ट्यमेव व्याप्तिविशिष्टपदार्थस्तथा च व्याप्तिविशिष्टपक्षधर्मतापदयोर्द्वंद्व इति भाव॰ एतेन वैशिष्ट्यशक्ते ... वक्तो गत कावि भाग॰ तेष॰
घातत्तरक्षणत्वपयस्याश्रयोपस्थापकस्याश्रयत्वेन लक्षणया व्याप्तिवैशिष्ट्याश्रयत्वोपस्थितौ व्याप्तिवैशि
ष्ट्याश्रयत्वपक्षधर्मत्वज्ञानजन्यत्वमर्थ॰ स्यात्तथा च व्याप्यवानिति परामर्शस्य संबंधसंबंधाविषयकत्वो
त्सैवाव्याप्तिरिति पराहतं एवमपि एकत्र धर्मिणि इति विशेषणोपि मीमांसकमतेनेति। तथा च व्याप्यवानिति शा
ब्दपरामर्शस्थलीयानुमितेरव्याप्तिः धूमत्वावच्छिन्नव्याप्तिवैशिष्ट्यज्ञानं धूमत्वावच्छिन्नपक्षधर्मताज्ञानं च का
रणमिति कोरणानाद्व कल्पनागौरवं गत्यधमारणव्याप्यवच्छेदकधर्मप्रकारकपक्षधर्मताज्ञानत्वेन
हेतुत्वोक्तौ च तत्काजीनत्वतनस्य रुपीयत्वप्रवेशादनंतकार्यकारणभावापत्तिरिति। मिथ इति। तदु राम
१८

मयं व्याप्तिविशिष्टपक्षधर्मतोभयं च पक्षेषु॥ परस्परसामानाधिकरण्यं अव्यापकत्वात्। व्याप्यवानि
ति परामर्शेत्तदसंभवादित्यर्थः॥ न च तदुभयेति। तदुभयविषयत्वनियतधर्मः परामर्शत्वं परामर्शस्य त्वन्ते
परामर्शत्वेन हेतुतायां मानाभावादित्याशयः॥ न च तत्तत्पक्षतात्वेन हेतुत्वात्॰ वह्निव्याप्यधूमोऽयं
पर्वत इत्यादिज्ञानस्य तत्पक्षे व्याप्तिरेवेति वाच्यं। अनेकवृत्तित्वेन धर्मस्य विशेषणात् तत्तद्व्यक्तित्व
स्य चैकमात्रवृत्तित्वात्॰ विषयस्य तत्त्वेन कारणत्वं नास्तीत्याशयेनेदमिति केचित्। पक्षधर्मतेति॥
पक्षधर्मताविषयत्वनियतधर्मावच्छिन्न इत्यर्थः क्वचित् पक्षधर्मतायाः पर्वतसंयोगादिरूपतया धूमधूमाभाव
सहचरितवह्निमान्पर्वत इत्येवमाकारकज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यताश्रये पर्वतो धूम
वान्नवेति संशयेऽतिव्याप्तिः स्यादतस्तद्वारणाय व्याप्तिविषयकत्वमावश्यकं। न चैवमपि धूमव्याप्य
धूमव्याप्याभावसहचरितवह्निमानित्येवंरूपसाधारणधर्मवद्धर्मिज्ञानजन्ये पर्वतो धूमव्याप्यवान्न

तत्त्वज्ञाने

कारणत्वस्य व्यवस्था
पक्षधर्मत्वादेः

व्याप्तिपदोपादाने वह्निव्याप्यधूमवत्पर्वतसंयोगप्रत्यक्षेऽतिव्याप्तिवारणाय·४ धूमव्याप्यतावच्छेदकावेति व्याप्तिर्भावपदोपादानेपि दुर्वारतया साधारणधर्मपक्षधर्मताज्ञान हेतुत्वेन

विषयिकत्वं व्याप्तिज्ञानत्वप्रकारकतावच्छिन्नकारणता ... विषयत्वनियतत्वविवक्षातः ४ म

भवा·
१८

वेन्निसंशयेऽतिव्याप्तिरिति वाच्यं। पक्षधर्मताविषयकत्वदले नापितद्वारणात्तथा च व्याप्तिविषय
कत्वदलस्य संशयविशेषातिव्याप्तिवारक[illegible]तया व्यावर्त्तकत्वमस्ति· न तु पक्षधर्मतापदस्य
त्याशयात् धूमवत्पर्वतसंयोगप्रत्यक्षे संबंधितावच्छेदकधूमप्रकारकपर्वतज्ञानत्वेन हेतुत्वात्तत्राप्तिव्या
प्तिरतस्य पक्षधर्मतापदोपादानवैयर्थ्यमुक्तमित्यन्ये। वस्तुतस्तु। पक्षधर्मताविषयत्वनियतत्वेत्युपा
दाने धूमवान्पर्वतो नास्तीत्यभावलौकिकप्रत्यक्षे प्रतियोगितावच्छेदकधूमप्रकारकज्ञानजन्येऽतिव्याप्तिर
तो व्याप्तिविषयकेत्याद्यावश्यकं· न च तथापि वह्निव्याप्यवान्पर्वतो नास्तीत्यभाव प्रत्यक्षेऽतिव्याप्तिरिति वाच्यं
निष्कृष्टमते व्याप्तेरतीन्द्रियतया तदवच्छिन्नप्रतियोगिताकाभावस्याप्यतीन्द्रियत्वात्तत्र न तेन रूपेण
हेतुताऽभावलौकिकप्रत्यक्षं प्रत्येव तथा हेतुत्वात्·एवं व्याप्तिपदस्याभावमात्रपरत्वेऽभावप्रका
रकत्वनियतधर्मावच्छिन्नतौकारणताप्रतियोगिककार्य्यताशालित्वं विवक्षणोऽनुमितिमात्रए

राम
१८

१ घटाभाववान्सर्व तोका ...तारे

१ तो धर्मस्य पक्षाभेदेन नाना... ...काद्ने ...भाववत्वा... धूमकान्यवं ...

वलक्षणं याताि । परं तु स्वत्रुल्लविशेषेऽतिव्याप्तिर्भवति पक्षधर्मतोपादानेतु व्याप्तिरिति व्याप्तिश्चेत्पतोपि
पक्षधर्मतोपादानवैयर्थ्यमुक्तमिति ध्येयं । वस्तुतस्तु विशिष्टवैशिष्ट्यबोधादोऽतिव्याप्तिवारणाय व्याप्ति
विषयकत्वेन जन्यं ज्ञानं विशेषणीयमिति वक्ष्यति । तथा च पक्षधर्मताविषयकत्वनियतेत्यादि विवक्ष
णो धूमवत्पर्वतवानिति विशिष्टवैशिष्ट्यबोधे व्याप्त्यविषयकेऽतिव्याप्ति ० (अतो व्याप्तिविषयकत्व
) नियतेत्यादि विवक्षणो धूमवत्पर्वतवानिति विशिष्टवैशिष्ट्यबोधे व्याप्त्यविषयकेऽतिव्याप्ति ०) अतो
व्याप्तिविषयकत्वनियतेत्यादि विवक्षणात् । वक्ष्यपके । न च पक्षधर्मतापदमुपादाय न च पक्षधर्मताविष
षये त्वनैव जन्यज्ञाने विशेष्यतां । तावतापि विशिष्टवैशिष्ट्यबोधातिव्याप्तिवारणासंभवादिति वाच्यं । त
थासत्यसंभवापत्तेः । पर्वतो वह्निव्याप्यवत्पर्वतवानिति विशिष्टवैशिष्ट्यबोधेऽतिव्याप्ति ० । व्याप्तिप्रका
रकपक्षधर्मताविषयकत्वोक्तौ च व्याप्त्यविषयत्वस्यैव लघुत्वेन विवक्षणौचित्यादिति तत्सारं

...तो पक्षधर्मतोपादानवैयर्थ्यमिव ४

२ पर्वतो वह्निमानिति सनुमितेरपि वह्निनिष्ठपक्षधर्मताविषयत्वाद्धेतुतावच्छेदकरूपेणाहेतुनिष्ठपक्षधर्मत्वाविषयत्वोक्तौ च ~~...~~

माथु० व्याप्तिविशिष्टपदपक्षधर्मताज्ञानपदयोः कर्मधारयः॥ शिष्टपदस्य प्रकारपरमित्याशयेनाह। व्याप्तीति
२० । यद्यपि वह्निव्याप्यो धूमः इत्यवान्पर्वत इति ज्ञानस्यापि व्याप्तिप्रकारकत्वात्। पक्षधर्मताज्ञानत्वा
च्चोक्तज्ञानस्यानुव्यवसायेऽपि व्याप्तिरूपप्रकारजनकत्वोक्तौ चासंभव एवं वह्निव्याप्यो धूमः॥ धूमवान्
२० र्वत इति ज्ञानसाधारण्यात्तथापि पक्षधर्मतांशे व्याप्तिप्रकारकत्वं विवक्षितं। तच्च पक्षनिरूपितप्रका
रतावच्छिन्नव्याप्तिप्रकारकताकत्वं। धूमो वह्निव्याप्यो धूमवान्पर्वत इत्यत्र पर्वतनिरूपिता धूमनिष्ठप्रका
रता न व्याप्तिप्रकारतावच्छेदिका किंतु धूमस्य मुख्यविशेष्यतैवेति न तत्साधारण्यमिति ध्येयं। अत्रापि ता
दृशा विवक्षणेपि। वह्निव्याप्यधनवानित्युक्तौ वह्निमदन्यावृत्तित्वरूपव्याप्तिप्रकारकत्वसंभावनास्या
दतो विशिष्याह। तद्वेन समानाधिकरणेति। तमानुमितेरिति। पूर्वं भ्रमात्मकपरामर्शजन्यायां विष
याबाधे न प्रमानुमितावव्याप्तिर्दर्शितेति भावः॥ वृत्त्यनियामकसंयोगेन साध्यतायां हेतुतायां चा राम

हेतुविषयतानिरूपिताधिकरणविषयतानिरूपितवृत्तित्वविषयतानिरूपिताभावविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितानवच्छेदकत्वविषयतानिरू-
पिताभावविषयतानिरूपितसाध्यतावच्छेदकविषयतानिरूपितावच्छिन्नत्वविषयतानिरूपितसाध्यविषयतानिरूपिताधिकरणविषयतानिरू-
पितवृत्तित्वविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नत्वविषयतानिरूपितपर्यवसितत्वावच्छिन्नविषयताशालिज्ञानमित्यर्थः ५

३ प्रकारकं इति एवं व्याप्तिप्रकारत्वं पक्षे व्याप्तिनिरासः स्यात् अत्र तु व्यापकत्वसामानाधिकरण्यप्रकार

काशानुमितिः। परामर्शस्वरूपमेव स्पाहृतोर्वृत्तिनियामकसंबंधेन हेतुतासाध्यताप्रतिपन्नपर्थमा
हा। अत्रेति। सप्तम्या आधेयत्वमतिपादनात्। नितरामिति। साध्यव्यापकत्वप्रकारसाधनेन च सा ३२
ध्यसामानाधिकरण्यप[illegible]योरप्रसिद्ध्याऽव्याप्तिवारणं न संभवतीति भावः। तथाऽव्याप्तिः। ना
वत्पदार्थानां व्याप्तिशरीरनिविष्टपदार्थानां। तथा विधेति। व्याप्तिमानेयत्रयस्य येन संबंधेन प्रकारता
तत्र ते न संबंधेन तत्प्रकारकत्वमित्यर्थः। तत्राधिकरणे हेतुप्रकारकं अभावेनादृशाधिकर
णे वृत्तित्वप्रकारकं प्रतियोगितायां तादृशाभावप्रकारकमित्यादिक्रमेण बोध्यं। न च व्यतिरेकिणी
ति। तत्र पक्षधर्मतायां वह्न्यभावव्यापकाभावप्रतियोगिधूमत्वस्यैव प्रकारत्वादिति भावः। ननु धूमव्या
पकवह्निसमानाधिकरणो धूमत्वस्य वह्न्यभावव्यापकाभावप्रतियोगिधूमत्वस्य च ज्ञानं वह्न्यभाव
वद्वृत्तित्वरूपव्यभिचाराधीनं प्रतिबध्यान्याभावावगाहितया वा न विरोधि इत्यत आह। भवतीति॥ न

तदभाव्याप्यानवगाहितया।

तस्यो पक्षधर्मिता वच्छेदकावच्छेदेन व्यभिचारधी विरोधित्व असम्भवादिति । तथा च पक्षधर्मितावच्छेदकावच्छेदेन साध्यसंशयानन्तरं धर्मितावच्छेदकावच्छिन्नधर्मिकव्यभिचार

थ्याचानत्थाभूतस्यापिज्ञानाय त्वैव मात्रिमं चादिन्यायेन प्रति बंधकत्वं कल्प्यत इति भावः । ननु धूम
व्यापकवह्निसमानाधिकरणधूमसमानाधिकरणासम्भवानितिज्ञाने धूमसमानाधिकरणात्यन्ता
भावप्रतियोगितानवच्छेदकत्व वानितिज्ञाने च वह्न्यभाव व धूम इति व्यभिचारधीविरो
धित्वसत्वात्तज्जन्यप्रत्यक्षेऽतिव्याप्तिः उक्तरूपेण जनकत्वविवक्षाणो त्वसंभवः एवं उक्तरूपस्य ज्ञानहश
धूमसमानाधिकरणासम्भवानितिज्ञानस्य साधारणतया जनकतानवच्छेदकत्वादत आह । तथा
विधेति । ननु तथापक्षधर्मतांशे व्यभिचारविरोधित्वासम्भवादिति । तद्विशिष्टव्यभिचारधीत्व विषयधर्म
प्रकारकतद्विशिष्टपक्षज्ञानजन्यत्वमर्थः । उक्तज्ञाने तु पक्षधर्मतया ज्ञातेऽसमत्व विशिष्टे
न व्यभिचारधीविरोधिधूमत्वविशिष्टे तथात्वेपि तस्य न पक्षधर्मतयाभानमिति भावः । ननु धूम
समानाधिकरणात्यन्ताभावप्रतियोगित्वादिव्याप्तेरेवोक्तरूपव्यभिचारधीविरोधित्वे मानाभावः । व्यतिरेकव्याप्तौ

धर्मिता १ २ व्यभिचारधी विरोधित्व विषय धर्मप्रकारक पक्षधर्मता ज्ञाने विरोधिधी ४
२ त्वेनेत्यर्थः

कैचकथा न च वह्नित्वं धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकं धूमाभववत्त्वं वह्न्यभावसमानाधिकरणा
भावप्रतियोगितावच्छेदकमित्येवं समूहालंबनात्मकव्यभिचारधीविरोधीत्वं वाच्यं। तथापि धूमव्याप
कवह्निकालीनधूमवान्पर्वत इति ज्ञानस्य सामानाधिकरण्याविषयतयाऽनुमित्यजनकस्य संग्राहकतया
उक्तरूपस्यानुमितिजनकतानवच्छेदकत्वात्। न च धूमव्यापकवह्निसमानाधिकरणधूमवान्पर्वतः। वह्न्यभा
वव्यापकाभावप्रतियोगिधूमवान्पर्वत इति ज्ञानयोरन्यतरत्वमेव हेतुतावच्छेदकमनेनस्तथैव लक्षणेनि
वेश्यमिति वाच्यं। अन्यतरत्वघटकभेदानां विशेषणविशेष्यभावे विनिगमनाविरहेणानानाकार्यका
रणाभावावच्छेदकत्वेन तद्रूपेज्ञयालाघवात्प्रत्येकरूपेणावच्छिन्नजनकत्वनायानायप्रवादेतदाह। व्यतिरेक
सहचारेणेति। ननु मणिमंजरीन्याये न विरोधित्वे मानाभावः। कश्चित्तु कोऽन्वयव्यतिरेकानुविधानस्य
तादृशाव्यभिचाराद्युन्नायकतयैव उपयोगादित्यस्वरसादाह व्यतिरेकसहचारेणेति। धूमसंशयोन्न

रुच्चित॥१

साध्यविकल्प ... साध्याभाववत्त्वं ... ।१।

विरुद्धत्वेन ... पक्षे ... साध्याभाववत्त्वं ... ।

भवा रिति। भ्रमसंशययोर्विपरीतज्ञानत्वेनानुगमः। विपरीतं व्यावर्तकमात्रं। तेन स्थाणुत्वप्रमोत्तरस्य पुरुषत्वाभाववत्प्र

२२ मोत्तरस्य च पुरुषत्वप्रत्यक्षस्य नासंग्रहः। तदुत्तरत्वेनाव्यवहितोत्तरत्वं तेन तादृशविपरीतज्ञानवत्प्रत्य मतद्वि १

क्षानिरासः पृष्ठे। तेनाव्यवहितोत्तरत्वस्य तत्तद्व्यक्तिविश्रान्तत्वेपि न क्षतिः। न वा तत्संशये व्यभिचार इति। उपा

ध्यायमतेपि तन्निर्णये प्रतितदभाववज्ज्ञानत्वेनैव विरोधिता। तत्र बाधामारोपनिर्णयस्य च विशेषदर्शनादेन पुनरु(?)

जकत्वात् एवं चांजकाग्रहांधकारकालीनतत्संशयोत्तरं तन्निर्णये(?) जनकग्रहालोकसमवधानमप्युत्तेजन

कत्वं वाच्यं। न चैवं यत्र पर्वतो वह्निमान्नवेति संशयानंतरं वह्निव्याप्यधूमवान्पर्वत इति भावि वह्न्यनुमिति

+ः तत्र पर्वतो वह्न्यभाववानिति लौकिकप्रत्यक्षे तत्राप्रामाण्यानुध्यात्मकतत्परामर्शेन पुनरनुमित्यापत्तिरे

वमंधकारस्थघटसंशयानंतरमालोकसमवधाने घटनिर्णयानंतरं पुनर्विशेषादर्शनप्रयुक्तघट

संशयानंतरं विनैव विशेषदर्शनं घटनिश्चयापत्तिः। पूर्वोत्तेजकस्य आलोकसमवधानस्य सत्वादिति राम

२२

... प्रमाचेति ... पर्वतो वह्न्यभाववानिति ... तः

आगर्तेक रूपे सर्प्पः ॥ आलोकसंयोगस्य सत्तान्न व्यभिचरः ॥

वाच्यं ।। तत्तत्कालावच्छिन्नविशेषदर्शनाद्यभाववविशिष्टतद्विपरीतज्ञानाभावत्वेन तन्निर्णायत्वावच्छिन्नं प्रति
हेतुत्वादिति बाधनिश्चयस्य स्यात्तेषां विरोधितापीन विशेषदर्शनेन तत्कालावच्छिन्नत्वं न देयं स्वमते
संशयोत्तरक्षणत्वावच्छिन्नं प्रति विशेषदर्शनस्य न हेतुता ॥ अंधकारस्थघटसंशयोत्तरक्षणतज्ज्ञानव्यभिचा
रात् न च तादृशाविपरीतज्ञानविरोधित्वेन हेतुता विशेषदर्शनादेर्लोकादिसाधारणविरोधित्वस्यै तद्भावरूपवत्ता त्रिव्यापत्वेन
कस्याभावात् किंच विशेषदर्शनप्रयुक्तसंशयानंतरं आलोकसमवधानस्य पुरुषांतरीयांधकार
त स्थघटसंशयविरोधिनः सत्वात्तत्र ज्ञानापत्तिः । तत्पुरुषीयतादृशविपरीतज्ञानोत्तरक्षणत्वं प्रति
तत्पुरुषीयतादृशविपरीतज्ञानविरोधित्वेन हेतुत्वस्योक्तौ चातिगौरवं। पुरुषांतरीयविशेष
दर्शनस्यापि तादृशविरोधित्वस्वरूपयोग्यत्वादिति प्रसंगः एवं तादृशविपरीतज्ञानवत्प्रत्यक्षनिर्णा त्व
यत्वं न कार्यतावच्छेदकं अर्थसमाजग्रस्तत्वात् । किंच भ्रमसंशयानुत्तरनिर्णायसामान्यस्यामग्रीस

51

भपा २३ त्वेभ्रमसंशयोत्तरमपि सामान्यनिर्णयापत्तिर्द्विवारेवेतितदुत्तरत्रत्तत्स्थेपि सामग्र्यंनैतत्तरकल्पने। तीव्रगौ
रवमानाभावः। एवं च विशेषदर्शनं इतरकोटिज्ञानविरोधितया संशयोत्तरतादृशप्रत्यक्षानुपपत्त्या न इत्यंन विशेषणपेक्षिणः
आह। हेतुतामत इति॥ न च सर्वमतएव विशेषदर्शनस्य विशेषणधीत्वेन हेतुत्वाद्धेतुतामत इति न युक्तं।
विशेषदर्शनत्वेनैव तस्य हेतुतापरामर्शत्वेन हेतुत्वविवक्षणेऽपि न चातिव्याप्तिरिति पूर्वपक्षिणाज्ञाशयात्:
विशेषणाधियोऽहेतुत्वाभिप्रायेणेदमित्यपि केचित्। तथाविधेति। व्याप्तिप्रकारकपक्षधर्मतानिश्चय
त्वेनेत्यर्थः। भ्रमादीति। अन्वयाव्यावर्त्तकधर्मदर्शनव्यञ्जकधर्मदर्शनालोकादिसाधारणाभावेन व्यभि
चारप्रसंगादिति। श्वेतत्वव्याप्यशंखत्ववानयमिति दर्शने च न पीतत्वभ्रमविरोधीति न ततः श्वेतत्वप्रत्यक्षं।
केचित्तु। विशेषदर्शनाव्यतिरिक्तयावत्कारणकालीनतादृशसंशयोत्तरत्वेति तादृशसंशयविरोधिदर्श
नत्वेन व्यावर्त्तकधर्मदर्शनादिसाधारणरूपेण हेतुता आलोकाभावप्रयुक्तसंशयोत्तरप्रत्यक्षेवा राम २३

ताधकालीनपरामर्शाजन्यप्रत्यक्षत्वावारणाय दूरस्थली यं विशेषदर्शनत्वं प्रामाण्यमेव प्रत्यक्षं २
व्यक्ते धितेन हेतुत्वे पूर्वं तरमाह

लोकसमवधानं हेतुरित्याकूतं ४। अत एव तथाविधनिष्कृपत्वेन त्रैतत्वविवक्षणादेवलिंगवत्वादिकं लक्षणे
स्वरूपे यस्य एवं भूतो योऽतिदेशवाक्यार्थस्तस्य यज्ज्ञानं वह्निव्याप्यधूमवत्पर्वतेन सदृशो महानसपदवाच्यमित्या
कारकं तज्जन्या या मितिरित्यर्थः ४। तथाविधेति। वह्निव्याप्यधूमवत्पर्वतसादृश्यविशिष्टमहानसपदवाच्यत्वज्ञा
नत्वेनेत्यर्थः ४। न्यायार्थेति। पंचावयवैरेकवाक्यतया बोधो जन्यत इति चिंतामणिकाररीत्या इदमुक्तं। स्वम
ते तूपनयार्थविशेष्यकनिगमनार्थविशेषणकशाब्दबोधेऽतिव्याप्तिर्बोध्या। ननूपनयेन वह्निव्याप्यधूम
स्य पर्वते नास्ति ज्ञानस्य कारणतयाभानं किंतु मत्वर्थसंबंधितोऽभेदः संबंधेन तत्प्रकारकतयाभानमिति तादृशनि
श्चयत्वेन हेतुत्वविवक्षणे एव तत्र नातिव्याप्तिस्तथा चायुमितिः फलनयोऽस्ति इत एवेत्यत आह। तद्धर्मेति। यत्र
वह्निव्याप्यधूमवत्पर्वतमेव वस्तु विशेष्यीकृत्य सोऽस्तीति शाब्दोऽभिहितस्तत्र वह्निव्याप्यधूमवत्पर्वतेनोपस्थि
ता ज्ञाने वह्निव्याप्यधूमवान्पर्वतोऽस्तीति शाब्दबोधेऽतिव्याप्तिः ४। मनु तत्र धर्मान्तरवद्विशेष्यत्वेनैवोपस्थि

नावांतरवाक्यार्थज्ञानत्

भ.वा
२५

ति ॥ शाब्दबोधे विशेषप्रकारकधीर्मानसीति तत्तज्ज्ञाति प्रसंग इत्यत आह। संकेतितेति। यत्र वह्निव्या
प्यधूमवत्पर्वतएव घटपदस्य संकेतग्रहे घटोऽस्तीति वाक्येन वह्निव्याप्यधूमवान्पर्वतोऽस्तीति बोधो जनि
तस्तत्रातिव्याप्तिरित्यर्थः। ननु महावाक्यार्थज्ञानेंजन्यमतः कथं न्यायार्थज्ञानेऽतिव्याप्तिरत आह। वृत्त्या
दर्शयिष्यत इति। पदजन्यत्वस्येति। घटादिपदादाश्रयत्वादिसंबंधेनाकाशोपस्थितावपि शाब्दबोधानुदयात
वृत्त्या पदजन्यपदार्थोपस्थितित्वेनैव हेतुत्वमित्यर्थः। ननु घटशाब्दबोधं प्रति वृत्त्या घटोपस्थापकपदज्ञा
नत्वेन कारणता वृत्त्यास्तु जन्यघटोपस्थितिर्व्यापारः। व्यापारस्य हेतुता च घटत्वप्रकारकज्ञानत्वेनैवावच्छि
द्यते। नचैवं घटपदात्पटोपस्थिते घटे पटोपस्थितिव्यापारके घटपदज्ञाने सति घटशाब्दबोधापत्तिः घटशाब्दबो
धे पटोपस्थितेरजनकत्वेनाऽव्यापारत्वात्। नचैवमपि घटपदजन्यघटोपस्थितौ सत्यां स्वप्रकारांतरेणाघ च
टोपस्थितेरपि शाब्दबोधजनकत्वापत्तिरिष्टत्वात्तादृशपदजन्यपदार्थोपस्थित्यभावकाले शाब्दबोधानुदय

राम
२५

५२

स्यतावत्ताप्युपपन्नत्वान्न तथा च पदार्थोपस्थितेर्हेतुतायां पदजन्यत्वप्रवेशात्तथैवानिव्याप्तिरत आह । नि

श्चयत्वस्येति । उद्बोधविषयापदज्ञानस्य पदजन्यपदार्थोपस्थितेरेव व्यापारत्वेन तस्य स्मरणरूपतया

शाब्दबोधरूपतया वा निश्चयभिन्नत्वासंभवेन तद्वारणाय संशयान्यत्वे ज्ञानेस्य च प्रवेशानर्थक्यादिति

भावः । केचित्तु पदार्थोपस्थितिकारणतायां पदजन्यत्वमधिकं निविष्टमित्यपि व्याप्तेरत्यन्तासंभवप्रदर्श

नार्थमिदमित्याहुः । तथापि पदार्थोपस्थितिकारणतामादायातिव्याप्तेर्वारणेपि तादृशशक्त्यैव वह्निव्या

प्यधूमवत्पर्वतवानितिप्रत्यक्षाद्यनन्तरं शाब्दबोध इति । वह्निव्याप्यधूमवत्पर्वतं तु स्वीकृतेतत्पदादानितिशाब्द हि

प्रयोगे वह्निव्याप्यधूमविशिष्टपर्वतस्य तच्छब्दार्थतया तादृशविशिष्टधीसंभवादित्यर्थः । तादृशविशिष्ट

वैशिष्ट्यावगाहिशाब्दबोधे पदजन्यविशेषणतावच्छेदकप्रकारकधियो विशिष्टकल्पनेपि तादृशावि हेतुता

शिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति तादृशविशेषणतावच्छेदकप्रकारकनिश्चयत्वेन या हेतुतापत्त्या

विशेष्ये विशेषणमिति विषयताया आत्माधारत्वं नेत्यर्थः। विशेषणज्ञानत्वेन नतु [illegible] ज्ञानत्वेन नतु निश्चयत्वेन वेत्यर्थः। इत्यत एव [illegible] हेतुता [illegible]

भवा०
२५
२५

दिसाधारणीतामादाय शाब्दबोधेऽतिव्याप्तिरिति भावः॥ चकारात् वह्निव्याप्यवत्पर्वताभिन्नः पर्वतः पर्वतप
द्वाच्य इत्यपि मितिसंग्रहः॥ ननु तत्कारणतायां निश्चयत्वेन न निविष्टमत आह। दंडो रक्तो न वेति। रक्तदंड
वानिति ज्ञानं द्वेधा एके विशेष्ये विशेषणांतरं च विशेषणांतरमिति रीत्या अन्यतरविशिष्टे वैशिष्ट्यमिति रीत्या स्य
तत्राद्यप्रकारे निरूपितदंडनिष्ठविशेषणताभाननिरूपितरक्तत्वविशेषणताशालित्वं निरूपितत्वं विशेष
णतायां स्वरूपसंबंधविशेषः प्रतीतिसाक्षिकः॥ दंडो रक्तः दंडवानिति ज्ञाने च दंडनिष्ठविशेषणतानिरू
पितान रक्तत्वनिष्ठविशेषणतेति तद्व्युदासः। कारणं च तज्ज्ञानावद्विशेषणज्ञानमसंसर्गाग्रहश्चेत्येव
निर्विकल्पकानंतरं दंडो रक्तो न वेति संशयानंतरं स्वतादृशधीः सार्वलौकिकी यदि च तादृशसंशयकाले
विशेष्ये विशेषणमिति रीत्यापि दंडे रक्तवानिति न धीः तदा तादृशबोधं प्रति रक्तो दंड इति निश्चयाभा
वविशिष्टस्तादृशसंशयः प्रतिबंधको वाच्यः॥ न च दंडो रक्तो न वेति संशयानंतरं तादृशभूतले रक्तो राम

न०वि०विशे
पत्र ४

दंडो नास्तीति मानसधीर्विशेष्ये विशेषणमिति रीत्या स्यात् अभावे प्रतियोगितावच्छेदकविशिष्टप्रतियोगि
तावच्छेदकविशिष्टप्रतियोगिनो विशेष्ये विशेषणमिति रीत्याभानस्याप्रसिद्धत्वेन तत्तद्वच्छिन्नप्रति
प्रतिबंधकत्वकल्पनायात्र योगादिति वाच्यं। लौकिकप्रत्यक्षेंद्रियसंबंधविशेषणतायां विरक्तदं रक्ताभा
डीयत्वासंसर्ग[illegible]ग्रहस्यापि अभावे रक्तत्वविशिष्टदंडविशिष्टवैशिष्ट्यावगाहिबोधत्वस्यैव कार्यता त
वच्छेदकतया तादृशबोधवारणात्। वस्तुतस्तु। अभावनिरूपितदंडनिष्ठविशेषणतानिरूपितरक्त
वि त्वनिष्ठविशेषणताशालित्वमेव विशेष्ये विशेषणमिति रीत्या तदवगाहित्वं। तत्र रक्तदंडो नास्तीति वि
शिष्टवैशिष्ट्यबोधे प्रसिद्धं। तदवच्छिन्नप्रति तादृशनिश्चयाभाववविशिष्टसंशयस्यैव प्रतिबंधकत्वा
च्च। संशयानंतरं निश्चयेन तादृशविशिष्टवैशिष्ट्यबोधानुपपत्तेः॥ अत एव विशेष्ये विशेषणमि
ति रीत्या विपर्यये विशिष्टवैशिष्ट्यबोधसाधारणी ग्रहत्वादिजनकतावच्छेदिका न च प्रवृत्त्यादिनि

मैर

म॰वा॰ यामकाएकाविषयतातद्व्याप्यंच विशेष्ये विशेषणमितिविशिष्टस्यवैशिष्ट्यमितिविषयताद्वयमितिवा
२६ च्यामानाभावात्। विशिष्टवैशिष्ट्यबोधेपिविशेष्ये विशेषणमितिविषयतायानियामकस्यैनतदावश्य
२६ कत्वेनतदावश्यकत्वेतत्रविशिष्टस्यवैशिष्ट्यमितिविषयतानियामकसामग्र्याः प्रतिबंधकत्वकल्पने
ऽतिगौरवात्। एवंच दंडीपुरुषः इत्यादौ एकत्र द्वये एकविशेषणविशिष्टविशेषणांतरवैशिष्ट्यमितिचविष
यताद्वयंतत्राप्युक्तरीत्याचरमबोधे तदनुयोगितावच्छेदकप्रकारभेदेनैकत्रद्वयमितिविषयताचव्याप
केतुपयमास्माकीनः। पर्याप्त्यादिकंचशब्दालोकसारमंजर्यादौप्रपंचितमस्माभिः। रक्तदंडवानितिविशि
ष्टवैशिष्ट्यबोधेतुरक्तत्वविशिष्टदंडत्वविशिष्टनिष्ठप्रकारताव्यासज्यवृत्तिरेकारक्तत्ववैशिष्ट्यादि
कंतेनरक्तवद्भिन्नानित्यादौनविशिष्टवैशिष्ट्यबोधासंभवः। अन्यथाव्यासज्यवृत्तिरक्तत्वादिप्र
कनिष्ठप्रकारतानामादायतत्रैरक्तत्वादिप्रकारकबोधहानेः। तत्ररक्तत्वविशिष्टदंडत्वविशिष्टप्र राम
निष्ठ २६

कारताव्याप्यवृत्तिरेकारकत्ववैशिष्ट्यादिकं च वैज्ञानिकं तेन रक्तत्ववद्भिमानितया दोनविशिष्टवैशिष्ट्यबोधा
संभवः। अन्याचाव्यासज्यवृत्तिः रक्तत्वादिधर्मावच्छिन्नप्रकारतातामादायतत्र रक्तत्वादिप्रकारकव्यवहार
ः। न च रक्तत्वविशिष्टदंडत्वविशिष्टप्रकारकज्ञानत्वावच्छिन्नंप्रतिदंडत्वविशिष्टांशे रक्तत्वाभावाप्रकारकरक्त
त्वप्रकारकज्ञानत्वेनकारणतावच्छेदकं तेन दंडत्वं [redacted] ~~सिद्धेदंडत्वाभावाप्रकारकत्वा~~ रक्तो दंडो रक्त इति ज्ञान नवा ४
स्यासंग्रहः। न वा दंड्यरक्तो दंडः प्रमेय इति ज्ञानस्यासंग्रहः। एवं दंड्यरक्तवानिति बोधेपि रक्तत्वविशि
व ष्टेदंडत्वाभावाप्रकारकं रक्तत्वविशिष्टावच्छिन्ने दंडत्वप्रकारकत्ववज्ज्ञानत्वेन हेतुतेति। यथ्यानुभवमूलत्व
मतस्य विशिष्टद्वयज्ञानमेव विशिष्टवैशिष्ट्यमानं तत्त्वं च न कार्य्यतावच्छेदकं। अत्र समाजग्रस्तत्वात् इ
ति मिश्रमतमपास्तं। रक्तो दंड इति निश्चयात्तु विशिष्टज्ञानविशेषस्यानुभवसिद्धतया उपरक्तवत्त्वादिति। एवम
पि नुमितावपि पर्वतत्वादिविशिष्टविशेषककव्याप्यप्रकारकनिश्चयत्वेन हेतुत्वमिति। न च व्याप्यविशिष्टपर्वतत्व

म.वा विशिष्टवैशिष्ट्यबोधेऽतिव्याप्तिरेवंपर्वतोवह्निव्याप्यवान्नवेतिसंशयेवह्निव्याप्यवान्पर्वतोऽयमितिज्ञानानुदया
२७ देकविशिष्टेऽप्रवैशिष्ट्यबोधइत्यतिव्याप्तिरिष्टापत्त्या।हृदंवानित्यादौतुहृदत्वविशिष्टवैशिष्ट्यबोधेहृदत्वप्रकारक
27 धीत्वेनहेतुत्वात्तद्धर्मितावच्छेदकामिश्रितस्यसंशयस्याप्रसिद्धानिश्चयत्वस्याप्रवेशान्तरक्तौदंडोनवेतिसं
शयानुत्पत्त्यवसायश्चनरक्तत्वविशिष्टदंडीयत्वावगाही।।किंतुरक्तोऽयंरक्तत्वाभावप्रकारकदंडधर्मिकज्ञान
वत्तावगाहीविशेष्येविशेषणमितिरीत्यावारक्तोदंडज्ञानवत्तावगाहीतिनतत्रव्यभिचारः।विशिष्टविषयो
प्रधानेनेति।तृतीयाप्रकारेघटमिच्छामीत्यादौघटत्वविशिष्टविषयेस्वरूपसेवतदुपधानंछादोप्रकार स्व
त्वादिति।इतियोगित्वाभाववत्त्ववद्विषयित्वप्रकारित्वादेरनुपस्थितस्यैवप्रकारत्वाभ्युपगमान्तथाचविषयि
तायांनिरूपितत्वसंबंधेनघटत्वविशिष्टवैशिष्ट्यावगाहितादृशेच्छादिसाक्षात्कारेव्यभिचारान्नज्ञान
त्वेनाहप्रकारतातावच्छेदकमितिभावः।विनश्यदवस्थज्ञानादिच्छाद्वेषयोः साक्षात्कारे[illegible]तिवाच्य राम
२७

संभवति। विनश्यदवस्थज्ञानजनिततयोरिच्छाद्वेषयोश्च साक्षात्कारो नाभ्युपेयत इत्युक्तेश्चाह। कृते सैति। साक्षा
त्कारोत्र कृतित्वांशे निर्विकल्पकरूपः कृत्यंशे सविकल्पकस्य विषयांशे सविकल्पकस्यैव कृतित्वांशे निर्वि
कल्पकस्यापि तत एव संभवादिति। न च कृतिसाक्षात्कारात्पूर्वं प्रत्यासत्त्यर्थं विषयस्मृतेरावश्यकत्वे कथं व्यभि ग
चार इति वाच्यं। सविषयप्रकारकत्वेनैव संस्कारादिसाधारणोपस्थापसत्तित्वादिति। न तु तत्र द्विशिष्टबुद्धौ तत्र द्वि न
शेषणाधीनत्वेन हेतुत्वात्कृतिसाक्षात्कारपूर्वं विशेषणनिमित्तं विषयस्मृतेरावश्यकत्वे कथं व्यभिचार इत्य
तस्तत्रापि ज्ञानत्वेनापि हेतुत्वं दर्शयति। विशेषणविषयकादिति। इदं च विशिष्टज्ञानकारणतावच्छेदकप्रदर्श
नाय विशेषणविषयकत्वेनैव तत्र हेतुत्वात्। विशेषणविषयकसंस्कारेण न विशिष्टस्मृतिः समा
नविषयकत्वेनैव संस्कारस्मृत्योः कार्यकारणभावात् तत्तदुपदर्शनमाह। विशिष्टसंस्कारादिति। त
द्विषयकगुणानां। तादृशविशिष्टविषयकगुणानां च तादृशविशिष्टबोधे। अत्र च गुणानामिति स्वरू

भवानी पत्तिर्देशमात्रं विशेषणतावच्छेदकप्रकारकसंशयानुत्पत्तेन प्रकारितया विशेषणतावच्छेदकसंशयानुत्पत्तेन
२८ व्याहततेति ध्येयं । न च रक्तदंडांशे उद्बुद्धसंस्कारवतः पुरुषांशे लौकिकसंनिकर्षवतो रक्तो दंडवान्पुरुष इ
28 ति विशिष्टवैशिष्ट्यबोधापत्तिः । ज्ञानस्य स्वप्रत्यासत्तित्वेन रक्तो दंडो न वेति संशयदशायां तादृशोद्बुद्धसं
स्कारसत्त्वात्तादृशबोधापत्तिरेवं रक्तत्वदंडादौ लौकिकसंनिकर्षदशायामपीति वाच्यं । तत्र तत्तत्प्रत्य
व्यक्तिविशेषं प्रति तद्दुद्बोधकानामपि तत्त्वद्व्यक्तित्वेन हेतुत्वादन्यतमापि तत्र तत्र उद्बोधकव्यक्तिविशेषा
णां स्मृतिविशेषहेतुत्वस्यावश्यं कल्प्यत्वे संस्कारप्रयोज्यतादृशविशिष्टवैशिष्ट्यबोधपूर्वं स्मृतिव्यक्तिविशे
षकल्पनायामेव गौरवपराहतत्वात् । न च यत्र पुरुषसंनिकर्षदशायां नोद्बोधकसमवधानं किंतु तदभावद ५
शायां उद्बोधकसमवधाने न स्मृतिस्तत्र तादृशोद्बोधकस्य प्रत्यक्षव्यक्तिं प्रत्यपि हेतुत्वकल्पने गौरवं । अ
कल्पने पुरुषसंनिकर्षदशायां रक्तदंडगोचरोद्बुद्धसंस्कारसत्त्वात्तादृशप्रत्यक्षापत्तिरिति वाच्यं । य राम
२८

त्रपुरुषसंन्निकर्षदशायामेवतादृशसंस्कारोद्बोधकसमवधानेनतादृशविशिष्टवै॰ शिष्ट्यप्रत्यक्षं जनि
ते तत्र तादृशसंन्निकर्षाभावकाले स्मृतिवारणाय तादृशोद्बोधकव्यक्तेः स्मृतिहेतुत्वकल्पनायाभवता
मपि तत्कल्प्यत्वादिति। अत एव तत्त्वा संस्कार एव प्रत्यभिज्ञायां हेतुरिति प्राचीनाः४। मणिकारमते तु प्रतिबंध
काभावे सति चोद्बुद्धसंस्कारेऽवश्यं स्मृतिरिति तत्र स्मृतिरेव प्रत्यभिज्ञादिहेतुरिति। ननु अनुमितावपि ज्ञा
नत्वस्य हेतुतावच्छेदकेऽप्रवेशादत आह। इच्छादितद्वतीति। नन्विच्छादितोऽनुमितिरुत्पद्यत एव स्वरागाद्य
यातनभावेनानुमितिभाएवं स्यानिरीतित्वमशक्यत्वादत आह। संस्कारादीति। अत्र च स्थूलकालीनगर्भादे।
रानुमित्यभाव४ सुनिद्रित इति भाव४। ननु तथापि अनुमितौ ज्ञानत्वेनैव कथं हेतुत्वं। संस्काराद्यन्यत्वेना
पि हेतुत्वस्य वक्तुं शक्यत्वादत आह। संस्काराद्यन्यत्वस्येति। तत्र अनुमितौ ज्ञानत्वेनैव तादृशानिष्प्रयत्व
घटकतयाविषयत्वेनेति। अत्र इदं परामीत्यनुव्यवसायसाक्षिको लौकिकत्वनियामको विषयतावि
रि

विषयताविशेषस्यावच्छेदकत्वे ... साक्षात्कारत्वावच्छिन्नविषयतानिरूपकत्वविषयताया ।

म.वा. शेषण एव कार्यताकारणतयोरवच्छेदकत्वसंभवात् तदहं मिश्रैर्हनमित्यादेरिन्द्रियसंनिकर्षजन्यं पश्यामीति धीः। अत एव कु
२८ सुमाञ्जलिप्रकाशे साक्षात्कारत्वावच्छिन्नविषयताघटितमेव लौकिकप्रत्यक्षलक्षणमुक्तं। वर्धमानोपा
29 ध्यायैः तच्च तादृशविषयतया प्रत्यक्षत्वं। कारणतावच्छेदकं तेन परामर्शादिसाधारणं तादृशप्रत्यक्षस्य
च तादृशविषयतमात्रेण वत्प्रत्यक्षत्वं कार्यतावच्छेदकं तेन विषयजन्यसविशेषोपनीतभानव्यावृत्तिः। न च स रत्ना एवा
विशेषोपनीतभानासिद्धिः सर्वज्ञात्मप्रत्यक्षसामग्रीसत्त्वादिति वाच्यं कामिनीजिज्ञासादिवशा
दात्माद्यविषयकत्वस्य संभवात्। तादृशप्रत्यक्षस्य च तादृशविषयतासंबंधेन कार्यता तादृशविष
यस्य च तादात्म्येन हेतुतेत्यतो न व्यभिचारः। तत्प्रत्यक्षे तद्विषयकप्रत्यक्षेऽवश्याभ्युपेयविशेषका
र्यकारणभावेनैवातिप्रसंगभंगे ज्ञानप्रत्यक्षे ज्ञानत्वादिना हेतुत्वकल्पनमेव प्रामाणिकमित्या
शयेनाह। कदाचिदिति। तन्नदितरत्वादिरिति द्वंद्वात्परं श्रूयमाणः त्वप्रत्ययः प्रत्येकान्वयीति रा.म.
२८

तेन तत्त्वेन तदितरत्वादिरित्यर्थः।

तद्विषयकत्वेन प्रकारकत्वसंशयकत्व (?) ननु [illegible]

श्च तत्स्मृतिका पीता· तथाच व्याप्तिप्रकारक पक्षधर्मता विषयक संशयान्यज्ञानत्वेन तादृशातद्वि[illegible]षयक प्रत्यक्षत्वेन न १

ननु तत्त्वं इतरत्वादिना विषयकारणता। तद्विषयकत्वेन तत्तत्वं तत्तत्कार्मादिधर्मवद्विषयकत्वेन कार्यकार
णाभाव इति भावः। परामर्शत्वघटकदलं च विषयस्य सामान्यप्रदर्शनाय: चैत्रावलोकितेत्यादि च हेत्वसं
बन्धेतरघटतद्विषयकत्वादिनेत्यत्रापि दृष्टान्तपरत्वपक्षत्वं यस्य घटेनापि संबंधः। ननु प्रामाणिक
तया गौरवं न दोषायेत्यत आह। मानाभावादिति। ननु तादृशकार्यस्यान्यथानुपपत्तिरेव मानम
त आह। अन्यथोपपत्तेश्चेति। विशिष्टस्मरणादित्यव्याप्तिप्रकारकपक्षधर्मतास्मरणादित्यर्थः। यथ
यथा ग्रामोऽयं पक्षज्ञानास्यैकदितेनापि स्मृति जननानन्तरं नास्यैकदिनत्वेन स्मृतिजनकतावच्छेदकपरा
मर्शस्यानुमितिजनकतायां तु जनकतावच्छेदकमेवेति नातिव्याप्तिः संभावनात्तथापि तन्न ज्ञानीया
प्रामाण्यज्ञानाभावस्य सर्वत्र निश्चयकारणतावच्छेदकत्वे विनिगमनाविरहे सास्वातं ओणा
हेतुत्वस्य योगोचितत्वमित्याशयात् प्रामाण्यप्रमत्वं प्रामाण्यभावो वर्णनचैवमेकास्मिन्नुमाने

म वाइ

भवा 30 सतिप्रतिबंधकाऽसत्वात्तदनास्कंदितत्वेज्ञानांतरादपि नानुमितिः स्यात् इष्टत्वादत एवाशामारोप
ज्ञानानामननुगमेऽपि नक्षतिः। यादृशाशामारोपज्ञानसत्वे परामर्शसत्वे नानुमितिः। तादृशज्ञाना
भावकूटस्यैव हेतुत्वात्। अन्यथा तत्तद्रूपीयाशामारोपज्ञानविषयपरामर्शादिनां हेतुत्वे तत्तत्का
र्यकारणभावकल्पनायां तात् प्रमेयज्ञानमप्रमेत्याशामारोपधीसत्वेऽनुमित्यनुदयप्रसंगाच्च।
यत्र विषयविशेषपरामर्शेऽशामारोपज्ञानाभावः। तदभिप्रायेणोक्तमित्यपि कश्चित्। यदि ग्रेपेज्ञात्वं
चेदेकं निर्वक्तुं शक्यते तदा तद्व्यक्तित्वेन हेतुत्वं एवं त्तैर्युज्यत इत्यतस्तदेव दूषयति। उपेज्ञात्वमिति।
मा ज्ञातिसंकरेति। जगन्नादि चाक्षुषेषु पेज्ञात्वं विहाय वाक्षुषत्वं विहायोपेज्ञात्वत्वाद्यादौ वर्त्तमान ग्रे
मेकं न वाक्षुषोपेज्ञाज्ञाने संकीर्णमित्यर्थः। ननु चाक्षुषत्वादिव्याप्यनानैवोपेज्ञात्वं तावदेवकूट
ःकारणतावच्छेदकोऽतो न दोष इत्यत आह। व्यांशिकत्वेति। एकमेव ज्ञाने किंचिदंशोपेज्ञा राम 30

त्मकं किंचिदंशेऽनुपेक्षात्मकं चानुभूयते उपेक्षात्वं सजातीयत्वेन तन्नाश्यानुज्ञातेरनौशिकत्वादिति भावः॥ उद्बु
द्धजनकस्यापि जिज्ञासितविषयस्यानुपेक्षात्वादाह जिज्ञासितेति। तद्विषयकजिज्ञासाजनकज्ञानत्व
मित्यर्थः। तेन कालांतरे जिज्ञासितविषयस्यापि ज्ञानस्य नोपेक्षात्वक्षतिः। तादृशात् तद्रूपावच्छिन्नात् संस्का
रजनकत्वं उपेक्षात्वं इति शेषः॥ तज्जनकतावच्छेदकेति। तज्जनकतावच्छेदकाग्रहे जनकताग्रह एवासं
भवी जनकतावच्छेदकांतरेणैवोपेक्षात्वे स्यादिति भावः॥ न नूपेक्षान्यत्वेनैव तद्ग्रह इत्यत आह। अन्योन्याश्र
दि यादिति। उपेक्षाज्ञाने उपेक्षान्यत्वेन संस्कारजनकत्वज्ञाने संस्कारजनकत्वे च ज्ञाते तदन्यत्वरूपमुपेक्षा
त्मकत्वं ज्ञातव्यमित्यन्योन्याश्रय इत्यर्थः। रूपांतरापरिचयादिति पाठे। अन्योन्याश्रयादित्यत्र हेतुः। रूपांत
रेणोपेक्षान्यत्वादेरिति शेषः। ननु घटप्रकारकेतद्घटविषयकज्ञानस्य तादृशसंस्कारं प्रति न तद्व्यक्तित्वेन
जनकतां गृहीत्वा तादृशसंस्कारजनकतावच्छेदकरूपवत्त्वमुपेक्षात्वं तद्ग्रहमेव चात एवानौशिकत्व

भवा ३१ न्मृतिः।एतद्घटांशेउपेक्षात्मकस्यापिज्ञानस्यपरंपरयाघटांतरेवाऽपेक्षात्वसंभवात्‌·नचघटत्वप्रकारकैतद्घ

टविशेष्यकत्वंसंस्कारत्वावच्छिन्नंप्रतितत्तद्व्यक्तित्वेनप्रतिबंधकत्वंकल्प्यंतथासतिउपेक्षाज्ञानेविद्यमा

नेऽपेक्षात्मकज्ञानान्तरादपितादृशसंस्कारानुत्पत्त्यापत्तेः।तथाचघटत्वप्रकारकएतद्घटविषयकस्मृतिं

31 प्रतिघटत्वप्रकारकैतद्घटविषयकसंस्कारजनकतावच्छेदकरूपावच्छिन्नत्वेनजनकत्वेनकोपिदोषइत्यतआ

ह।संस्कारानुत्पत्त्यैवेति।अस्मरणसंभवेउपेक्षणीयास्मरणसंभवेतदप्रवेशादुपेक्षान्यत्वाप्रवेशात्‌·न

चस्मृतिंप्रत्येवतत्त्वेनहेतुत्वमस्तु।संस्कारंप्रतितुसामान्यरूपेणैवतद्धेतुत्वमितिवाच्यं।तथासतिउपेक्षास्थ

लेसंस्कारव्युत्पत्तेस्तन्नाशकस्यचकल्पनागौरवात्‌·नचैवंलघुन्यायेनयासंस्कारानुत्पत्त्यैवसमञ्जस्यात्स्मृत्य

नुत्पत्तिसंभवेस्मृतिजनकतायामपिनिवेशपदप्रवेशइतिवाच्यं।अत्यन्ताजनकत्वाद्घटितरूपेसंभवतिन

स्यावारणरूपेणकारणतायाअन्याय्यत्वात्‌·अन्यथाज्ञानत्वेनैवहेतुतास्तुसंस्काराभावादेवस्मृ राम ३१

विषयत्वावच्छेदः। ज्ञानविषयकस्मृत्यभावः।।१

स्मृतिजनकतासंबिंधघाति देरोइत्यक्षसंकेन न स नधी स्मा... इत्याद्यपि निवव छेस्वाहृत्व घटत घटत्वाभावे

त्यभावइत्यस्यापिसत्त्वप्रसक्तात्।तन्नैवंतत्स्वन्यायेनउपेक्षात्मत्वस्यापिप्रवेशइतिवाच्यं।उपेक्षात्वस्यता
वच्छेदककूटरूपस्यसर्वस्यापरिच्छेद्यतयातदन्यत्वस्यदुर्ज्ञेयत्वात्तथाचइदंत्वावच्छेदेनघटत्वप्रकारकसंस्का
रेस्मृतिजनिंचप्रतिइदंत्वावच्छेदेनविरोधसंबंधेनघटत्वाभावप्रकारकेदंत्वावच्छिन्नघटत्वप्रकारकज्ञान
त्वरूपनिश्चयत्वंजनकतावच्छेदकमेवंचअयंघटोनवाअयंघटइतिसमूहालंबनस्यायंघटोघट
त्वाभाववांश्चेतिसमुच्चयस्यापिसंग्रहः।संशयस्थलेतत्करूपजनकतावच्छेदकाभावात्तादृशसंस्कारस्य
स्मृतेश्चानुत्पादइतियत्रस्मृतिस्तत्रैवोक्तरूपेणहेतुतासंस्कारंप्रतितुइदंत्वावच्छेदेनघटत्वप्रकार
कधीत्वेनैवहेतुताअन्यथाअयंघटोनवेतिसंशयानंतरंकेवलधर्मिस्मरणानुपपत्तिः।तथाचसंश
यस्थलेइदंत्वावच्छेदेनघटत्वप्रकारकसंस्कारसत्त्वात्तथास्मृतिवारणायतज्जनकतायांनिश्चय
त्वंनिवेश्यमितिइतितन्नधर्मिस्मरणान्यथानुपपत्त्याधर्मितावच्छेदकप्रकारेणैवधर्मिविषयत्वेसंस्कार

घटत्वाद्यप्रकारकस्मृतौ धर्मितावच्छेदकप्रकारकधर्मिज्ञानस्य तत्तद्प्रकारकस्मरणस्य हेतुता

संस्कारजनकज्ञानस्य तदुल्लेखो वा हेतुत्वमिति नियमः शुभ गते॥

भवा
३२

स्य धर्मितावच्छेदकावच्छेदेन घटत्वप्रकारकत्वकल्पने मानाभावात्। अन्यथा संस्कारस्य वा निश्चयत्वेन
हेतुतास्तु। स्मृतौ च ज्ञानत्वेनापेक्षा किं न स्यात्। शुद्धधर्मितावच्छेदकप्रकारकसंस्कारं प्रति शुद्धधर्मिता
वच्छेदकप्रकारकज्ञानत्वेनैव पृथग्हेतुतायाः सर्वसम्मतत्वेनैव धर्मिस्मरणोपपादनात्। न चैवमयं
घटो न वेति संशयोत्तरं घटत्वप्रकारकेणोद्धटविषयशयात् केवलधर्मिण इव केवलघटस्यापि स्मरणा
पत्तिस्तत्रापि धर्मितावच्छेदकाभिन्नत्वघट इत्येवमाकारकघटत्वप्रकारकज्ञानानुरोधेन घटत्वप्रकार
कज्ञानत्वेन सप्रकारकजन्यज्ञानत्वेन पृथगेव हेतुताया अवश्यं वाच्यत्वादिति वाच्यं। इष्टत्वाद्यदपि
संस्कारस्यापूर्वस्येव सविषयत्वे मानाभावः स्मृतित्वेन संस्कारत्वेनैव कार्यकारणभावः संस्कारत्वा
वच्छिन्नं प्रति ज्ञानत्वेन सप्रकारकजन्यज्ञानत्वेनैव हेतुत्वात् तदपेक्षा व्याहन्तये न तत्तद्व्यक्तित्वेन हेतुत्वस्या
भ्युपगमेऽप्यादरणीयत्वाच्च। नातिप्रसंगः॥ इदंत्वावच्छेदेन घटत्वप्रकारकस्मृतिं प्रति इदंत्वावच्छेदे राम

घ॰ता॰मा॰ न्या॰ सार सं॰ ११

न घटत्वाभावाप्रकारकेदंत्वावच्छिन्नघटत्वप्रकारकत्वं ज्ञानत्वेन संस्कारकस्मृतिप्रतिबध्यद्वाराहेतु
त्वाच्चनातिप्रसंगः॥ व्यापारव्यापारिणोरेकमेवजन्यतावच्छेदकमित्यत्रमानाभावात्· केवलघटत्वा
दिप्रकारकस्मृतिप्रतिघटत्वप्रकारकधीत्वेनहेतुत्वान्नतत्रनिश्चयत्वस्यापिनिवेशइत्यस्मयेसि
द्धमेव नचज्ञानत्वेनस्मृतित्वेनैवकार्यकारणभावेऽस्तु। संस्कारस्येदंत्वावच्छेदेनेत्यक्तरूपेणहेतुत्वाच्च
न नातिप्रसंगइत्येवकिंस्यादितिवाच्यं। संस्कारस्यसविषयकत्वादिसिद्धेः ज्ञानसविषयकत्वस्यानुव्य
वसायेनैवग्रहादिति। तन्नघटपटसमूहालंबनस्यपटांशोपेक्षात्मकस्यघटांशेऽपेक्षात्मकस्यस्वजन्य
संस्कारसंबंधेनसत्वात्· पटस्मरणापत्तेः। नचतदुद्बोधकाभावादस्मरणंयस्यघटपटसंस्कारानंतरंपट
सदृशविलक्षणवस्तुज्ञानानंतरमेवावश्यंपटस्मृतिस्तत्रतदुरूपीयपटस्मृतिंप्रतितादृशवस्तु।
ज्ञानत्वेनहेतुत्वेउद्बोधकाभावस्यासंभवात् एवमेकास्मिन्घटेघटत्वद्रव्यत्वोभयप्रकारकज्ञानात्

अनुगतोद्बोधकस्पत्वेऽद्बोधकाभावासंभवइत्यादपस्येति

भवा ३३ घटत्वांशेऽपेक्षात्मकात्तद्व्यक्त्वांशेऽपेक्षात्मकाद्व्यक्त्वप्रकारकस्मृत्यापत्तेर्वारणाय संस्कारस्य समप्रका
रकताकल्पनीयेति। एवं चोक्तस्थलेऽतिप्रसंगवारणाय संस्कारस्य तत्तत्प्रकारकतत्तद्विशेष्यादिघटित
६३ रूपेणाजनकत्वस्यावश्यकत्वे ज्ञानस्य ज्ञानत्वेन स्मृतित्वेनैव कार्यकारणभावः। एतत्कल्पे तद्
विशेषरूपेणापि प्रयोजनाभावादिति तद्युक्तः पंथाः। तथात्वं स्मृतिजनकत्वं सद्धदिति। असत्कुहृ
मेवं चैकसंस्कारनाशेऽपि एतत्संस्कारान्तरसंभवतीति भावः। ननु संस्कारस्य फलनाश्यत्वेन प्रथमस्मरणे
नैव समूहालंबनसंस्कारस्य नाशादुत्तरेतद्विषयांतरस्मरणानुपपत्तिरत आह। समानाकारस्येति। घटत्व
प्रकारकसंस्कारं प्रति घटत्वप्रकारकस्मृतित्वेन पटत्वप्रकारकसंस्कारं प्रति पटत्वप्रकारकस्मृति
कत्व त्वेन नाशकल्पनात् घटत्वप्रकारकस्मृतिसत्वेऽपि पटत्वप्रकारकस्मृत्यभावात्तदुभयप्रकारकसंस्का
रस्यानाश इत्यर्थः। अत्र च स्मृतिजन्यसंस्कारस्य क्षणिकत्वापत्तिवारणाय तत्तत्स्मृतिजनकत्वं तत्तत्स्मृ राम ३३

तिनाशपत्रायां प्रत्यासत्तिरिति ध्येयं। समूहालंबनादीत्यादिना एकधर्मि[illegible]विशेष्यकानेकप्रकारकज्ञानसं
ग्रहः। ननु यत्र क्रमिकमेव स्मरणं न तु समूहालंबनात्मकं तत्र तादृशसंस्कारस्यानाशापत्त्या कारणान्तरा
२ देव नाशकत्वं कल्प्यं। तथा च फलनाशपक्षे कैत्वे व्यभिचारः। तत्तद्व्यक्तित्वेन नाशकत्वकल्पने च स
हृदनुभूतस्थलेपि चरममफलमेव नाशकमस्तु। वस्तुतस्तु कालादेरेव तत्तद्व्यक्तित्वेन नाशकमन
न्यगतिकत्वात्. स्मृतौ तु संस्कारनाशकतावच्छेदकत्वेनैकजातिरेव चरमफलमात्रवृत्तिः स्मृतित्वव्या
प्याकल्प्यते तथा च उपधायकतासंबंधेन विजातीयस्मृतिविशिष्टसंस्कारनाशं प्रति विजातीयस्मृति
त्वेन हेतुता विजातीयस्मृतिजन्यसंस्कारस्य कालांतरे विजातीयस्मृत्युपधायकस्यापि [illegible]न्नाशा
कतानदानीं तस्य तदुपधायकत्वाभावेन तद्विशिष्टत्वाभावात् अत एवात्र नाश्यतायां स्मृतिजनक
त्वमपि न प्रत्यासत्तिरुक्तस्यैवानतिप्रसक्तत्वादित्याह। जायते चेति अस्ति हि रु[illegible]इति स्मरणादिनाकार्ये

श्रीनगुणमताद्दव संके०५

भवा णानुमितोद्बुद्धत्वनामासंस्कारवृत्तिर्जातिविशेषः। तदवच्छिन्ने चान्वयव्यतिरेकाभ्यां पुनःपुनःस्मर
३५ णामेवकारणं। तत्र पूर्वपूर्वस्मरणसंस्कारद्वाराइतरेत्वास्मात्सादेवातएव भावनायाः पटुतरभावनाज
भा नकत्वमेनिरेष्यक्तातः। नचकस्यचित स्मृतिद्वयेनकस्यचित्स्मृतित्रयेणदृढतरसंस्कारइत्यननुगमः। तत्तु त
रूपीयतादृशसंस्कारंप्रतितत्तत्स्मृतीनामपितत्त्वेनहेतुत्वकल्पनादितिस्मृतित्वनिष्ठोजातिविशेषएवतादृशसं
स्कारजनकतावच्छेदकइत्यपिकश्चित्तन्नैकस्यैवसंस्कारस्यपुनःपुनःस्मृतिजननानंतरंझटित्युद्बो
धसमवधानमेवदार्ढ्यंतावतैवद्रुतिस्मरणादिसंभवात्तादृशजातौमानाभावइत्यतआह
प्रतिपज्ज्येति। अनुभवंविनापिस्मृतितः संस्कारसंभावनयाऽनुभवत्वेः। संदिग्धव्यभिचारकेज्ञानंविनासंस्का
रसंभावनाविरहात्तज्ज्ञानत्वंनिश्चिताव्यभिचारकमितिव्यभिचारज्ञानरूपप्रतिबंधकाभावात्तदवच्छेदेनैवहेत
तानिश्चयइतिभावः। इदमेवनिश्चितव्यभिचारकत्वमेवहेतुतावच्छेदकत्वंभितिकार्य्यतावच्छेदकंतुविशेष राम
३५

कं मालाक्ष्यस्ता कुं ८
दामलाताड कागिका

रूपमेवनिश्चिताव्यभिचारत्वाद्संदिग्धव्यभिचारकंसामान्यरूपंअतएवविशेषणाधीनत्वतावच्छेदकंविशिष्टा
नुभवत्वमित्युपाध्यायाः। नचापसिद्धान्तइत्याह। अभिहितंचेति। तत्रपूर्वपूर्ववर्णस्मृतिसहितान्त्यवर्णानु ल
भवएवपदप्रत्यक्षहेतुरस्तित्यादेषे। स्मृतीनामित्यादि। समाधानफक्किकास्वकार्य्यीय॰संस्कारस्तात्क
तोयोविरोधः। विनाशस्तद्धतीनामित्यर्थः। अनुभवपरत्वादिति। केचित्तुयत्रैकस्मिन्नेवघटेऽयंघटइति
प्रत्यक्षानन्तरंदिवसादिविलम्बेनायंघटत्वानुमित्यादिकमुत्पन्नंतत्रतादृशसंस्कारंस्मृतिंचप्रतिनि इ
७५ श्चयत्वेनहेतुत्वविवक्षणेपितादृशनिश्चयजनितसंस्कारद्वयसत्वात्·संशयात्मकस्मृत्यापत्तिरत
स्तथाविधस्मृतिवारणायइदंत्वावच्छेदेनघटत्वप्रकारकस्मृतिंप्रतिइदंत्वावच्छेदेनघटत्वाभावप्र
कारकस्मृतिसामग्य्राएवंतादृशघटत्वाभावप्रकारकस्मृतिंप्रतितादृशघटत्वप्रकारकस्मृतिसामग्य्राः प्र
तिबंधकत्वमवश्यंवाच्यं। तथाचस्मृतिजनकतायांसंस्कारजनकतायांचनिश्चयत्वाप्रवेशोपिनक्षतिः।

र का त्वं तान नकेति नैवेद्य उभयानि अयत्र विधिपूगवरपक त्वंभासचनम

सिद्धिकालीनपरामर्शस्यानुमितिजनकत्वेऽपि ... तदनकत्वंस्य ... तरं च ... परामर्शविशेषणज्ञान ... अनुमितिजनकत्वेऽपि न दूषितम्

35

भवा· न च तत्रानुमित्यादिना पूर्वसंस्कारो नाश्यते। अनुमित्यादेस्तादृशप्रत्यक्षाविरोधित्वेन तज्जनितसंस्कारानां

३५ त शकत्वादिति भावः। साक्षाज्जन्यत्वं· व्यवहितप्राक्कालवृत्तित्वप्रत्यासत्त्या तादृशपरामर्शजन्यत्वं तेनानुमि

का०श०· आदिकालीनेन तद्विशेषणाज्ञानेन तत्परामर्शजन्येन वह्न्यन्तरे वह्नित्वादिप्रत्यक्षेणाजनितायामनुमितौ म

नाव्याप्तिरेकस्या अपि स्मृतेः स्वाव्यवहितप्राक्कालवृत्तिपरामर्शजन्यत्वसम्भवेऽपि तत्र संस्कार एव प्रत्या

सत्तिर्न तु तादृशप्राक्कालवृत्तित्वमिति नातिप्रसङ्गः। अत्रानुभवत्वोपन्यासगौरवमेवास्वरसः। प्रका

रान्तरेणापि स्मरणात्व्याप्तिवारणं दर्शयति। किञ्चेति। तदुभयवैशिष्ट्येति व्याप्तिप्रकारेण धूमे पर्वतेन निरू

पः पिताधेयतया पर्वतत्वरूपेण व्याख्यातनिरूपितपर्वताधारतायाबाधावगाहित्वाच्च· तेन प्रमेयमितिज्ञानस्य व्या

प्ये पर्वते तदुत्पादे स्ववारणाय आधारत्वाधेयत्वयोः समानसंवित्संवेद्यत्वाददोषः· व्याप्तिप्रकारेण धूमे पर्वता

धेयत्वावगाहित्वस्य पर्वतत्वरूपेण पर्वते वह्निव्याप्याधारत्वावगाहित्वस्य चानपेक्षत्वमेव हेतुतावच्छे राम

पर्वते २

द्रकं लक्षणघटकमपीति अन्यथा असंभवापातात् तादृशवैशिष्ट्यावगाहित्वावच्छिन्नहेतुत्वमे
व। ननु स्मृतावप्युक्तरूपेण कुतो न हेतुता। अत आह। एकतरेति। पर्वतो वह्निव्याप्य इति ज्ञानात् पर्वतो वह्निव्या
प्यवानिति स्मरणाभावादित्यर्थः। अन्यथाऽनुमिताविव स्मृतावप्युभयवैशिष्ट्यावगाहित्वेनैव हेतुत्वे
ता ऽनियमेन विशेष्यनियामककार्यकारणभावरूपनियमविरहेण एकविशेष्यकस्मृतिसामग्र्या एवा
न्यविशेष्यकस्मृतिसामग्रीत्वात् नियमेन नियमतः उभयविशेष्यकतापत्तेरित्यर्थः। ननु तत्प्रकारकतत् ति
द्विशेष्यकस्मृतिं प्रति तत्प्रकारकतद्विशेष्यकधीत्वेन हेतुत्वे। अत एव स्मृतेर्नोभयविशेष्यकत्वं एवमुभयवै
शिष्ट्यावगाहित्वेनापि सामान्यतो न हेतुता यद्विशेषयोरित्यादि यावदंत आह। समानप्रकारकत्वेनेति। तथा च तत्
द्विशेषसामान्ये हेतुतायां च यद्विशेषयोरिति व्याप्तिस्मरितार्थत्वान्न तत्र व्याप्तिबलाद् उभयवैशिष्ट्यावगाहित्वेनैव हे
तुत्वमिति भावः। अंके चिह्न एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मृतिस्वीकारे समानप्रकारकत्वेन ज्ञा

हो न

तादृशविषयसंगेतत्पते इत्यादि।

भ वा ३६ नस्मरणायो॰ कार्य्यकारणभावभंगाघसंगइत्याशयेनाह समानप्रकारकत्वेनैवेति व्याचक्षुः। तत्र स्मृतोपि विशिष्टैव
तत्प्रकारकतद्विशेष्यत्वादिनैवा एवकारव्यवच्छेद्यमाह। नेत्थंरूपेणेति। तदुभयवैशिष्ट्यावगाहित्वेनेत्यर्थः॥ ए
तदुभयवैशिष्ट्यावगाहित्वेन हेतुत्वविवक्षणे च विशिष्टवैशिष्ट्यबोधादावित्यादिना तादृशपरार्थोपस्थि
तिजन्यशाब्दबोधपरिग्रहः। देवदत्तामतेचेत्यनेन पूर्वोक्तास्वरसः सूचितः। नितरामिति नातिव्याप्तिशंका
पीत्यनेनान्वयः॥ तत्र हेतुमाह। तथैवेति। तादृशरूपावच्छिन्नहेतुत्वस्यैवेत्यर्थः॥ पर्वतो वह्निव्याप्य इत्यनु
वस्य पर्वतो वह्निव्याप्यवानिति स्मृतेः समानविषयत्वसत्त्वान्नितरामुत्पत्तिसंभावनया अतिव्याप्तिशंका
कदाचित्स्यात्तद्व्यभावव्यापकाभावप्रतियोगि धूमवान् पर्वत इत्यनुभवस्य वह्निव्याप्यवान् पर्वत इति स्मृ
तिभिन्नविषयकतया ततस्तदुत्पत्तेरत्यन्तासंभवितत्वेन स्मृतौ तेन रूपेणाहेतुत्वस्यासंभवादतिव्याप्तिशं
कास्पदमपि नेति भावः॥ अत एवेत्थंरूपेणाहेतुत्वस्य लक्षणे निवेशादेव व्याप्यवत्पक्षादीत्यादिना राम ३६

धूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदक [illegible] धूमवान् पर्वत इत्यादिशाब्दबोधस्य [illegible] दर्शितः।

तत्कृते विशिष्टवैशिष्ट्य विषयता या ... ४ ... प्रतियोगितावच्छेदक

पक्ष विशिष्टव्याप्यस्यापरिग्रहात् व्याप्यविशेष्यकपरामर्षस्य हेतुतावादिनये पर्वते वह्निव्याप्य इति ज्ञाने ते
नैव हेतुत्वादिति भावः॥ येषां मते विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकनि
श्चयत्वेन न हेतुत्वं तन्मते यथाभावप्रत्यक्षे प्रतियोगितावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वं वाच्यं। तथा
च तदादाय तादृशाभावप्रत्यक्षेऽतिव्याप्तिः स्यात् सापि प्रकृतविवक्षया न संभवतीति भावः॥ हेतुत्वेपी
त्यपि कारोऽस्वरससूचनाय तद्बीजं तु प्रतियोगिधियो जन्यतायां नाभावप्रत्यक्षत्वमवच्छेदकं इदं त्वादिनात
त्प्रत्यक्षे व्यभिचारात्॥ नापि प्रतियोगितासंबंधेन सप्रकारकाभावप्रत्यक्षत्वं तथा परमभावत्वे न घटाभावप्रत्यक्षे घ
टत्वप्रकारकधियो व्यभिचारात्॥ नापि घटत्वरूपेण प्रतियोगितासंबंधेन घटप्रकारकाभावप्रत्यक्षत्वं। तथा मा
नाभावात्॥ वस्तुतस्तु। प्रतियोगिज्ञानाभावदशायां तत्संत्वेपि वाभावत्वावच्छेदेन घटीयत्वासंसर्गाग्रहेण
न इत्याकारकप्रत्ययप्रसंगात्॥ तथा च तत्तदिंद्रियसंबंधविशेषणतया घटत्वविशिष्टवैशिष्ट्यावगाहित्य

... घटीयो ज्ञाना नास्तीत रूपाकारकाभावादेव न नेत्याकारकप्रत्ययप्रसंग इत्यत आह तत्तदिति ४

तादृशान्यतरत्वं गौरवादेव न जन्यतावच्छेदकमतो वह्निव्याप्यकान्यवतः पर्वते वह्निव्याप्य इति ज्ञानमतोः ४

भवा ३० भावत्वप्रकारकप्रत्यक्षत्वापत्तेर्विशिष्टवैशिष्ट्यावगाह्यभावत्वप्रकारकप्रत्यक्षादिकं इदंत्वेनाभावप्रत्यक्षोप लो
गमे च इदंत्वप्रकारकाभावप्रत्यक्षत्वे। नानैवकार्य्यतावच्छेदकं। अत एव विशेष्ये विशेषणमिति न्यायेनापि नाभा
वधीः अत एव च विशिष्टवैशिष्ट्यबोधसामान्यहेतोरेव तदुपपत्तौ न पृथक् कार्यकारणभावकल्पनाइति ध्येयं। न
न्वाधेयत्वाधारत्वयोः समानसंविसंवेद्यत्वमानाभावः प्रातिस्विकरूपेणैव हेतुत्वं वाच्यं। तथा चातिप्रसंगस्त
दवस्थैवेत्यत आह। व्याप्य विषयत्वेनेति। एतेन व्याप्यविषयकत्वविवक्षणेन जन्यविशिष्टज्ञानत्वावच्छिन्नं प्रति
विशेषणविषयो हेतुत्वव्यवस्थापतेऽवश्याभ्युपेयविशेषणज्ञानस्यैव विशेषणतावच्छेदकप्रकारकत्वसत्वान्नाव्य
विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रत्यपि विशेषणतावच्छेदकप्रकारकधियो हेतुत्वंव्यवस्थापितस्यादित्याशयेन तत
त्रैव व्यभिचारं वारयति। स्मृतिमित्यादिना। क्वचित्तः क्वचित्व्यापारतो वा जन्यविशिष्टज्ञानत्वावच्छिन्नं प्रति विशे
षणज्ञानस्याव्यवहितपूर्ववर्तित्वमित्यर्थः ४। विशेषणविषयो हेतुत्वस्येत्यादि षष्ठ्यंतत्वतृष्टयस्य कल्पनादित्यग्रे राम ३७

विशेषणतावच्छेदके त्वादि

ननु

ननेनान्वयधर्मसंबंधभेदेन व्यापकताभेदान्नैकत्वं। संस्कारस्य व्यापारत्वापि न संभवति संस्कारमजनयित्वापि
विशेषणज्ञानेन विशिष्टज्ञानजननादत आह। निर्विकल्पकात्म[illegible]कस्येति॥ तथा च सर्वत्रैव विशेषणधीपोसा ९
सौ द्रव्यत्वमिति भावः॥ ननु समानप्रकारकसमानविशेष्यकत्वेनैव स्मृतिं प्रति कारणत्वं। ज्ञानस्य [illegible]ऽपू कृते
र्वे निर्विकल्पकस्मृतिं प्रति कारणांतरस्य कार्यतावच्छेदकांतरस्य च कल्पने गौरवमपराहतं। न च घटत्वांशेऽन्य
प्रकारकघटत्वविषयकस्मृतिं प्रति तादृशघटत्वधीत्वेन संबंधविषयासमवायकस्मृतिं प्रति [illegible]दृशसमवाय विषय
विषयकधीत्वेन घटविषयकस्मृतिं प्रति घटधीत्वेन च कार्यकारणभावकल्पनात् घटत्वप्रकारकघटविशेष्य
कस्मृतित्वं न कार्यतावच्छेदकं मतो निर्विकल्पकात्मकस्मरणं नानुपपन्नमिति वाच्यं। एकस्य घटस्य घटत्वेन घ
टांतरस्य द्रव्यत्वेनैव ग्रहे घटांतरविशेष्यकघटत्वप्रकारकस्मरणापत्तेरत आह। अनुभवमिति। तथा च विशिष्टवै
शिष्ट्यानुभवत्वं तज्जन्यतावच्छेदकमिति न स्मृतौ व्यभिचार इति भावः॥ नस्याः विशेषणाविषयो नियमतो विष

अपेक्षाबुद्ध्या कृतीपदार्थेच्छाजनितास्यात्तत्रापेक्षाकृति वर्त्यैकत्वादिविकल्पे न तत्तत्त्वापदार्थे घटत्वापेक्षाबुद्धेः सत्त्वात् घटत्व

भवानं ३८

पक्षतेरिति। अपेक्षाबुद्ध्यात्मकज्ञानेन च इच्छादिकं न जन्यत इत्याशयः॥ साध्यादेरित्यादिना पक्षहेतुहेतुतावच्छे-
३४ दकसंबंधसाध्यतावच्छेदकसंबंधपरिग्रहः। दैवादिति। सत्यां वह्निव्याप्यानुमितीच्छायां वह्निव्याप्यधूमवान्वह्निव्या-
प्यवांश्च पर्वत इत्याकारकपरामर्शात् जातायाः पर्वतो वह्निव्याप्यवान्वह्निमांश्चेत्यनुमितावित्यर्थः। न स्यात्तद्व्याप्ति-
प प्रकारकपक्षधर्मताज्ञानस्य जन्यतायाः सत्त्वादिति। अपि अनुभवत्वव्याप्यत्वे तन्न्यूनवृत्तित्वं। तच्चानुभवनिष्ठभेदप्रतियो-
गितावच्छेदकत्वं। एवमनुभवत्वव्याप्यजातिमत्त्वविवक्षणे अनुभवत्वव्याप्यत्वप्रवेशापेक्षया लाघवार्थमाह। प-
र्वतो वह्नीति। प्रागुक्तयुक्त्या उभयवैशिष्ट्यावगाहित्वस्य कारणतानवच्छेदकत्वादाह। वह्निव्याप्यवान्पर्वत इति मू-
लीयो गिकांतद्वयं तत्तत्कार्यतायां विशेषणं। अवच्छेदकत्वे। अवच्छेदक[illegible]ता अप्यत्वेन त्ववच्छेदकत्वपर्याप्त्य-
श्र धिकरणत्वं अवच्छेदकताश्रयं तादृशविशिष्टशरीरघटकपदार्थस्तोमस्य वत्तथा च पर्वतविशेष्यकवह्निप्रकारका-
नुमितित्वस्यावच्छेदकत्वे वह्नित्वादेरपि तद्घटकतया तत्त्वापत्तिव्याप्तिर्ज्ञानत्ववृत्तिरिति ज्ञानत्वस्य भवेदित्यर्थः॥ राम

३८

मानाधिकरण्यमत्वेपिसा २

२ ज्ञानत्वमाहाय

आलोकादिलिंगकानुमितित्वाभ्यन्तस्य वह्निव्याप्यधूमवान् पर्वतइत्येतादृशपरामर्शाव्यवहितोत्तरतादृशवह्न्यनुमि
तित्वस्य कार्यतावच्छेदकत्वे तद्घटकज्ञानमात्रेऽतिव्याप्तेराह।। सामानाधिकरण्येनेति। ज्ञानत्वेस्य कार्यतायां सामाना
धिकरण्यसंबंधेनानवच्छेदकत्वं किंत्वव्यवहितोत्तरत्वपरिचायकपरामर्शघटकतयाऽनुमितित्वस्य च तादृशसं
४ कपंक्ति बंधेनैवावच्छेदकत्वं। तादृशानुमितिः कार्यतायाहे सामानाधिकरण्येन तत्सावच्छेदकत्वावगाहनादिति भावः।
५ घटक व्याप्यत्वविषयकेत्यत्राखंडाभावत्वतया वैयर्थ्याभावेपि तदपेक्षया लाघवादाह। व्याप्तिमान इति।। व्याप्तिभानेऽवश्यंभा
समानं। साध्यमपीति। तदविषयकत्वोपादानेऽसंभव इत्यतः तादृशानुमित्यविषय इति। नच व्याप्तिपरामर्शाधी
नानुमित्यविषयो घटादिस्तदविषयकत्वे तादृशविशिष्टवैशिष्ट्यबोधेऽतिव्याप्तिवत्। पूर्वदलं तत्कथाचाभाव
विषयकत्वं हेत्वविषयकत्वं वा वाच्यमित्यर्थः। ननु पर्वतो वह्निमानित्यनुमितित्वावच्छिन्नं प्रति पर्वतो वह्निव्याप्य
धूमवानिति परामर्शत्वेन न जनकता वह्निव्याप्यतद्रूपवान् पर्वत इति ज्ञानजन्ये व्यभिचारात्। नापि वह्निव्याप्य

द्वितीयक्षणादिसंस्कारेण नेता नानेन तादृशपरामर्शानां नाशात् तत्परामर्शव्यक्तिध्वि

भवा ३९ धूमवान्नपर्वतइतिपरामर्शाव्यवहितोत्तरतादृशानुमितित्वं तत्कार्यतावच्छेदकं । अव्यवहितोत्तरत्वं हि तादृशपरामर्शाधिक
रणाकालध्वंसाधिकरणत्वे सति तादृशपरामर्शध्वंसाधिकरणाकालध्वंसानधिकरणत्वं तच्चाप्रसिद्धं । कालमात्र
39 स्यैव तादृशपरामर्शध्वंसाधिकरणाकालध्वंसाधिकरणत्वा[illegible]त् तत्परामर्शव्यक्तिध्वंसाधिकरणाकालध्वंसा
नधिकरणत्वरूपेऽव्यवहितोत्तरत्वे कार्य्यतावच्छेदकस्य तत्तद्व्यक्तिमात्रविश्रान्तत्वात् [illegible] तत्तद्व्य
क्तित्वमेव तत्तद्व्यक्तित्वावच्छिन्नजन्यतावच्छेदकमत एव परामर्शत्वस्यानुमितित्वस्य च कार्यकारणयोरवच्छेदकत्वे
मानाभावः ॥ न च तत्तद्व्यवहितोत्तरत्वसंबंधेन सामानाधिकरण्यविशेषितेन परामर्शवत्त्वमनुमितित्वमेव तथा च ता
धूले दृशानेक[illegible]पदार्थघटितात्व्यवहितोत्तरत्वस्य संबं[illegible]मानाभावात् । न चैककालावच्छेदेनैकात्मवृत्तित्वप्रत्यास
त्त्या परामर्शविशिष्टानुमितित्वं तथा च ज्ञानद्वयात्मकः कालो यत्रैव्योऽतो न तद्विनश्यदवस्थपरामर्शजन्यानुमितेरस्य
सूले संग्रहइतिवाच्यं । एतद्रूपलिंगकवह्न्यनुमितिं द्वितीयक्षणोत्पन्नधूमपरामर्शोत्पादे तादृशानुमितावपि जनसंबंधेन धूम राम ३९

तृतीयपत्रतो९

परामर्शवदनुमितित्वसत्वे न तत्र च धूमपरामर्शस्याहेतुत्वेन व्यभिचारात्तस्य प्रागभावाधिकरणक्षणावृत्तिपरामर्शा
धिकरणक्षणद्वयावच्छेदेनैमवृत्तित्वस्य च संबंधत्वे मोनाभावइत्यस्वरसान्मूलोक्तलक्षणमुपेक्ष्य लक्षणांतरमाह
यो कांचिदिति। केचित्तु यत्र विषयविशेषके न व्याप्ये नैव व्यापकस्यानुमितयः तत्र न व्याप्यविशिष्टतादृशपक्षज्ञा
नत्वेन तत्पक्षकतादृशविषयविशेषानुमितित्वे न कार्यकारणभावे बाधकाभावात्तदनुमितिमादाय जातिघटितं २
मूलोक्तलक्षणमनाकुलमित्याहुः। लिंगोपहितलैंगिकभानपक्षे वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्य वह्नि
व्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितित्वेमेव कार्यतावच्छेदकमत एवालोकपरामर्षजन्यानुमितौ न व्यभिचार
ः। तत्र वह्निव्याप्यधूमवान्पर्वत इति परामर्शत्वेन जनकता। वह्निमत्पर्वतस्याडमितेस्तु धूमलिंगकत्वज्ञदनुमितिस्व
रूपाविषयत्वैवकार्यतावच्छेदकसंबंधः। अव्यवहितोत्तरत्वापेक्षया लघुत्वात्तत्स्वरूपस्य संबंधत्वेन क्षमत्वाच्चा
नातत्स्वरूपस्य ना तोक्तालोकादिलिंगकानुमितौ व्यभिचारः। एवमालोकादिलिंगकानुमितावपीत्यपि वदंति। मानसत्वव्या

३ व्याप्यालोकवान्पर्वतो वह्निमानित्याकारानुमितेरंगीकारात्। लिंगानुपधानपक्षेपि पर्वतो वह्निमानित्यनुमितित्वेन कार्यता वह्नि

भवा ५० यज्जातिविशेष एव परामर्शत्वं। अनुमितित्वावच्छिन्नजनकतावच्छेदकमिति तु कश्चित्। तन्न। क्वचिदेव पक्षे किंचिदेवसा
ध्यमनुमितिविषयो नापर इत्यत्र नियामकाभावे वह्निव्याप्यधूमवान् पर्वत इति परामर्शादपि घटानुमितिप्रसंगात्
५० न च घटानुमितौ घटपरामर्शः कारणं। तादृशधूमपरामर्शेऽघटस्यापि विषयत्वसंभवात्तदनुमितौ तद्व्याप्यवत्
पक्षज्ञानत्वेन विशेषहेतुत्वकल्पने च किं परामर्शत्वेन जात्या नन्वनुमितित्वस्याकस्मिकतापत्तिः। ज्ञानत्वेनैव तद
परि वच्छिन्नं प्रति हेतुत्वस्य सुवचत्वादिति। तदुक्तौ ति। अंगग्राहिकयाऽनुमितिव्यक्तिविशेषग्रहः। समवेतासमन्यानं चैष मसमवेतानां
व मे विशेषणे एतेन भावे धर्मपदं। तत्र प्रत्यक्षत्वादिवारणाय घटप्रत्यक्षत्वादेरपि कालिकादिसंबंधेनानुमितिवृत्तित्वा
त्। समवेतेति। अनुभवत्ववारणाय द्वितीयं। अत्रानुभवत्वं तद्व्यक्तित्वेनोपादाय तद्व्यक्तित्वावच्छिन्नप्रतियोगिताको
भेदो विवक्षितः। अन्यथाऽनुभवान्यासमवेतसकलानुभवसमवेतत्वरूपाऽनुभवत्वत्वप्रविष्टसकलानुभवसमवेत
त्वावच्छिन्नप्रतियोगिताकभेदस्य विवक्षितत्वे सत्तादीनामपि वारणेऽनुभवान्यासमवेतत्वस्य वैयर्थ्यापातात् राम ५०

४ स्मरणान्यज्ञानत्वनिवेशे न दृति नये नाह स्मृत्भवतज्जातीति । तथा च निःप्रयोजनकतपाऽनुभवत्वान्योन्यति विहाय [redacted]

ज्ञानत्वादिवारणाय तृतीयं विशेषणमनुमितित्वस्यापि कालिकादिसंबंधेनानुभवान्यस्मिन् कालादौ वृत्तेरप्रसिद्धे
[illegible]रेतोऽसमवेतेति । तादृशधर्मवत्वस्य कालादावतिप्रसक्तत्वादाह समवायित्वमिति । तथा च समवायसंबंधेन ता
दृशधर्मवल्लक्षणमिति भावः ॥ स्वर्गादिकमनुभवामीत्यनुव्यवसायाभावात् । प्रत्यक्षत्वादन्यत्रानुभवत्वं स्मृति
व्यावृत्तोऽनुभवत्वव्यवहारः ॥ [illegible] स्मरणान्यज्ञानान्यासमवेतत्वे गौरवात् । स्मरणासमवेतत्वमेवोपादेयमिति भा
वः ॥ यद्यप्यनुभवत्वजात्यंगीकारेपि तद्व्यक्तिसमवेतप्रत्यक्षासमवेतधर्मसमवा[illegible]यित्वं जन्यज्ञानं[illegible] स्वव[illegible]मे
वतथापि प्रत्यक्षत्वादिमिति च चक्षुःसेवलक्षणमनेनोक्तं । तद्व्यक्तिपदे न प्रत्यक्षमिति व्यक्तिपरिग्रहे प्रत्यक्षमितेरेवं
शाब्दव्यक्तिविशेषपरिग्रहे शाब्दस्याप्यनेन लक्षणेन कथं न संभवादेवमुपमितौ वपि इति भावः ॥ व्याप्तिज्ञानं का
रणं परामर्शो व्यापारः व्यापारव्यापारिणोरेकमेव जन्यतावच्छेदकं । तेन व्यापारव्यापारिभावसंभवादिति मतानु
सारेणाह । व्याप्तिज्ञानत्वावच्छिन्नेति । वह्निव्याप्यधूमवान् पर्वतवानिति विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नकार्यता

व्याप्तिज्ञानत्वेत्यादि १

भवानं वारणाय व्याप्तिज्ञानत्वावच्छिन्नायाकारणतानात्प्रतियोगिकार्यतायायवच्छेदकं तदवच्छिन्नेत्यर्थः। व्याप्तिज्ञान
४१ त्वावच्छिन्नकारणताप्रतियोगिकप्रत्यदोहन्निकार्यतावारणाय विशिष्टपरामर्शत्वावच्छिन्नेत्यादि। तत्र हि व्याप्ति
ज्ञानत्वावच्छिन्नस्य कार्यतावच्छेदकं व्याप्तिविशिष्टज्ञानत्वं परामर्शस्य तादृशविशिष्टवैशिष्ट्यज्ञानत्वमिति नैकमु
भयकार्यतावच्छेदकमिति तदादाय प्रत्यदादोनातिव्याप्तिः। न च वह्निव्याप्तिज्ञानस्य तदव्यवहितोत्तरवह्न्यनुमि
तित्वावह्निव्याप्यधूमवान्पर्वत इति परामर्शस्य तदव्यवहितोत्तरपर्वतविशेष्यकवह्न्यनुमितित्वं कार्यतावच्छेद
कमित्यत्रापि नैकावच्छेदकमिति वाच्यं। वह्निव्याप्यो धूमः वह्निव्याप्यरूपविशेषणवान्पर्वत इति समूहालम्बनात्म
कव्याप्तिज्ञानाव्यवहितोत्तरयोगिककार्यतावच्छेदकं वह्न्यनुमितित्वं तदवच्छिन्ना पर्वतविशेष्यकवह्न्यनुमितित्व
स्य परामर्शजन्यतावच्छेदकस्य वह्न्यनुमितित्वघटितत्वादिति तत्र व्याप्तिविशिष्टवत्पर्वतवैशिष्ट्यज्ञानत्वस्य तादृशप
रामर्शजन्यतावच्छेदकस्य व्याप्तिविशिष्टज्ञानत्वरूपतादृशावच्छेदकघटितत्वादतिव्याप्तिरिति। केचित्। इत्यस्व राम
४१

उत्तरवह्न्यनुमितौ स्वजन्यपरामर्शनिवेशेन धूमीयव्याप्तिज्ञानस्य व्याप्तिवादितया कारणत्वाभावेन तज्जन्यतामात्रे तादृशधूमपरामर्शाव्यवहितोत्तर
तादृशवह्न्यनुमितित्वस्यावच्छेदकत्वात्। ~ व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रति २
तद्घटितधर्मावच्छिन्नात् २

विरोधाभावरूपत्वात् एवं विशेषणवति विशिष्टाभावस्यैव विशेषणाभावरूपत्वात् ६

विशेषणत्वेपि धर्मता ५ विशेषणत्वेन २

रसबीजत्वव्याप्तिशरीरघटकतावत्पदार्थानां स्मृतेः सत्त्वात् विशिष्टो विशेषणाभिमिति रीत्या यत्र परामर्शः तत्र व्यभिचारा

त्तव्याप्तिज्ञानत्वेन कारणतैव न एवमव्यवहितोत्तरत्वस्यानवश्यकत्वान्निविष्टा न तया कार्यतानवच्छेदकत्वात् परामर्शत्व

मापि न जनकतावच्छेदकमित्यादि पक्षधर्मतेति। पक्षत्वविशिष्टपक्षे यद्धर्मताज्ञानं तज्जन्येत्यर्थः पक्षत्वस्य विशेष्ये

न्वयिनाऽन्वितत्वं पक्षधर्मताज्ञाने यत्र च ज्ञानमेव पक्षतायाः परम्परया विशेषणं तदन्वयि नीलं न्यूनतानत्र पक्षताया

अनन्वयः। तात्पर्यवशाद्वह्निज्ञाने साक्षादन्वितस्य पक्षधर्मतादेः विशेषणपक्षे विशेषणीभूतपक्षतायाः अपि वि

शेषणमित्यपि कश्चित्। यथोक्तायां सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्मायाः कालाद्यतीन्द्रियपदार्थघटित

त्वेन न प्रत्यक्षत्वमतो विशेष्येति। विशेषणवति विशिष्टाभावस्य विशेषणवति विशिष्टाभावस्यातिरिक्तत्वेपि यत्र वि

षयविशेषे सिषाधयिषाप्रयुक्तो नानुमित्युत्पादस्तत्र सिद्ध्यभावस्यैव पक्षतात्वात्। एवं यत्र सिद्धिकाले सिषाधयि

षाप्रयुक्तैकोऽनुमितिस्तत्र सिषाधयिषाया एव पक्षतात्वात्। न स्वाश्रयत्वपक्षजनकत्वादिति व्याप्तिरिति पराम

४ तेषां न जन्यतावच्छेदकः। लोहितो धीणारूढत्वेन प्रचरंतीत्यादौ उद्भूतरूपवत्त्वात् द्विवच्छिन्नस्यापि तत्पुंविशेषणी भूत लोहित संयोगा

४ विशेषणत्वेन साधनता च पाति भावः पक्षधर्मतेत्यत्र लक्षणवाक्ये पक्षतासहकृततत्संबंधेन पक्षधर्मतानेव विशेषणं ४

मवा०
५२

र्शोपादानमिति भावः। तत्त्वेन परामर्शत्वेन तत्त्वेनेत्यस्य फलमाह॥ बाधादीति। आदिना सत्प्रतिपक्षपरिग्रहः। त
स्यानुमितिसामग्र्यभावप्रदर्शनाय दैवात्तस्य सामग्रीवशात् प्रतियोगीति सिद्ध्यभावप्रतियोगिसिद्धिविषयकोऽ
प्यर्थः। अन्यथा सिद्धत्वप्रकारकसिद्धिज्ञानत्वेनैव सिद्ध्यभावजन्यतावच्छेदकतालौकिकप्रत्यक्षत्वावच्छिन्नं प्रतिजनक
त्वमित्यादिना सम्मतेनैतेनैकावच्छेदेनेत्यस्यस्यापि सत्त्वसूचितं प्रकारावच्छेदेनेत्यस्य फलमाह। तदुभयसमूहालंबन
इति। नव्यपरामर्शीयत्वे परामर्शत्वे नकारणतावच्छेदकावच्छेदेनेत्यर्थमिति वा। यो वह्निव्याप्यधूमवान् पर्वतो वा
स्ति सिद्ध्यभावश्चेति समूहालंबनेतात्पर्यगोचरीभूतं यद्विविशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रका
रकधीत्वेनानेन हेतुत्वं॥ अभावोपनीतभानेप्यत्रापि प्रतियोगितावच्छेदकप्रकारकधीत्वेन न हेतुत्वं। तदाशयं व्या
ख्यातुः एवं सत्यभिन्नमिदं स्यादेवमानात्मेति इत्थंभावश्चेति समूहालंबनेति यावदिदृष्ट्वा। तच्चिंत्यमिति। चिंताबीजं तु
परामर्शजन्यतावच्छेदककोटौ तल्लिंगकत्वं निविष्टं प्रत्यक्षतावच्छेदकं जन्यतावच्छेदककोटौ तन्निवेशनमफलं। यदि राम
५२

१ पर्वतो वह्निमानित्यनुमितित्वंसिद्धाभावस्य कार्यतावच्छेदकं वह्निव्याप्यधूमवानयं इति परामर्शकार्यतावच्छेदकं धूमलिंगक

चविषयीतासंबंधेनावच्छेदकस्यैकत्वं विवक्षितेतदा नायं दोषः पर्वतो वह्निमानित्यनुमितित्वस्योभयत्रैव वह्निमत्तया पर्व
तस्य विषयतावच्छेदकत्वात् न च पक्षतावच्छेदकसामानाधिकरण्येन सिद्धेरभावस्य कार्यतावच्छेदकं पक्षतावच्छेद न
कसामानाधिकरण्यावगाह्यनुमितित्वं पर्वतत्वावच्छिन्नसामानाधिकरण्येन परामर्शोत्पत्तेविशेष्यकवह्न्य स्य
त्वं नुमितिः पर्वतत्वावच्छेदेन वह्न्यनुमितिसाधारणी पर्वतत्वावच्छेदेन वह्निव्याप्यपरामर्शस्यापि तत्सामानाधिकर
ण्यावगाहित्वेन व्यभिचाराभावादिति वाच्यं अवच्छेदकावच्छिन्नसिद्ध्यभावसामानाधिकरण्यावगाहिपरामर्शयो
रेव प्रकृते निवेशात् पर्वतत्वसामानाधिकरण्येन वह्न्यनुमितित्वस्योभयजन्यतावच्छेदकत्वात् अवच्छेदकावच्छेदे
१ नानुमितावपि सामानाधिकरण्यावगाहित्वसत्त्वादिति ॥ व्याप्तिप्रकारकज्ञानत्वं पक्षधर्मताज्ञानव्याप्तिप्रकारकत्व
वन्निश्चयत्वं न हेतुतायां व्याप्तिप्रकारकज्ञानत्वस्यापि निवेशात् । व्याप्तिज्ञानत्वं व्याप्तिप्रकारकपक्षधर्मतानिश्चय
त्वमिति गार्थः । व्याप्तिप्रकारकज्ञानत्वादेर्लघुव्याप्तिप्रकारकज्ञानघटितत्वान्तस्य वर्णनादात्म्येन हेतुत्वमुचितमिति

इत्यनुमितिव्याप्तितानन्तरम् ३

यन्निष्पाद्यस्यापि तादेन विना ग्रहां नया क्योगत्क्षिपो बहं तत्कार्य्ये

भवा. ४३ त्याश्रयेनाह। तादृशात्मेपवेति। ननु व्याप्तेः साध्यसाधनभेदेनाननुगततया व्याप्तिज्ञानजन्यत्वहेतुतादृशजातिमत्करणत्व
स्य सकलव्याप्तिज्ञाननिष्ठत्वाभावात् भागासिद्धिवारणमेवाधिकांशप्रयोजनं स्यादत आह। व्याप्तेरिति॥ अधिकस्य ता
दृशजातिमत्करणत्वस्याभागासिद्धीति। तथा च व्याप्तिग्रहानोपयिकतया न सार्थकत्वमिति भावः॥ फलायोगव्य
वच्छिन्नं कारणं करणमिति लक्षणाभिप्रायेणाह। फलोपहितस्येति। तथा च फलानुपहितेपि व्याप्तिज्ञाने सत्त्वे व्यभि
चारान्न द्वारणाय तादृशजातिमत्करणत्वे फलोपधानरूपं हेतुकार्य्यमिति भावः॥ अनुमितिस्वरूपयोग्यस्य लक्ष्य
त्वेपि न क्षतिरित्यभिप्रायेणाह। करणत्वेति। तथा च यन्निष्ठेति। व्यापारान्तु धर्मिभेदान्न वैयर्थ्यमिति भावः॥ ज्ञानत्वा
दीत्यादिना व्याप्तिज्ञानत्वत्वं परिग्रहः॥ यद्यपि व्याप्तिज्ञानत्वमेव करणत्वं। तस्य च व्याप्तिज्ञानत्वत्वेनैव व्याप्तिग्र
हसंभवस्तथापि व्याप्तिज्ञानानां नैतरवृत्तिकरणतांतरस्य प्रकृतविशेषणं विना व्याप्त्यग्रहात्तस्य सार्थकत्वमिति
भावः॥ स्वरूपसंबंधरूपकरणताभिन्नेवेत्यपि वदंति। तादृशज्ञानत्वं परामर्शत्वं तस्य करणत्वाना राम ४३

नवताहृशानियमेवीत्याभावः॥ व्याप्तेरवच्छि नन्वनियमेन धर्मिभेदे धूमत्वाभावादित्वादौ धूमत्वस्यव्याप्यि कत्वानवच्छेदकत्वासंभवेन लघ्ववच्छेदकोत्तराभावेन चाग्न्यत्वधूमप्रागभावत्वादेरवच्छेदकत्वा
धर्मिभेदेतु नीलधूमादित्वादौ धूमत्वादेर्व्याप्यत्वोरव छेदकत्वेप्यवेन नीलधूमत्वादेर्न्तरेणनवच्छेदकत्वादिति॥

त्मकत्वात्तद्धर्मिभेदे इत्यन्यो।भूमप्रमाणाभाववद्धर्मिभेदेपि वैयर्थ्यमिति मतेनाह। व्यतिरेकेति हेत्वभावनिरूपित
साध्याभाववन्निष्ठव्याप्तेर्ग्रहीतुं तथा हेतौ वैयर्थ्यशंकानवकाशादिति भावः॥ नित्यत्वेपीति। यद्यप्यनित्यमपि संवेदन हेत्वानुमानलक्षणं
स्वरूपतः प्रत्यक्षोपजीवकं तथाप्युद्देश्यद्वारा नित्यमात्रस्यैव प्रत्यक्षोपजीवकत्वं संभवतीति तथोक्तं। ज्ञानाकरणकेति
ज्ञानत्वावच्छिन्नकरणकत्वाभाववत् ज्ञानत्वं ज्ञानकरणकत्वमपि चाप्यनुभवत्वव्याप्यजातिमत्त्वं वार्थः॥ अथवानु
मिनोमि न साक्षात्करोमीत्यनुव्यवसायबलादनुमितित्वं प्रत्यक्षवैजात्ये सिद्धे तत्कारणस्यापि वैलक्षण्यं सार्वजनी
नमतोऽनुमितावुक्तलक्षणातिव्याप्तिः फलवैजात्याधीनप्रमाणांतरत्वकल्पनापवादिकेत्यस्वरसः॥ कश्चिदित्यने नस्य
अनु॰ खंड नाशितिः॥ सिद्ध्यसिद्धिव्याघातादाह। अनुमानत्वेनेति। मुख्यार्थपरत्वे नानुमानपदं संगमयतीत्यमदिति। नन्वेतपदस्या
मलीक एव शक्तिरनुगताकारमात्रस्यैवालीकत्वादिति। प्रमाणांतरविषयस्वलक्षणाविषयकत्वरूपसंवादो न सं
भावनायामलीकविषयिणापा मतआह। संवादेति। यथाश्रुततया गोबीजमाह। संभावितस्येति। असत्वे हेत्वस्त्व
ने

प्र वा ग्रहणाकारस्येति। परमार्थसन्तः स्वलक्षणाः तन्मात्रविषयकेनेत्यर्थः। स्वमस्माकारणामनेकदेशकालावृत्तिस्वात्म
४५ कत्वादेव लक्षणां व्यावर्त्तकं यस्य तन्मते भेदेन धर्मधर्मिभावस्यानभ्युपगमात्। तेनानुगतधर्मसंबंधे न तस्य व्या
वर्त्तकत्वेन सत्स्वसंबंधाभावात् कथं तस्य परमार्थधर्मिभावस्यातत्पुरुषत्वमिति शंकाचनिराकृताः। ननु तन्म
५५ ते नैतत्संवादलक्षणां पूर्वपराध्यक्षवाक्ययोरेकैकस्वलक्षणविषयकत्वात् जगतः क्षणभंगित्वात्। किंच नि
रुक्तसंवादस्य परमार्थसद्विषयघटितमूर्त्तिकस्य विकल्पेनासंस्पर्शात् कथं भ्रमो पीत्यत आह तन्मते सिद्धं संवाद
मेवोपपादयति। अध्यक्षमूलकेति। शशविषाणादिविकल्पानामनादिवासनापरिपाकमात्रमूलकानां ग्रा
ह्यार्थस्याध्यक्षमूलकेति। अत्र संभावितस्येत्यनुषज्यते। तथाच संभावितस्याध्यक्षमूलकविकल्पो हि विवक्षितत्वात्
संभावनायामध्यक्षमूलकत्वे विकल्पोल्लिखितविषयकत्वं संवादइत्यर्थात् अन्यथा च व्याप्त्यनुपपत्तिः। समयसंभा
वनापेक्षशब्दादेः प्रवृत्तिस्यादत्र अंकं। निरीपेति। आदिनाज्ञा कां ज्ञातात्यर्थादि तिर्णय ● १ प्रियहः। नाप्रत राम
४५

त्वंप्रमाणमित्यपीति। तथा चस्वाभिमतस्य प्रत्यक्षातिरिक्तप्रमाणत्वाभावव्यवस्थापनस्यानुगुणत्वेनैवानुमानाप्रा
एयसाधनं चार्वाकस्येति भावः॥ अथ प्रमाणसाधर्म्यस्य प्रमाणोपिसत्वात् प्रमाणसाधर्म्येन प्रमाणत्वाव
ज्ञाप्यते इत्यत आह॥ प्रमाणेनेति। प्रमाणताप्रयोजकमिन्द्रियत्वं व्याप्तिनिश्चयत्वादिकं तत्र सिद्धं तथा च पूर्वमव्य
भिचारशंकोपवर्णनं व्याप्तिनिश्चयाभावप्रदर्शनद्वारा प्रमाणताप्रयोजकरूपज्ञानसंपादनायैवेति भावः॥ दृ
ष्टसाध्यसाधनवत्तया निश्चितं तत्र साधर्म्यं साध्यव्याप्यहेतुरूपं न स्पष्टं दृष्टं ज्ञायमानं अतीतत्वस्याप्रवृत्तिद्वारेणेति याव
ज्ञायमानसाधर्म्यस्येति वार्थः॥ ज्ञानकरणतापन्नमाश्रित्यप्रश्नयति। साधर्म्यदर्शनस्य वेति। अभिहितम
वेति व्यवहारहेतुरित्यनेनान्वितं। तथा चानुमानाप्रामाण्यपरकीयसंदेहादिकं च साधर्म्यदर्शनेन संभवात्त
द्व्यवहारोपपत्तिरित्यत्र कल्प्यत इत्यर्थः॥ केचित्तु॥ अभिहितमेव साधर्म्यादर्शनं प्रमाणताप्रयोजकरूपज्ञा
नत्वदर्शनं। साधर्म्यसंभावनामानुमानेऽप्रामाण्यसंभावनाभावपनि। ननु संभावनायाः कथमप्रमाणत्व

भवा
५५
५५

वहारः॥ कथं वा परकीयसंदेहादिकमनिर्णीयमत उक्ते संशयशब्दप्रयोग इत्यत आह॥ संभावनैवेति॥ तथा च परकी-
यसंदेहादिकमपि संभाव्यैव तादृशः शब्दप्रयोग इत्यर्थ इति व्याचक्षुः॥ आपातत इति॥ यावत्सत्ख्यातिर्न
व्यवस्थाप्यत इत्यर्थः॥ ततश्चित्रोक्तभ्रमस्यासत्ख्यातित्वमतया भ्रमजनकत्वसिद्धावपि नाप्रामाण्याभाव
श्री सिद्धिरिति भावः॥ विषयबाधेति॥ अप्रामाण्याभावश्चेति॥ अप्रामाण्य प्रकारकेरूपत्रमत्वस्य विशेष्ये प्रामा- २
ण्याभाववत्त्वेऽविना नुपपत्तेरिति भावः॥ संशयो हि रजतत्वप्रकारकत्वात्मकरजतत्वभ्रमाप्रमसाधारणधर्मद-
र्शनात् विशेषादर्शनाच्च भवतेत प्रकृतेऽनुसंभवतीत्याह॥ अनुगताकारासंस्पर्शनीत्यादिना॥ अनेनसाधारणधर्म-
च त वद्धर्मिज्ञाननिरासः॥ परमार्थसदित्यनेन विशेषादर्शनस्य निरासः॥ तादृशस्वलक्षणविषयकत्वस्यैव व्यावर्त्त-
कधर्मविषयासंशयविरोधित्वादिति॥ कोटिरूपविशेषनिश्चयमपि दर्शयति॥ स्वसंवेदनेति॥ स्वेन स्वात्मकेन सं-
वेदनेन संवेदितं विषयीकृतं प्रामाण्यं यस्येति॥ सविकल्पके संशयप्रकारणोपपत्तिमाह॥ परं त्विति॥ प्रत्यक्षे राम
५५

व्याप्तिघटकी भूताव्यभिचारांशाशे भाने बाधकाभावमुद्रया व्यभिचारज्ञानाभावोहेतुः साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकाग्रहे च विशेषणज्ञा
नमुद्रया सहचारग्रहोहेतुरिति के नेरा व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपं प्रतिपिपादयिषाकत्वादिति भावः॥१८

ऽप्रामाण्यशंकाविरहे कथमिंद्रियार्थसंन्निकर्षानंतरमुत्पन्ने ज्ञानेऽप्रामाण्यसंशयानुभवइत्यत आह। तदुत्तर
भाविनीत्ति। समुल्लिखितो विषयी कृतो ऽलीको ऽनुगताकारो येन तत्र सं[…]वेति। असद्विषयकत्वे सति सद्वि
षयकत्वं सन्मात्रावलंबनत्वं तच्च निर्विकल्पकविषय ०। असद्घटितमूर्तिकत्वादिविषयितानवस्थापातात्। न च तत्
दपि संभावनीयं। तथा सति शुक्तिसन्मात्रावलंबनत्वशमाराप्यादीनामप्रामाणिकत्वापातात्संभावनाया ०। अप्रमा
गोतमकाला २४१। त्वाभावादिति भाव ०। सर्वमिदं अनुमानप्रामाण्यसाधनं समारंभति। समारंभात्। अनुमानप्रामाण्यपरीक्षा। तत
कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तस्य निदानमित्यर्थः। व्याप्तिस्वरूपज्ञाने हि व्यभिचारज्ञानाभावो
ऽव्यभिचारग्रहे सहचारग्रहश्च समानाधिकरणसाधर्म्यलक्षणं हेत्वि धूमत्वरूपयाज्ञो सहचारोप
स्य विशेषणतया तत्सज्ञानविधयोपयोगित्वेन प्रतिपादयितुं शक्यते नान्यथेति भाव ०। अव्याप्येति। क
पि संयोगी एतत्त्वादित्यादावित्यर्थ ०। साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारये साध्याभाववत्त्वस्यैवा

प्रमा च

सहेतुताविति ~~संयोग~~ साध्यत्वादित्यादौ नाव्याप्तिः॥१

मपा सन्निवेशोऽपि साध्याभावपदवैयर्थ्यमिति स्पष्टमेवेत्यर्थः इ
अन्यथाऽनेन लक्षणेनाव्याप्यवृत्तिसाध्यकसद्धेतौ प्रथमद्वितीयलक्षणयोरव्याप्तिः तादृशः॥ इ

म० वर्त्तकत्वेन वैयर्थ्यमित्यतः सूक्ष्ममीतत्पुरुषं व्याचष्टे॥ साध्यवद्भिन्न इति। न च साध्यवद्भिन्नेन समं अन्यवृत्तित्वस्यान्यथा
४६ भावाद्व्यर्थ्यासन्निवेशे वैयर्थ्यमिति वाच्यं अभेदेन साध्यवद्भिन्नान्वितसाध्याभाववत्सम्बन्धिनोऽवृत्तित्वान्वयेऽसा
५6 ध्याभाववत्त्वस्याव्यावर्त्तकत्वेन वैयर्थ्यापातात्॥ अभेदेन साध्यवद्भिन्नीयावृत्तित्वस्यैव सम्यक्त्वादिति॥ न चाधिकर
णाभेदेनाभावभेदपक्षे वैयर्थ्यं तदात्मकत्वाद्लक्षणमिति साध्यवद्भिन्नेऽषोऽभावइत्येतावतैव सामंजस्ये साध्यपद
वैयर्थ्यमिति वाच्यं। व्याप्यव्यापकवृत्तित्वविरुद्धधर्मसंसर्गेणाद्यवृत्तित्वसंयोगाभावादेः गुणादिवृत्तित्वसंयोगा
भावस्यैव भिन्नत्वोपगमात्॥ नव घटत्वाभावादेरधिकरणभेदेन भेदाभ्युपगमे मानाभावात्। यदि चाभा
वमात्रस्यैवाधिकरणभेदाद्भेद इति मतेनेदं। तथापि साध्याभावत्वेन साध्याभावत्वं तावदभावसाधारणमुपात्तं
अन्यथा घटत्वाभावत्वान्नपटत्वादित्यत्राभावसाध्यके भावभिन्नस्य साध्याभावस्याप्रसिद्ध्याऽव्याप्तिः स्यात्
अथ च साध्यवद्भिन्नेवर्त्तेयोऽद्यत्वादिरूपो अत्यन्ताभावाभावः तद्वृत्तित्वमादाय वृत्तित्वेनासंभवोऽव्याप्तिर्वा स्या राम
४६

४ घ घ प्रसाध्याभाववद्वृत्तिसाकल्यविशेषणस्याभावे साध्ये साकल्यविशेषणानुपादानेव वह्निमान्धूमादित्यादौ यत्किंचिद्वह्न्यभाववद्वृत्तित्वं च धूमस्य पर्वतादौ पर्वतान्यत्वाभाववत्त्वात् इति व्याप्तिलक्षणस्याति ताहशादिव्याप्तिवारणाय
तद्रूपो घटा...नेति धूमवान्वह्नेरित्यादावतिव्याप्तिवारणाय सर्वस्य स्वरूपसंबन्धेन साध्याभाववद्वृत्तिसाकल्यविशेषणे नातिव्याप्तिः तथा च एतं सर्वे वह्निमान्पर्वतान्यत्वादित्यादौ तत्तद्वह्नि... तथा च वह्निमान्धूमादित्यादावतिव्याप्तिवा
रे सल्ये तत

दतः। साध्येति। साध्याभाववत्त्वं च साध्यवत्ताग्रहविरोधिग्रहविषयतासंबंधेन तेन त्रैकालिके नष्टात्मसाभावे दे-
नौ शिकतया साध्ये आत्मत्वादिहेतौ व्याप्तिः। कर्मीदावितिः। तथा च साध्यवद्भिन्ने गुणादौ यः कोपि साध्याभावः स एव
दृश्यपीत्यव्याप्तिः। इदमुपलक्षणं। ...रत्वेन रूपेण साध्याभाववत्त्वाकाशत्वस्य ...: घटाकाशसंयोगान्यत-
राभाववान् आकाशत्वादित्यादावव्याप्तिस्तत्र हि साध्यवद्भिन्ने घटे यस्ताहशान्यतररूपसंयोगरूपः
साध्याभावः स इति आकाशत्वस्य वृत्तेः। न च साध्यवद्भिन्नवृत्तित्वविशिष्टो यः साध्याभावस्तद्वद्वृत्तित्वमि-
त्यक्तौ नायं दोष इति वाच्यं। साध्याभावपदवैयर्थ्यापत्तेः। सिद्धिकर्मत्वं साध्यत्वमित्यभिप्रायेणाह। साध्यव-
त्त्वेति। अव्याप्तेरिति। व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनान्योन्याभावविशेषणे एतद्रूपवान्न
एतद्रूपसादित्यादावव्याप्तिस्तादृशान्यतरवानादकेऽसंभवो न भवतीति भावः। साध्याभाववद्वृत्तिसाकल्याप्रवेशे त्वसा-
कल्यं सार्थकमिति। इत्थं च साध्याभाववतीति। साध्याभावे साकल्यदाने तद्धूमवान्वह्नेरित्यादावतिव्या

तानि ... व्या

कैवल्यि...

मथा प्तिः तत्तद्रूपावृत्तित्वावच्छिन्नाभावघटितसाध्याभाववत्त्वाभावस्य प्रतियोगिवैयधिकरण्यावच्छिन्नस्याधिकरणे गुणा
४७ दौ वह्न्यादेरभावसत्त्वात् अव्याप्तिः पृथिवीत्वाभाववान् जलत्वादित्यादौ तत्र तत्तद्व्यक्तिवृत्तित्वावच्छिन्नाभा
वघटितसाध्याभाववत्त्वाभावाधिकरणस्याप्रसिद्धेरिति । ननु वह्निमत्यपि सकलवह्न्यभावसत्त्वादव्याप्तिः । व्यास
ज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणाज्जातिमान् सत्त्वादित्यादावव्याप्तिः । तत्र पूर्ववद्गुणवृत्ति
त्वविशिष्टसकलजात्यभावस्य जातिमत्यपि सत्त्वात् । न च सकलसाध्यस्य तत्तद्व्यक्तित्वावच्छिन्नाभाव एवात्र नि
वेश्यः पृथग्गुणान्यत्वविशिष्टजातिमान् सत्त्वादित्यादावतिव्याप्तेस्तत्र सकलसाध्यान्तर्गततया तद्व्यक्तित्वावच्छिन्ना मतापाः६
भावस्यैवैतज्जात्यादौ सत्तायामभावसत्त्वादतः साध्यतावच्छेदकेति । व्याप्यवृत्तीति । कपिसंयोगी एतत्त्वादि
२ त्यादौ हेतौ व्याप्यवृत्तित्वविशिष्टत्वाभावसत्त्वेन नाव्याप्तिरिति भावः । यद्यपि हेत्वभावे प्रतियोगिवैयधि
करणस्यावश्यकत्वादव्याप्यवृत्तित्वेऽप्यव्याप्तिः । सम्भवति तथापि यथाश्रुतस्य नाव्याप्तिरिति व्याप्यवृ राम
४७

नीतत्फक्कं। व्यभिचारित्वादिति। पृथिवीकपिसंयोगादित्यादावभावद्वये साध्याभावे हेत्वभावे च प्रतियोगिवैयधिक
रण्यं साध्यतावच्छेदकसंबंधेन हेतुतावच्छेदकसंबंधेन च यथा यत्संबोध्ये तेन द्रव्यत्वप्रकारके तत्तदभावानुद्
यमा व्यत्वादात्माज्ञानादित्यादौ नातिव्याप्तिरव्याप्तिर्वा द्रव्यत्वप्रकारक यत्प्रमायां गुणादिकं न विषयः। सैव प्रमा
ऽतत्पदेन धर्त्तव्या। तेन द्रव्याणि यावंति सर्वप्रमेयं इति समूहालंबने द्रव्यत्वप्रमाविषयतायाः केवलान्व
यित्वेन समवायेन तदभावस्य संबंधसामान्ये न प्रतियोगिव्यधिकरणत्वासंभवेपि न क्षतिः। हेत्वभावो
पीत्यपि नासाध्याभावोपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो बोध्यः तेन गुणान्यत्वविशि
ष्टसत्तावाञ्ज्ञानेरित्यादौ नातिप्रसंगः। न च साध्याभावोपीति वक्तुमुचितं। अपि ना हेत्वभावे समुच्चय इति किं
न्नुक्तं तन्नपोसति तत्तत्प्रतियोगित्वमित्यत्र तत्पदेन हेत्वभावपरामर्शानुपपत्तेः अभावप्रतियोगित्वमित्यत्फ हेतु २
क्कोशाद्गौरवादिति। क्रमेण विशेषणयोः फलमाह यातेनेत्यादिना॥ अत्र च प्रतियोग्यनधिकरणेति

प्रतियोग्यनधिकरणवृत्तित्वविशिष्टाभावप्रतियोगित्वं ... कपिसंयोगादित्यादा ...

भवा ५८ त्वविशिष्टसाध्याभाववत्सकलनिष्ठनिरुक्तप्रतियोग्यनधिकरणवृत्तित्वविशिष्टाभावप्रतियोगित्वं
हेतोर्व्याप्त्यंते न कपिसंयोगि एतत्वात्कपिविभागाद्वेत्यादौ प्रतियोगिसमानाधिकरणभिन्नस्य साध्या
भाववत्स्य हेत्वभावस्य चाप्रसिद्धित्वेपि प्रतियोग्यनधिकरणवृत्तित्वं कपिसंयोगाभाववत्स्वरूपतिवृत्त्येतत्वाभावस्यासत्वे
पि च न क्षतिरिति । साध्ये साकल्याप्रसिद्धेः । साध्याभाववति साकल्याप्रसिद्धेर्हेत्वभावे सकलसाध्याभाववद्वृत्ति
त्वाप्रसिद्धेः क्रमेणाव्याप्तिमाह । पत्रेत्यादिना ।। तत्र साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्विशेषणे साध्ये साकल्यान्व
वेशात् दोषः विपक्षो वेति । एकव्यक्तिक इति । विपरितेनान्वयः । ईश्वरभिन्नं घटत्वादित्यादावित्यर्थः । तत्राव्याप्ति
रित्यंशेनैतेन संबंधः । ननु साकल्यमिह अशेषरूपं व्यापकत्वपर्य्यवसितमत आह । निर्धूमत्वादीति । निर्धूमत्व
स्य धूमत्वावच्छिन्नसामान्याभावात्मकस्यैकव्यक्तिकत्वात्साकल्याप्रसिद्धिरेव दोष इत्युक्तो व्याप्येति ।। ताह
शव्याप्यस्य जलत्वादेस्तादृप्येण साध्यतायां निर्वह्नित्वस्य व्यभिचारित्वात् सद्धेतत्वार्थमाह । तत्वेनेति । व्या राम ५८

ष्यत्वेनेत्यर्थः॥ नन्वत्र साध्याभाववत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यमित्यस्य दोषत्वेऽपीष्टं मतम् आह। अत्रे
वेति। साध्यवदन्यत्रेत्यर्थः। तत्रत्तु यत्किंचित्साध्यवद्व्यक्तिभेदोऽपि साध्यवत्प्रतियोगिकान्योन्याभावो भवती
त्यव्याप्तिः वह्निमान्धूमादित्यादाविति भावः॥ पुत्रानीति॥ अत्र च साध्यवद्भेदेनुलक्षणाया साध्यवत्त्वावच्छिन्नप्रति भेदे
योगिताकोऽभीष्टीयते तस्य चान्यशाब्दार्थैकदेशभेदेनान्वयः॥ घटो नेत्यादौ च घटतदभावयोर्घटत्वावच्छि
न्नप्रतियोगिताकत्वसंबंधः॥ ननु विशेषणीभूतघटत्वादेरभावेन सं[illegible]तरप्रतियोगितावच्छेदकत्वसं
सर्गः। तथा सत्यभावो घटीयो घटः इत्याकारापत्तिरेवं घटत्वस्योत्तर विशेषणतया पदार्थैकदेशतया वा भा
वेन्वयासंभवाच्चेति चेद् घटत्वविशिष्टोपस्थापकपदसमभिव्याहृतनञ्पदस्य घटत्वावच्छिन्नप्रतियोगिताकसं
पात् बंधेन [illegible] घटत्वप्रकाराभावबोधकत्वं कार्यतावच्छेदकं नीलसाकोऽघटोपस्थापकपदसमभिव्याहृतनञ्प
दस्य नीलघटत्वावच्छिन्नप्रतियोगितासंबंधेन नीलघटत्वप्रकाराभावबोधकत्वं तथा नीलो घटो नास्तीत्यादौ च घट

[illegible]

भवा
५९
59

बोधा

त्वावच्छिन्नप्रतियोगितासंबंधेनाऽभावः तात्पर्यभावात् विशेषणांतरसाकांक्षत्वेन ज्ञातघटत्वादिविशिष्टोपस्था
पकपदसमभिव्याहृतनञ्पदत्वादिना वा घटत्वावच्छिन्नप्रतियोगितावच्छेदकसंबंधबोधजनकत्वे वाच्या। घट
इत्यादौ च पंचम्याश्चावधित्वे चावधिमत्त्वे वा शक्तित्वं च घटत्वावच्छिन्नवृत्तित्वे घटत्वावच्छिन्ननिरूपितत्वं वा सं
बंधः। एवं घटस्याभाव इत्यादौ च प्रतियोगित्वेऽनुयोगित्वे वा षष्ठ्यर्थे घटत्वावच्छिन्नवृत्तित्वादिकं संसर्गः कंबुग्री
वादिमान्नास्तीत्यादौ च द्वययोग्यतानिश्चयशून्यानां भ्रमात्मकः। घटतदभावबोधे घटत्वावच्छिन्नप्रतियोगिताया
एव संबंधत्वे न कंबुग्रीवादिमत्त्वस्यासंबंधत्वात्। न चात्र भ्रमो न कंबुग्रीवादिमत्त्वस्यावच्छेदकत्वे तस्याप्रका
रत्वात्। नापि कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासंबंधेन घटस्याभावे तादृशप्रतियोगितायाः अलीकत्वा
दिति वाच्यं। कंबुग्रीवादिमत्त्वावच्छिन्नत्वप्रतियोगितानामवसंबंतया मानात्तदुभावस्य घटत्वावच्छिन्नप्रति
योगितयैव घटसंबंधितया कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासंबंधेन घटासंबंधित्वेन तेन संबंधेन घ

राम

रप्रकारत्वादिति भूतले घटपटौ न स्त इत्यत्र भूतलवृत्त्यभावे घटपटयोरुभयो [redacted] त्वावच्छिन्न
प्रतियोगितासंबंधेनान्वयः इति द्विवचनस्य प्रयोगसाधुतामात्रं दाराः संतीतिवत् भूतलवृत्त्यभावस्य घटपटोभयत्वा
वच्छिन्नप्रतियोगितासंबंधेन घटपटोभयोरन्वयश्च तथा च भूतलवृत्त्यभावीयो घटपटोभयत्वइत्यन्वयः इति केचित्। भूतलो
वेयत्वस्य समस्यार्थस्याभावो घटपटोभयत्वसामानाधिकरण्यपनेत्यपि कश्चित् न तस्य ज्ञातौ सत्त्वाइत्युत्वेन स्तः इत्यत्र गा गुणत्वे
तं त्वभावे: घटपटौ न स्त इत्यादौ च घटपटत्वमुभयत्वं च परस्परसामानाधिकरण्यं प्रतियोगितावच्छेदकं न तूभयत्व नं
मात्रं केवलं घटत्वं पटत्वं वा यत्किंचिदुभयवृत्ति केवलघटवृत्ति केवलपटवृत्ति वा घटपटौ न स्त इति प्रतीयात्तोदृश
प्रतियोगितावच्छेदकावच्छिन्नं घटो पटो मयमेवास्तद्धुभयवत्येव न तादृशप्रत्ययः। एवं दंडी पुरुषो नास्तीत्यादावप
पि विशेषणविशेष्यभावापन्नं पुरुषत्वं दंडो दंडत्वं च प्रतियोगितावच्छेदकमित्यादिकमूह्यं अनुद्घाटितानन्तरायाप्यस्व इतिपंचल·
पो न रूक्तमाशंकाहि। साध्यमिति। असामानाधिकरण्यपतदनधिकरणाधिकरणात्वं तदधिकरणानधिकरण

द्रव्यत्वाधिकरणसामानाधिकरण्यमेदसाध्येति मत्किंचित्प्रेत्वाबाधासहत्वं अविवक्षितं चेति॰ अन्यथा द्रव्यत्वादिति शेषः॥ अधिकरणत्वनिरूपकत्वसंबंधेनावच्छेदकतानवच्छेदकधर्म

भवा णत्वं वा। आद्ये सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः। सत्तायां द्रव्यत्वानधिकरणाधिकरणत्वस्य सत्त्वादत आह।

५० यदधिकरणेति। साध्यसमानाधिकरणपस्येत्यत्र समानाधिकरणाभिन्नसाध्यस्य यत्पदार्थसंबंधो लभ्यते

५० त इत्यबाधितं। अविवक्षितं च द्रव्यत्वतो यदिति कश्चित्तदयुक्तं। पर्यवसन्नत्वाननुगमादाह। साध्यनिष्ठेति। साध्यनिष्ठाभा २

वप्रतियोगिवृत्तित्वनिरूपकाधिकरणताश्रप्रतियोगित्वं साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगितायाः निरूप

कतासंबंधेनावच्छेदकं यदधिकरणं तद्वृत्तित्वमित्यर्थः। द्रव्यं सत्त्वात् साध्ये गुणवृत्तित्वाभावस्यासत्त्वात्। साध्यनिष्ठा दित्वावच्छेदे

भावीयवृत्तित्वनिष्ठप्रतियोगितायाः निरूपकतासंबंधेनावच्छेदको गुणः॥ स्वरूपवृत्तित्वस्य सत्तायां सत्त्वान्नातिव्याप्ति

: ननु वह्निमान् धूमादित्यादावप्ययोगोलकीयवह्नौ पर्वतीयवह्नौ महानसवृत्तित्वाभावस्य सत्त्वात् तादृशसा

ध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकमधिकरणं महानसं तद्वृत्तित्वस्य धूमे सत्त्वादव्याप्तिः। किं च साध्यनि

ष्ठासामानाधिकरण्यमित्यत्र वृत्तित्वं साध्यतावच्छेदकसंबंधेन बोध्यं। अन्यथा समवायेन धूमवान् महाकालान्यतरत्वा राम

५०

साध्यनिष्ठाधेयत्वे ति २

त्वादित्वात्रातिव्याप्तिः। तथा च संयोगेन द्रव्यसामान्यस्य साध्यतायां समवायेन हेतौ द्रव्यत्वे व्याप्तिः। तत्र संयोगेन गु
णवृत्तित्वस्याप्रसिद्धतया साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वस्य गुणत्वादावप्रसिद्धेराह। साध्यनिष्ठा
धेयत्वं साध्यतावच्छेदकसंबंधेन वाच्यं तेन स्वत्ववानात्म महाकालान्यतरत्वादौ संबंधसामान्येन स्वत्वनिष्ठाधे
यत्वानिरूपकाधिकरणगगनादावव्याप्तौ नातिव्याप्तिः। समवायेन वह्निनिष्ठाधेयत्वानिरूपकाधिकरणपर्वता
दिवृत्तौ धूमेनाव्याप्तिर्वा। वृत्तित्वमपि हेतुतावच्छेदकसंबंधेन तेन संयोगेन वह्निनिष्ठाधेयत्वानिरूपकधूमावय
वसमवेते धूमेनाव्याप्तिः। न त्वेवं सत्तावान् द्रव्यत्वादित्यत्र समवायेन हेतौ द्रव्यत्वे द्रव्यं घटादित्यत्र संयोगेन हेतौ घ
दे टे चाव्याप्तिः। समवायेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे [redacted] सामान्यादौ गुणादौ च हेतुतावच्छेदकसंबंधे
न संयोगेन समवायेन वृत्तेरप्रसिद्धेरत आह। साध्यनिष्ठेति। अत्र च व्यापकतावच्छेदकसंबंधेन हेत्वधिकरण [redacted] हेतुतावच्छेदकावच्छिन्न २
[redacted] तान्या वह्निभिन्नाभावत्वेन बोध्या तेन वह्न्यधिकरणतात्वाभावस्य प्रमेयत्वादिना धूमनिष्ठाधेय पच्छिन्ना १

हेतुता २

भवा त्वानिरूपकाधिकरणत्वव्यापकत्वेपि नातिव्याप्तिः॥ आर्द्रेंधनजवह्न्यधिकरणत्वाभावस्य तादृशाधिकरण
५२ त्वव्यापकत्वादाह। सामान्येति॥ वह्न्यधिकरणतासामान्यस्य अयोगोलकीयवह्न्यधिकरणतासाधारणस्य तादृ
शपर्याप्तियोगित्वाभावान्नातिव्याप्तिरिति साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकतावच्छेदकहेतुताव
या व्यासज्यवृत्तित्वानंगीकारे तार्णतार्णोभयत्वावच्छिन्नप्रतियोगिताया अपि वह्नित्वसमानवृत्तिकत्वादनतिरिक्तवृत्ति
वह्नित्वस्याप्यवच्छेदकत्वापत्तिः [illegible] इतरतोऽवच्छेदकपर्यन्तानुधावनं प्रतियोगितावच्छेदकं च विशिष्योपादेयं तेन तादृशप्रति

साध्यनिरूपित·
साध्यतावच्छेदकसंबंधेनाधारत्वं · तेन तादृशप्रतियोगितावच्छेदकीभूतघटत्वादेर्विकालिकसंबंधेन वृत्तित्वात् संबंधकमात्रे न तदभाववति · २

भवा योगितावच्छेदकत्वेनानुगतीकृतानां तत्तद्वह्नित्वानां अनतिरिक्तवृत्तित्वेऽपि वह्नित्वस्य न क्षतिः । तदनतिरिक्तवृत्तित्वं च प्रतियो
१४३ गितावच्छेदकतानियामकसंबंधेन तदभाववति समवायेन वह्नित्वस्यावृत्तावपि न क्षतिः । न वाऽवच्छेदकतानियामकसंबंधे
न घटत्वादेरभाववति । कालादौ कालिकसंबंधेन घटत्वादेर्वृत्तित्वेऽप्यवच्छेदकत्वक्षतिः । महाकालो ध्वंसवान् कालपरिमाणादि
काति त्पादाव्याप्त्याकाशत्वघटत्वादिकमेव पारिभाषिकमवच्छेदकं तादृशप्रतियोगितावच्छेदकीभूतगगनत्वाभाववति गगनत्वा २
113 देर्वृत्तित्वाय स्वरूपसंबंधविशेषेणाङ्गीकारादिति · ननु तथाविधप्रतियोगितावच्छेदकताया उभयत्वाद्यनतिरिक्तवृत्तित्वे वह्नि
त्वादिकमित्यसंभव इत्यत आह । स्वसमानेति । स्वं पारिभाषिकमवच्छेदकत्वेनाभिमतं न तु स्वसमानत्वं अन्यूनानतिरिक्ताधिक स्व
रणत्वं न वा समवायत्वादिना वाद्वयमपि तादृशोभयत्वादेर्गतमत आह । तत्त्वं चेति ॥ स्वसमानवृत्तिकत्वं चेत्यर्थः । तेन या
वद्वह्नीनामेव वह्नित्वपर्याप्त्यधिकरणत्वेऽपि न क्षतिः । प्रत्येकरूपावच्छिन्नपर्याप्त्या [illegible] वच्छेदकं च प्रकृते । यात्यं यावत्
वह्निरिति । प्रत्येयं च वह्नित्वपर्याप्तत्वेनानुगतानां तावत्पर्याप्तीनामवच्छेदकतया पावत्त्वे भाषिते न तु प्रत्येकरूपावच्छिन्न राम १४३

·२· उभयत्वादेरपि वह्नित्वावच्छिन्नाधिकरणे पर्याप्तेन तादृशपर्याप्तीति · स्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तिकत्वमित्यर्थः

पर्य्याप्तेरिति न यावत्त्वादौ वह्नित्वसमानवृत्तिकत्वमिति भावः॥ यत्स्वपर्य्याप्त्यवच्छेदकता व्यापकपर्य्याप्त्यवच्छेदकता
कत्वमर्थः॥ वह्नित्वपर्य्याप्त्यवच्छेदकतत्तद्व्यक्तित्वावच्छेदेन यावत्त्वस्य पर्य्याप्तेर्नेन तत्त्वं तिष्ठमेगइ ति तत्र तथासत्यनतिरिक्तवृत्ति
त्वांशस्य वैयर्थ्यापत्तिरिति उभयत्वादेरपि वह्नित्वपर्याप्त्यवच्छेदकावच्छेदेन समवायसत्त्वादाह। पर्य्याप्तिकमिति। वह्नित्वपर्याप्त्यवच्छेदका वृत्ति
वच्छिन्नपर्य्याप्तिकं महानसीयवह्नित्वादिकमपीति तदनतिरिक्तवृत्तित्वमुक्तं॥ यावत्त्वादिकमित्यादिना तावत्त्वोभयत्वपरिग्रहः।
न तया तु वह्नित्वपर्याप्त्याधिकरणपर्याप्तिकेन तु पर्य्याप्ति ॥ समवाय एव सच प्रत्येकवृत्त्यावपीत्यत आह। पर्याप्तिरेवेति। एको घट इ
ति। एकमात्रवृत्तिधर्मावच्छेदेन घटत्वस्य पर्याप्तिं दर्शयितुं। इमौ द्वाविति। उभयवृत्तिधर्मावच्छेदेन वह्नित्वस्य पर्याप्तिरिति दर्शयितुं प्रतीतिसाक्षिक...
ननु प्रत्येकवृत्तित्वव्यासज्यवृत्तित्वाभ्यामेव समानता तथाच वह्निधूमोभयवान् धूमादित्यादाव व्याप्तिः। तदुभयत्वस्य समान स्व
पर्य्याप्तिकवह्निधूमाकाशादित्वानतिरिक्तवृत्तित्वादत आह। त्वादिकमपीति। ननु द्वौ न स्त इति प्रतीतौ प्रतियोगितावच्छेद
कतावच्छेदकतया पर्य्याप्तिरेव संबंधो भासते न समवायः॥ तथासति प्रत्येकसत्त्वेपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि

भवा सत्ताद्वित्वावच्छिन्नाभावो न स्यात् तथा च पर्याप्तिकसंबंधेन उभयत्वाभाववति प्रत्येकवह्न्यादौ वह्नित्वस्य सत्त्वेनैवावच्छेदकत्वाभावे किञ्चि
१५५ त्स्वसमानवृत्तिकत्वमवच्छेदकविशेषणमिति चेत्. तादृशसंबंधविशेषणानतिरिक्तवृत्तित्वस्याभावे एव तदुपादानमित्येको पर्याप्ति
155 संबंधेन द्वित्वस्याभावो न प्रत्येकस्मिन् अन्यथा उभयत्रैव प्रत्येकरूपेण द्वित्वाभावसत्त्वात् इमौ न द्वाविति प्रतीत्यापत्तेः। न च तदुभ
यत्वावच्छेदेन द्वित्ववत्ताज्ञानं विरोधितन्त्रेति वाच्यं तदुभयत्वस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वमादाय तथापि तादृशप्रतीत्या
पत्तेर्दुर्वारत्वात्. तादृशप्रतीतिं प्रत्यपि विरोधित्वकल्पने तदपेक्षया तत्र द्वित्वाभावानभ्युपगम एव लाघवात्. एको न द्वाविति प्रतीते
रेकत्वद्वित्वाधारतावच्छेदकत्वाभावावगाहित्वेनैवोपपत्तेरित्यन्ये। परे तु तादृशसंबंधेन प्रतियोगितावच्छेदकाभाववद्वृत्तित्वमि
त्येकोक्तानां तानामुभयत्वमपि न प्रतियोगितावच्छेदकं स्यात् उभयत्वाभाववत्प्रत्येकद्वयपर्याप्तत्वात्. उभयत्वस्य तथा च त देसत्वात् ३
त्साधारणप्रतियोगिव्यधिकरणाभावस्याभावविशेषणस्यावश्यकत्वे वह्नित्वादावतिव्याप्तिरतः स्वसमानवृत्तित्वं विशेष
णं। न च प्रतियोगिव्यधिकरणत्वे प्रतियोग्यनधिकरणवृत्तित्वं द्वित्वानधिकरणं च प्रत्येकमपीति तद्दोषतादवस्थ्यं परा राम
१५५

ऽभावव

१ प्रकृते प्रतियोगिताव   लाघवेन १

प्यवच्छिन्नसमवायस्यैवावच्छेदकसंबंधत्वेन तत्तत्पर्याप्त्यंशं विहाय समवायसंबंधेन यत्प्रतियोग्यधिकरणं तद्वृत्तित्वस्यैव विवक्षणात्तत्प तत्प्रवेशेन २
द्वाहीनस्त्व इति प्रतीतेनवच्छेदकतानियामकपर्याप्त्यवच्छिन्नसमवाय एव संबंधो भासते। तथा च तेन संबंधेन तदभाववद्विवक्षणेना
२ त गोत्वाभाववत्त्वादेरवच्छेदकसंपत्तये प्रतियोग्यधिकरणत्वविवक्षणापत्तेः॥ अतः पर्याप्त्यंशमनुपादाय समवायादिरूपमेव प्र
तियोगितावच्छेदकतानियामकसंबंधमादाय तदनतिरिक्तवृत्तित्वं निर्वाच्यं तथा सति वह्नित्वादावतिव्याप्तिरतः स्वसमानवृ
त्तिकत्वमिति प्राहुः। घटकं चेति। प्रतियोगितावच्छेदकानतिरिक्ते तत्र अवच्छेदकत्वं स्वरूपसंबंधविशेष इत्यर्थः। एवं चेति स्वसमा
+ नवृत्तित्वविवक्षणे चेत्यर्थः॥ अन्यथा वह्नित्वान्यूनवृत्तितार्णातार्णोभयत्वावच्छिन्नत्वस्य च भ्रमसमानाधिकरणाभावप्रतियोगि
तायाः सत्त्वादसंभव एवं स्यादिति भावः॥ उक्तां व्याप्तिमिति। लघुरूपसमनियतगुरुरूपावच्छिन्नसाध्यकाव्याप्तीत्यर्थः॥ नन्वेवमपि
प्रमेयवान्सत्त्वाद्वानुवामेयत्वादित्यादावतिव्याप्तिः प्रमेयत्वस्यावच्छेदकस्याभावाप्रसिद्ध्या सत्तायाः समवायेनाभाववति साध्य
तावच्छेदकनियामकसमवायेन वृत्तेरप्रसिद्ध्या साध्यतावच्छेदके प्रमेयत्वे सत्तायाश्च तादृशावच्छेदकत्वस्य विरहात्तदवच्छेद

ता   संयोगावच्छिन्नत्वस्य २

तद्दे॰२ तावच्छेदकता

भवा॰ कानतिरिक्तवृत्तिपदेन स्वसमानाधिकरणात्यंताभावप्रतियोगितादृशावच्छेदकतावच्छेदकत्वस्याविवक्षणेपि धूमवान्वह्नेरित्या
१४५ दावतिव्याप्तिः॥ तत्र धूमत्वस्य स्वरूपत एव तदवच्छेदकत्वेनावच्छेदकतावच्छेदकस्याभावात्। स्वसमानाधिकरणाभावप्रतियोगि
दक तावच्छेदकवृत्तितद्व्यक्तित्वं यत्समानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं तत्त्वमवच्छेदकत्वमित्यभिधानेपि दंडिमान्द्रव्यत्वा
165 दित्यादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूतदंडवृत्तितद्व्यक्तित्वानो दंडसमानाधिकरणाभावप्रति
योगितावच्छेदकत्वादवच्छेदकलक्षणासत्त्वेऽदावव्याप्तिः॥ नच दंडित्वसामान्यलक्षणाधीनदंडिमात्रविषयिकज्ञानमे ष्पक
वदंडाभावप्रतियोगितावच्छेदकं तथा च तत्तज्ज्ञानीयदंडवृत्तित्वं दंडसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नाव्या प्ति
प्तिरिति वाच्यं ज्ञात्यतिरिक्तपदार्थस्य किंचिद्धर्मावच्छिन्नस्यैव प्रकारत्वेन दंडिभिन्नाविषयकदंडिविशेष्यकज्ञानत्वेनावच्छेदकत्वे रू
वाच्ये तदपेक्षया दंडत्वेनैवावच्छेदकत्वे लाघवात् अत आह। उक्तत इति। तदवच्छिन्नेति। तदवच्छिन्नाभाववदसंबद्धत्वं यद्विशिष्ट
सामान्यं तत्त्वमित्यर्थः॥ तत्पदं तादृशस्वरूपसंबंधरूपावच्छेदकपरं भवति हि वह्निसमानाधिकरणतादृशाभावप्रतियो गम
१४५

गिनायाः स्वरूपसंबंधरूपं यदवच्छेदकं धूमवत्त्वं तदवच्छिन्नाभाववति प्रमेयधूमत्वविशिष्टं सामान्यं असंबद्धमेवेति प्रमेयधू
मत्वमप्यवच्छेदकं अन्यतादृशधूमत्वाश्रयप्रतियोगिकधूमघटोभयत्वावच्छिन्नाभाववति धूमत्वविशिष्टस्यासंबंधत्वात् धूमत्वो
दावव्याप्तिवृत्तःस्तदवच्छिन्नेति। न च तत्र तादृशावच्छेदकाप्रसिद्धौ नव्याप्तिलक्षणगतिव्याप्तिरिवाचां गगनत्वस्यैव तथात्वात्।
गगनत्वविशिष्टस्य कुत्राप्यधिकरणे संबंधत्वेन तदवच्छिन्नाभाववत्त्वैवं धत्वात् धूमत्वावच्छिन्नाभावस्याप्रसिद्धिकालघवच्छेद
नधूमवति सत्त्वात् गगनत्वरूपतादृशावच्छेदकमादाय धूमत्वादिकम प्यनवच्छेदकं स्यादतः प्रतियोगिव्यधिकरणत्वेनाभा
वो विशेष्यः। तदर्थं च साध्यतावच्छेदकसंबंधेन तत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणत्वं तेन प्रतियोगिता
वच्छेदकं स्यादतः प्रतियोगितावच्छेदकावच्छिन्नस्यैकस्यापि तत्सामान्यस्यैवेत्यादिविकल्पोक्तदोषानवकाशः। न वा समवायेन
धूमानधिकरणपर्वतादौ धूमत्वविशिष्टस्यासंबंधत्वेपि नैव धूमत्वस्यावच्छेदकत्वक्षतिः संबंधसामान्येन घटरूपसमानाधि
करणात्यंताभावप्रतियोगितावच्छेदकपटत्वाद्यवच्छिन्नस्यानधिकरणे गगनादौ घटत्वावविशिष्टादेरसंबंधत्वात् च

नव्या यं घटत्वान् घटरूपादित्यादौ नाव्याप्तिर्नवाद्रव्यं गुणादित्यत्र पृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावस्य तादृशस्य प्रतियोगितावच्छेदकी
१४६ भूतपृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वावच्छिन्नप्रतियोगिताकस्य द्रव्यत्वरूपप्रतियोगिव्यधिकरणस्याधिकरणे गुणादौ द्रव्यत्व
त्वविशिष्टसामान्यस्यासंबंधत्वेपि ज्ञप्तिरिति। तदवच्छिन्नाभाववोपि साध्यतावच्छेदकसंबंधसामान्ये इत्यादिक्रमेण प्रतियोगि
140 समानाधिकरणः। तेन कालो घटवान् कालपरिमाणादित्यत्र तादृशाभावप्रतियोगितावच्छेदकीभूतगगनत्वावच्छिन्नाभावस्य प्रति
योगिव्यधिकरणत्वाप्रसिद्ध्या न गगनत्वस्य पारिभाषिकावच्छेदकत्वक्षतिः। तादृशाभाववदसंबद्धत्वं च साध्यतावच्छेदकसंबंधेन
तादृशाभाववदसंबंधत्वसामान्याभावः तेन गगनत्वादिविशिष्टसामान्यस्यापि गगनत्वावच्छिन्नाभाववति नादात्म्येन वृत्त्यनि
यामकसंबंधादिना संबंधात् पारिभाषिकावच्छेदकाप्रसिद्धौ न व्याप्तिलक्षणासंभवः। न वा तादृशाभावप्रतियोगितावच्छेद
कमहानसीयवह्नित्वावच्छिन्नाभाववति जलादौ वह्नित्वविशिष्टसामान्यस्यासंबंधत्वेपि वह्निमान् धूमादित्यादावव्याप्ति
ः। तादात्म्येन साध्यतायां तेन संबंधेन वृत्तेरप्रसिद्धेः असंबंधत्वेति। स्वविशिष्टेतिकारणाच्च गुणान्यत्वे विशिष्टसत्तावान् ज्ञा राम १४६

धित्वात्

तेरित्यत्रविशिष्टसत्तात्वावच्छिन्नाभाववतिपुरोविशिष्टसत्तात्वाश्रयीभूतसत्तायाः संबंधत्वेपि विशिष्टसत्तात्वस्यानवच्छेदक
२ त्वक्षतिः।स्वविशिष्टत्वंचसाध्यतावच्छेदकताघटकसंबंधेनकालोदंडिमाध्वंसवान्वाकालपरिमाणमित्यादौवृत्तितानिया
मकसंयोगेनकालिकसंबंधेनवाध्वंसत्वीयविशेषणतावासाध्यतावच्छेदकतायांनादृशावच्छेदकाप्रसिद्धेः गगनत्वादेस्तेनसं ताविशेषण
ताघटक बंधेनावृत्तेः।नापिप्रतियोगितावच्छेदकीभूतसंबंधेनकंबुग्रीवादिमत्त्वान्नप्रमेयत्वादित्यत्रकंबुग्रीवादिमत्त्वस्यगुरुतयानव
च्छेदकत्वेनघटत्वनिष्ठप्रतियोगितावच्छेदकताघटकीभूतसमवायेनकंबुग्रीवादिमत्त्वस्यावृत्तेरप्रसिद्धेरनवच्छेदकत्वा
पातात्वह्निमान्धूमादित्यादौविषयितयावह्नित्ववतज्ज्ञानाभावप्रतियोगितावच्छेदकीभूतवह्नित्वविशिष्टज्ञानादेः तदव ता
च्छिन्नाभाववत्यसंयुक्तत्वात्वह्नित्वादेरवच्छेदकत्वापाताच्च।नापिसंबंधसामान्येनघटत्वावच्छिन्नाभाववतिगगनत्वावच्छिन्ना
भाववतिचकालिकसंबंधेनघटत्वोगगनत्वादिविशिष्टस्यसाध्यतावच्छेदकीभूतसंयोगेनसंबंधत्वात्तत्तादृशावच्छे
दकाप्रसिद्ध्यासंभवात्नापिसाध्यतावच्छेदकताघटकप्रतियोगितावच्छेदकताघटकान्यतरसंबंधेनकालिकसंबंधे

भवा
१४७
(147)

नदंडविशिष्टस्य कालिकसंबंधेन साध्यतायां कालपरिमाणोहेतौ तादृशावच्छेदकाप्रसिद्ध्यापत्तेः तादृशप्रतियोगितावच्छे
दकीभूतगगनत्वादेः कालिकसंबंधेनाश्रयस्य घटादेः तदवच्छिन्नाभाववत्तिकालादौ संबंधत्वात् कालभेदविशिष्टस्य
गगनत्वस्य कालिकसंबंधेन घटादिवृत्तितयाऽन्यतरसंबंधेन तद्विशिष्टसामान्यस्य तदवच्छिन्नाभाववदसंबद्धतयात
त्रावच्छेदकत्वप्रसिद्धावपि तादात्म्येन धूमसंबंधिनः संयोगेन साध्यतायां व्यभिचारिण्यपि व्याप्तेः । तादृशप्रतियोगितावच्छे
दकीभूततदवच्छिन्नाभाववद्भूतधूमत्वावच्छिन्नाभाववत्तिप्रतियोगितावच्छेदकताघटकसमवायेन धूमविशिष्टस्य परमा
ण्वादेः संयुक्तत्वेन धूमादेरनवच्छेदकत्वात् । तथापि तदवच्छिन्नाभाववृत्तियेनयेनसंबंधेन यद्विशिष्टसामान्यमसंबद्धं तेन त
नसंबंधेन तत्प्रकारकज्ञानत्वावच्छिन्नभिन्नसाध्यतावच्छेदकताघटकसंबंधेन तद्धर्मप्रकारकज्ञानं तद्धर्मावच्छिन्नसामानाधि
करण्यं व्याप्तिः । इति फलितार्थः । विषयितादिसंबंधेन वह्नित्वप्रकारकज्ञानत्वावच्छिन्नभिन्नं समवायेन वह्नित्वप्रकारक
ज्ञानमपीति वह्निमान्धूमादित्यादौ वह्नित्वेनावच्छेदकत्वसंभवः । अत एव प्रमेयधूमत्वप्रकारकज्ञानत्वावच्छिन्न राम
१४७

स्य महानसीयवह्नेरसंबद्धत्वात् सामान्येति । पर्वतीयादिवह्नेर्वह्नित्वावच्छिन्नप्रतियोगिताकाभाववति संबंधत्वाद्व्याप्तिः । तत्र न कथं न्यूनविशिष्ट

भेदाभावात्स्वरूपसंबंधरूपावच्छेदकत्वस्य लक्षणेऽप्रवेशेपि न तत्रातिव्याप्तिसंभव इत्यभिप्रेत्य तादृशलघुरूपाघटित

कंबुग्रीवादिमत्वादिकमुक्तवानवच्छेदकत्वनिरूपणपूर्वपक्षोपक्रमे दीधितिकारः विवेचयिष्यते चेदमपि कीदृशमुख्यविशेष्यांशे [illegible]

साधनसमानाधिकरणाभावप्रतियोगितावच्छेदकप्रकारकज्ञानाभिन्नसाध्यतावच्छेदकताघटकसंबंधेन यत्प्रकारके

ज्ञानेन तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति बोध्यं अत एव एतद्दृष्टिमानेतद्भूतलत्वादित्यादौ नान नन्वेवमपि पक्षसाध्यतावच्छे व्याप्तिः

दकं साधनसमानाधिकरणाभावप्रतियोगितावच्छेदकप्रकारकज्ञानस्यैव विषयः न चाव्याप्तिरिति चेत् न यत्प्रकारकत्वावच्छिन्न ज्ञान

व कारणतापारिभाषिकावच्छेदकप्रकारकत्वावच्छिन्नकारणताभिन्नातदवच्छिन्नसामानाधिकरण्यस्यैव विवक्षितत्वात् महा

नसीयवह्नित्वावच्छिन्नप्रतियोगिताकतादृशाभाववति वह्नित्वविशिष्टसत्तावान्जातेरित्यत्रातिव्याप्तिः । विशिष्टस्यानतिरेके

ण विशिष्टसत्तात्वावच्छिन्नाभाववति विशिष्टसत्ताया अपि संबन्धत्वात् न च तदवच्छिन्नाभाववदाधेयतानवच्छेदकत्वेन तदर्थः ।

प्रमेयवह्निमान् धूमादित्यत्राव्याप्तेः तादृशमहानसीयवह्नित्वाद्यवच्छिन्नाभाववति पर्वतादौ प्रमेयवह्नित्वविशिष्टस्यास

भवा·
१४८
148b

बंधत्वेपि प्रमेयवह्नित्वस्य गुरुतया आधेयतानवच्छेदकत्वात् प्रमेयवह्निमान्पर्वत इति प्रतीतिबलात् गुरुरूपस्याप्याधेयताव
च्छेदकत्वस्वीकारेपि सत्तावान्प्रमेयत्वादित्यत्रातिव्याप्तिः तत्र सत्तात्वावच्छिन्नाभाववति ज्ञानत्वादौ समवायेन हेतोरप्रसिद्धत
यासत्तात्वस्य पारिभाषिकावच्छेदकत्वाभावादित्यरुचेराह। स्वविशिष्टेति। स्वं पारिभाषिकावच्छेदकत्वेनाभिमतं तद्विशिष्टत्वं
च पूर्वं निरुक्तसंबंधेन बोध्यं तेन न पूर्वोक्तदोषः तत्पदं तादृशस्वरूपसंबंधरूपावच्छेदकपरं तथा च हेतुसमानाधिकरण
तादृशाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकं तत्पारिभाषिकावच्छेदकमित्यर्थः। वि
शिष्टसत्तात्वाश्रयसत्तासंबंधिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वाद्विशिष्टसत्तात्वस्यानवच्छेदकत्वापत्तिरतः। स्ववि
शिष्टेति। प्रतियोगितावच्छेदकमात्रस्यैव संबंधांतरेण स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वात्तादृशावच्छेदका
प्रसिद्ध्या व्याप्तिलक्षणासंभव इत्यतः साध्यतावच्छेदकसंबंधेन संबंधित्वं वाच्यं। संयोगेन साध्यतायां तादृशप्रतियोगितावच्छे
दकमात्रस्यैव स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वादवच्छेदकाप्रसिद्ध्याऽव्याप्तिः। अतः प्रतियोग्यधिकर राम
१४८

णत्वमभावे देयं। साध्यतावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वं तदर्थः। तेन वह्निमान्धूमा
दित्यादौ वह्निसमानाधिकरणघटाद्यभावस्यापि कालिकादिसंबंधेन प्रतियोगिसमानाधिकरणत्वात्। तादृशाभावप्रति
योगितावच्छेदकीभूतघटत्वादेर्वह्नित्वादिविशिष्टसंबंधिनिष्ठोयः संबंधसामान्येन प्रतियोगिव्यधिकरणोऽन्नावृस्तत्प्रतियो
गितानवच्छेदकत्वेपि नासंभवः। न च शब्दवान्गगनत्वादित्यादौ शब्दसमानाधिकरणस्य घटत्वाद्यभावस्य केनापि संबंधेन प्र
तियोगिसमानाधिकरणत्वाभावात् घटत्वत्वादेः शब्दत्वविशिष्टसंबंधितिष्ठाभावप्रतियोगितावच्छेदकस्यैव सत्वात् शब्दत्वा त
त देर्नावच्छेदकमिति त्वासंभव इति वाच्यं। घटत्वादेरपि स्वाश्रयसंयोगादिसंबंधेन गगनादिवृत्तित्वात्। एवं समवायेन गगना
द्यभावस्यापि शब्दसमानाधिकरणस्य तादात्म्येन स्वप्रतियोगिसमानाधिकरणस्य तादात्म्येन स्वप्रतियोगिसमानाधिक
रणत्वात्। प्रतियोगिव्यधिकरणतादृशाभावान्तरप्रतियोगितानवच्छेदकत्वात्। गगनादेस्तमादायापि शब्दत्वस्यावच्छेद
कत्वं बोध्यं। तादात्म्यादिसंबंधेन साध्यतायामव्याप्त्यादिवारणाय प्रतियोगिपदं संबंधित्वस्यैव तदर्थतया वाच्यत्वात्। न चैवं
त्वा

ताव

भवा. सर्वस्यैव धर्मस्य यत्किंचित्संबंधेन सर्वत्रसत्त्वात् प्रतियोगिव्यधिकरणाभावस्यैवाप्रसिद्धिः। विशिष्टप्रतीतिविषयस्यै
१४९ वसंबंधत्वात्सर्वस्य च सर्वत्र विशिष्टप्रतीतौ मानाभावादेतादृशसंभवस्यानपायाच्चेति। सत्तात्वविशिष्टसंबंधिनिष्ठो यः प्र
तियोगिव्यधिकरणोऽभावस्तत्प्रतियोगितानवच्छेदकं विशिष्टसत्तात्वमपीति सत्ताभावाज्ञाने रित्युच्चाव्याप्तिरतः प्रति
149 योगितावच्छेदकावच्छिन्नेति। प्रतियोगितानवच्छेदके त्यत्राऽवच्छेदकत्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकता
घटकसंबंधेन बोध्यं। तेन विषयितासंबंधेन घटत्वादिविशिष्टस्य ज्ञानादेः संयोगेनाभावस्य प्रतियोगिव्यधिकरणस्य घटत्वा
प्रतियोगि दिविशिष्टसंबंधिनिष्ठस्य प्रतियोगितायाविषयितासंबंधेनाऽवच्छेदकत्वेपि घटत्वादेर्नैतादृशावच्छेदकत्वाप्रसिद्धिर्विषयि
तया धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य वह्नित्वादेर्वह्नित्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायाः समवा
येनानवच्छेदकत्वात् वह्नित्वादेर्नैतादृशावच्छेदकत्वान्निर्वाहान्नन्वेवं हेतुसमानाधिकरणाभावप्रतियोगिव्यधिकरणत्व
स्य प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वविवक्षणं व्यर्थं जातीसमानाधिकरणाभावप्रतियोगितावच्छेद राम
प त्यत्र·२ १४९

कं यद्विशिष्टसंबंधिनिष्ठताद्दशाभावप्रतद्व्याप्यत्वत्वं तदवच्छिन्नाभाववत्तिविशिष्टसत्तात्वविशिष्टस्यासंबंधत्वात् द्रव्यत्वत्वस्य वि
शिष्टसत्तात्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाच्च लक्षणाद्वयेपि ताद्दशद्रव्यत्वाभावमादाय वृविशिष्टसत्तात्व
स्यप्रतियोगितावच्छेदकत्वेन गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिविरहादिति ॥ अथ चरमः ॥ प्रतियोगितावच्छेदका
वच्छिन्नानुपादाने हि यत्प्रतियोगिताविशिष्टस्यानधिकरणं हेत्वधिकरणं तत्प्रतियोगितावच्छेदकं यद्विशिष्टसंबंधिनिष्ठताद्द
शाभावप्रतियोगितानवच्छेदकं तद्भिन्नं यत्साध्यतावच्छेदकमित्यर्थः तथा च व्याप्तिः ॥ वह्निमान् धूमादित्यादौ महानसीयव
ह्निनिष्ठाभावस्य वह्नित्वावच्छिन्नप्रतियोगिता तद्विशिष्टमहानसीयवह्नेरनधिकरणं पर्वतादि तत्प्रतियोगितावच्छेदकवह्नित्वस्य धूमाधिकरणं
वह्नित्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वेन वह्नित्वादेरपि पारिभाषिकावच्छेदकत्वात् प्रतियोगिभेदेप्य
काभावप्रतियोगितायाः अभेदे तु गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिः ॥ विशिष्टसत्ताभावस्य द्रव्यत्वाभावस
मनियततया एकत्वेन द्रव्यत्वनिष्ठप्रतियोगितायाः अपि सत्तानिष्ठतया गुणादेः प्रतियोगिताविशिष्टानधिकरणत्वेन द्रव्य

१सत्ताभि

नचा गुरुत्ववत्त्वीभ्यत्वविशिष्टसत्ता [illegible] ऽभावादेः प्रतियोगिप्रसिद्धिघनं दोषः। तत्र विजातीयत्वजातिरिक्तावच्छिन्नावच्छेदकतायाः प्रसिद्धौ एतदभिधानात्

त्वाभावस्यापि प्रतियोगिव्यधिकरणत्वाभावात्। न चैवं समवायेन गगनाभावस्य संयोगेन सत्ताभावाभिन्नतया समवायेन

मथा· १५० प्रतियोगिव्यधिकरणस्याभावस्य जातिमत्यसंभवात् कथमतिव्याप्तिरिति वाच्यं तथापि लक्षणस्यासंभवात्। संयोगे

न घटाद्यभावस्यापि घटवृत्तित्वविशिष्टप्रमेयत्वाभावाभिन्नतया तत्प्रतियोगिना विशिष्टप्रमेयत्वस्य केवलान्वयितया प्र

150 तियोगिव्यधिकरणाभावस्यैवाप्रसिद्धेः। न च प्रतियोगितावच्छेदकभेदेनैव प्रतियोगिताभिद्यत इति द्रव्यत्वत्वावच्छिन्नप्रतियोगि

तास्या बाधकत्वादिति वाच्यं विशिष्टसत्तात्वावच्छिन्नप्रतियोगिताभिन्नैवेति वाच्यं। मानाभावात् प्रतीतिवैलक्षण्यस्यावच्छेदक

भेदेनैवोपपत्तेः। न चैवं सति समवायवदेकैव प्रतियोगिता स्याल्लाघवादिति वाच्यं। इष्टत्वात्। एवं सति तत्प्रतियोगितावच्छेद

कभेदेन प्रतियोगिताभेदेऽपि एतद्रूपसमवेतत्व एतद्रूपभिन्नयावत्समवेतस्याकाशसंयुक्तस्याकाशातिरिक्तयावद्द्रव्यसंयु

क्तस्य चाप्रसिद्ध्या प्रतियोगिव्यधिकरणतादृशाभावासंभवात् अतो हेतुसमानाधिकरणाभावेऽपि प्रतियोगितावच्छेदका

वच्छिन्नासमानाधिकरणत्वं वाच्यमिति दिक्। ननु महाकालीयघटवान् कालपरिमाणादित्यत्राव्याप्तिः। तादृशप्रतियो राम १५०

एतद्रूपान्यत्वविशिष्टसत्तावान् जातेः आकाशान्यत्वविशिष्टद्रव्यवान् मूर्तत्वादित्यादौ समवायेन संयोगेन [illegible] व्याप्तिः ॥३॥

गितावच्छेदकीभूतगगनत्वस्यागगनत्वविशिष्टसंबंधप्रसिध्या पारिभाषिकावच्छेदकत्वाभावात् तेन च संबंधस्यामा
त्वेन स्वविशिष्टसंबंधित्वं वाच्यं। तथा च तादात्म्येन घटस्य तियामक संयोगेन वा गगनत्वविशिष्टसंबंधी असिद्ध एवेति वा
च्यं। तादृशसंबंधिनि कालिकसंबंधे न गगनाभावस्य सत्वात्तत्तत्प्रतियोगितावच्छेदकत्वेन गगनत्वस्यावच्छेदकत्वाभावा
वनाच्य: त्। न च तत्विशिष्टाभावोपि संबंधसामान्येन गगनसंबंधिनि च न तेन संबंधेन गगनाभाव इति वाच्यं धूमसमानाधिकरणा
घ तादृशाभावप्रतियोगितावच्छेदकीभूतं डंवत्वत्वादेर्वह्नित्वविशिष्टसंबंधिनि संबंधसामान्येन योग्याकाशाभावस्तत्प्र ऽत्रानागगनाभावा
तियोगितानवच्छेदकत्वात् वह्नित्वादेरप्यवच्छेदकत्वापातात्। नापि तादात्म्येन संबंधित्वं प्रतियोगित्वं च वाच्यं विशिष्ट
सत्तात्वस्य सत्तात्वविशिष्टसंबंधिनिष्ठभेदप्रतियोगितानवच्छेदकतया सत्तावान् जातेरित्यत्र सत्तात्वस्यावच्छेदकत्वा
पातात्। यद्वा हेतुसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदको यः संबंधस्तेन संबंधेन स्वविशिष्टसंबंधित्वं प्र
तियोगित्वं वाच्यं। भवति हि कालपरिमाणसमानाधिकरणो गगनभेदः कालिकसंबंधेन प्रतियोगिव्यधिकरः।

मवा
१५१
151

णा॥ तत्प्रतियोगितावच्छेदकीभूत तादात्म्य संबंधेन यत्न गगनत्वविशिष्टसंबंधितन्निष्ठो यो भेदस्तत्प्रतियोगितानव
च्छेदकगगनत्वमिति। न च विशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकभेदस्यापि गुणकर्मनिष्ठतया तत्प्रतियोगितावु
च्छेदकतादात्म्येन संबंधेन सत्तात्वाविशिष्टसंबंधिनिवृत्तेः। यो भेदस्तत्प्रतियोगितानवच्छेदके विशिष्ट
सत्तात्वमिति सत्तावान् जातेरित्यत्र व्याप्तिरिति वाच्यं विशिष्टसत्तात्वस्य गुणत्व यावज्जातिसमानाधिकरणतादृशभेद
प्रतियोगितायाः सत्तात्वे एवावच्छेदात् तत्र वह्निमान् धूमादित्यादौ साध्यतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरण
धूमसमानाधिकरणसमवायसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकं रूपं त्वं तत्पत्तिकाले अवयवविनिरू
पसामान्याभावस्य सत्त्वात्। न च प्रतियोगितावच्छेदकीभूत समवाय संबंधेन वह्नित्वाविशिष्टसंबंधिनिष्ठो यः समवे
तायावच्छिन्नप्रतियोगिताकोऽभावः तत्प्रतियोगितानवच्छेदकमिति व्याप्तिः। न च स्वविशिष्टसंबंधिनिष्ठाभा
वप्रतियोगिव्यधिकरणत्वं साध्यतावच्छेदकसंबंधेन वह्न्यभावप्रतियोगितावच्छेदकसंबंधेन तथा च वह्नित्व राम
१५१

विशिष्टसंबंधिनिष्ठो योरूपाभावः स संयोगेन स्वप्रतियोगिव्यधिकरणाएवेति तत्प्रतियोगितावच्छेदकं रूपत्व
मिति वा व्याप्तिरिति वाच्यं। इदं जलद्व्यणुकवृत्तजलद्व्यणुकसंयोगात्। इत्यत्र संयोगेन साध्यतायां जलद्व्यणुकस
योगसमवायाधिकरणत्वादृशाभावप्रतियोगितावच्छेदकं रूपत्वं तत्प्रतियोगितावच्छेदकीभूतसमवायेन जलद्व्य
णुकत्वविशिष्टसंबंधिनि जलपरमाणौ समवायावच्छिन्नप्रतियोगिताकः संयोगेन प्रतियोगिव्यधिकरणो यो घ
टाद्यभावस्तत्प्रतियोगितानवच्छेदकमित्यव्याप्तेः। जलपरमाणौ रूपसामान्याभावस्याभावादिति। अत्र ब्रूमः। यत्रा
वच्छेदके तदवच्छिन्नाभाववत्त्वं बधत्वं प्रसिद्धं तत्र तदवच्छिन्नप्रतियोगिताकाभाववद्वदसंबद्धस्वविशिष्टसामान्यं कत्वरूप
पारिभाषिकावच्छेदकत्वं निर्वाच्यम्। यथा कालो घटवान् कालपरिमाणादित्यादौ गगनत्वमवृत्तत्वं तदवच्छिन्नप्रतियो
गिताकाभाववद्वदसंबद्धत्वजातिमात्रेयत्वादित्यादौ ~~[illegible]~~ न त्वत्र स्वविशिष्टसंबंधिनिष्ठत्वादिरूपमवच्छेदकत्वं वाच्य
मिति व्यवस्थितविकल्पानुसारेणायं ग्रंथः। तेन कालो घटवान् कालपरिमाणादित्यादौ गगनत्वविशिष्टसंबंधि

२ तादृशप्रतियोगितावच्छेदक

भवा नोऽप्रसिद्धत्वेपि तदवच्छिन्नाभाववदित्यादिरूपस्यैवाप्रसिद्धत्वान्न लक्षणासंभव इति केचित् । साध्यतावच्छेदकसंबंधसा
१५३ मान्ये यद्विशिष्टप्रतियोगिकत्वयदवच्छिन्नाभाववदनुयोगिकत्वोभयाभावसत्त्वं पारिभाषिक[redacted]वच्छेदकं कालोघ
टवान्कालपरिमाणादित्यत्र तादृशाभावप्रतियोगितावच्छेदकं गगनत्वं कालिकसंबंधसामान्ये च गगनत्वविशिष्टप्र
तियोगिकत्वतदवच्छिन्नाभाववदनुयोगिकत्वोभयाभावसत्त्वाद्गगनत्वस्य पारिभाषिकावच्छेदकत्वक्षतिः । गगनाभा
वस्य प्रतियोगिव्यधिकरणत्वं च शब्दोंतरीत्या निर्वाच्यो स्वविशिष्टशिष्टप्रतियोगिकत्वे च विशिष्ट्योपादेयं तेन प्रमेयधूमत्ववि
शिष्टप्रतियोगिकत्वघटितोभयाभावस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि न क्षतिः । इत्थं च तादृशोभयाभावकूटवल
क्षणाघटकत्वेन विशिष्टमहानसीयवह्निप्रतियोगिकत्वमहानसीयवह्नित्वावच्छिन्नाभाववदनुयोगिकत्वोभयाभा
वस्य संयोगसामान्ये सत्त्वेपि न वह्नित्वस्यावच्छेदकत्वक्षतिः इदं त्ववधेयं हेतुसमानाधिकरणाभावस्य [redacted]
व्यधिकरणाभावस्य प्रतियोगिव्यधिकरणत्वनिरुक्तौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वमपहाय यद्धर्म राम १५२

वह्नित्व · २

विशिष्टप्रतियोगिकत्वमात्रमुपादेयं तथाच साध्यतावच्छेदकसंबंधसामान्येयद्धर्मविशिष्टप्रतियोगितानवच्छेदकावच्छि-
न्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचितद्व्यक्त्यनुयोगिकत्वोभयाभावकूटवत्त्वं तद्धर्मभिन्नं यत्साध्यतावच्छेदकं त-
दवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति एतावतैव प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तेः कालोघटवान् कालपरिमाणा-
दित्यादौ चाव्याप्तेर्वारणात् तादृशोभयाभावघटितलक्षणे नादरणीयं धूमसंयोगसामान्ये प्रमेयधूमत्वविशिष्टतत्तत्प्र-
तियोगिकत्ववह्न्यधिकरणायोगोलकानुयोगिकत्वोभयाभावकूटसत्त्वेनातिव्याप्तेरभावात् कूटपददानाच्च संयोगसा-
मान्ये वह्नित्वविशिष्टमहानसीयवह्निप्रतियोगिकत्वस्य अधिकरणीभूतपर्वतानुयोगिकत्वोभयाभावत्वेपि वह्नित्ववि-
शिष्टपर्वतीयवह्निप्रतियोगिकत्वपर्वतानुयोगिकत्वोभयवत्त्वात् पर्वतीयवह्निसंयोगस्य तादृशोभयाभाववत्त्वात् न
तादृशोभयाभावकूटवत्त्वमिति न वह्निमान् धूमादित्यत्राव्याप्तिरिति केचित् । तादात्म्यसाध्यतावच्छेदकान्यतरसं-
बंधेन यत्स्वविशिष्टसंबंधितन्निष्ठाय तदन्यतरसंबंधेन प्रतियोगिव्यधिकरणोऽनादरस्तत्प्रतियोगितानवच्छेद-

भवा कतत्कत्वमित्यर्थः। गगनत्वविशिष्टताद्दशसंबंधिनि गगने वर्त्तमानोयः कालिकसंबंधे न[illegible]
१५३ [illegible] गगनाभावः स तादात्म्ये प्रतियोगिसमानाधिकरणएवेति न तमादाय गगन न
नत्वस्यावच्छेदकत्वक्षतिः सत्तावान्नातिरिक्तान्यतरसंबंधेन तादात्म्ये समवाये [illegible] नेच गुणकर्मान्यसत्तायाश्च असं [illegible]
153 बंधिनि गुणे सत्तात्वविशिष्टे संबंधिनि वर्त्तते योऽभावः तत्प्रतियोगितावच्छेदकमेव गुणकर्मान्यसत्तात्वमिति ना
व्याप्तिरित्याहुः। तदपि न साधीयः। आकाशशब्दसमानाधिकरणवह्निमत्शब्दादित्यत्र तत्त्वनियामकसंयोगेन सा
ध्यतायाम व्याप्तेः। भवति हि स शब्दसमानाधिकरणताद्दशाभावप्रतियोगितानवच्छेदकं [illegible] गगनत्वं
तद्वेताद्दशसंबंधेन शब्दसमानाधिकरणवह्नित्वविशिष्टसंबंधिनि गगने वह्नेश्च वर्त्तते यस्ताद्दशसंबंधेन प्रति
योगिव्यधिकरणाभावस्तत्प्रतियोगितानवच्छेदकमिति वह्नेः साध्यतावच्छेदकीभूततत्त्वनियामकसंबंधेन ता
द्दशगगनाभावस्य प्रतियोगिव्यधिकरणत्वाभावात्। अन्ये तु। येन संबंधेन स्वविशिष्टसंबंधियद्वृत्तेन तेन सं एम

येन १५३

नन्वेतादात्म्येन गगन
स्य च संबंधत्वेन ·२

बंधेन प्रतियोगिव्यधिकरणो यः तन्निष्ठो योऽभावस्तत्प्रतियोगितानवच्छेदकतत्कत्वमित्यर्थः। न च इदं सर्ववत्प्रमेय
त्वात् इति समवायादिना साध्यतायां व्यभिचारिणि सत्त्वात् तस्य पारिभाषिकावच्छिन्नप्रतियोगिव्यधिकरणाभावस्याप्रसिद्धे
रिति वाच्यं। विषयतासंबंधेन निरुक्तप्रतियोगिप्रतियोगिकत्वस्वविशिष्टसंबंधानुयोगि छेदकत्वं न स्यात् विषयतया
कालिकेन वा सर्वत्वविशिष्टसंबंधिनि विषयतया कालिके सर्वत्वविशिष्टसंबंधिनि विषयतया कालिकेन वा प्रतियोगि
व्यधिकरणाभावस्याप्रसिद्धेरिति वाच्यं। विषयतासंबंधेन निरुक्तप्रतियोगिप्रतियोगिकत्वस्वविशिष्टसंबंधानुयोगिक
त्वोभयाभावस्य सत्त्वात् उक्तरीत्या ईश्वरज्ञानान्यत्वविशिष्टघटाभावे एव प्रतियोगिवैयधिकरण्यस्य प्रसिद्धिसंभवा
त्। साध्यतावच्छेदकसंबंधेन संबंधित्वं प्रतियोगित्वं च वाच्यमिति चाग्रेतनलक्षणाभिप्रायेण तोननं तद्विरोध इत्यादु अत्र
1 ः न व्याप्त्याकारो वा वर्हितविकल्पार्थः। तेन यत्र तादृशप्रतियोगितावच्छेदकसाध्यतावच्छेदकसंबंधेन स्वविशिष्टसं
बंधी अप्रसिद्धस्तत्र नातद्वेच्छिन्नाभाववदसंबंधस्य विशिष्टसामान्यकत्वमेवोपादेयं। यत्र यदवच्छिन्नाभाववतिसा ३०

स्थ२

भवा० ष्यतावच्छेदकसंबंधेन स्वविशिष्टसंबंधी अप्रसिद्धस्तत्र तदवच्छिन्नाभाववत्संबंधस्वीकिसंबंधत्वमप्रसिद्धं। तत्र स्वविशि
१५४ ष्टसंबंधिनिष्ठाभावेत्यादिकमेवोपादेयं। तेन कालो घटवान्कालपरिमाणादित्यादौ गगनत्वविशिष्टसंबंधिनोऽप्रसिध्यातद
154 वच्छिन्नाभाववद्वृत्त्यादिकमेवोपादेयं। सत्तावान्मेयत्वादित्यादौ तु सत्तात्वावच्छिन्नाभाववत्तिसामान्यादौ समवायेन संबंधत्वस्या
प्रसिद्ध्या स्वविशिष्टसंबंधीत्यादिरूपमेवोपादेयमिति। वस्तुतस्त्विति ईत्यादिलक्षणद्वयलक्षणमेव व्यवच्छिन्नवैकल्पिकमेवकल्प
ः अत एवमितिर्वा एककल्पतासूचनाय शेषेतदनतिरिक्तवृत्तित्वमित्यक्तं एवं चद्दूषणाभासमाचा [redacted] नाभासाः नाद
रणीया इति प्राञ्चः प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यत्रारुचिं प्रकाशयति। अत एवेति। तदवच्छिन्नाभाववद्वृत्त्यादि
विवक्षणादेवेत्यर्थः। हल्यवृत्तिकत्वेपीत्यपि रक्षुपगमे तेनाद्धित्वादिवह्निशिष्टधर्मस्यापि विशेष्याविशेषणसंबंधेषु पर्य्या
प्तत्वस्वीकारेनायं दोष इति सूचितं। अत्रेदं चिंत्यं। हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबंधिनिष्ठा
भावप्रतियोगितानवच्छेदकं तद्भिन्नं यत्साध्यतावच्छेदकमित्यक्तौ विशिष्टस्यानतिरिक्तत्वमते वह्निमान्धूमादित्यादावव्याप्ति राम
१५४

त्ववह्नित्वेनप्रतीकाफः

स्यभेद

ः।महानसीयवह्नित्वस्यपारिभाषिकावच्छेदकत्वेनवह्नित्वेतद्भेदाभावात्तानचावच्छेदकत्वंव्यासज्यवृत्तिइतितदवच्छिन्नभेदोवह्नित्वे
वृत्तेतएवेतिवाच्यं।स्वरूपसंबंधरूपावच्छेदकत्वंवह्निन्प्रतियोगित्वेनप्रकृतलक्षणेऽप्रवेशात्·किंतुपारिभाषिकावच्छेदकभिन्नत्वेन
तस्मात्तद्घटितंयत्साध्यतावच्छेदकमितिवक्तव्यांतद्घटितत्वंचतत्विषयकत्वंवाच्यं·तेनमहानसीयत्वविशिष्टत्वेनवह्नित्वावि
षयकप्रतीत्यावह्नित्वस्याविषयीकरणात्प्रतीतिविषयत्वंभवतिचवह्नित्वंमहानसीयवह्नित्वाविषयकप्रतीतौविषयस्तादृशपारि
भाषिकावच्छेदकतायेनरूपेणतेनरूपेणतद्विषयकप्रतीतित्वंवाच्यं·तेनमहानसीयत्वविशिष्टत्वेनवह्नित्वविषयकप्रतीत्यावह्नि
त्वस्यविषयीकरणान्नवह्नित्वस्यतद्घटितत्वमिति॥यदिचएकमात्रप्रतिमंवीजातीयमंकुरद्वयंतत्परस्पराविषयकप्रतीतिविषय अ
इतिएतदंकुरस्यतादात्म्येनसाध्यतायांतदंकुरत्वस्यपारिभाषिकावच्छेदकत्वेएतदंकुरत्वेतद्घटितत्वंतद्विषयकप्रतीतिविषयत्वरूपंना
स्तीतिसंभाव्यते।तदाप्रकारतासंबंधेनयद्धर्मावच्छिन्नकार्यतातोभिन्नायद्धर्मावच्छिन्नकार्यताभवतीतिवाच्यं।भवतिहिएतदंकुरत्वप्र
कारकत्वावच्छिन्नायाकार्यतातदंकुरत्वप्रकारत्वावच्छिन्नकार्यताभिन्नावैशिष्ट्यविशेषणज्ञानस्यविशेषणतावच्छेदकप्रकारक

क

त्वंता।

भया
२५५

निरूपकस्य वा कारणतायां प्रमेयधूमत्वादेरपि कार्यतावच्छेदकत्वं प्रसिद्धमिति मतम्॥ ननु प्रतियोगितार्धमिको भयाभाव विवक्षायां प
द्धमान्न्यूनवृत्तिधर्मावच्छिन्नत्वोक्तौ सत्तावान्जातेरित्यत्र सत्तातान्यूनवृत्तिगुणान्यत्वविशिष्टसत्तात्वावच्छिन्नत्वस्य समवायसंबंधावच्छिन्न
त्वस्य च जातिसमानाधिकरणाभावप्रतियोगितायां सत्त्वादव्याप्तिरत आह। एवमिति। स्वविशिष्टेति॥ स्वं साध्यतावच्छेदकत्वेनाभि
मतं इत्थं च तादृशप्रतियोगितासामान्ये यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं यत्संबंधावच्छिन्नत्वोभयाभाव
स्तेन धर्मेण तेन संबंधेन च व्यापकत्वमिति बोध्यं। गुणान्यत्वविशिष्टसत्तात्वाश्रयसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकसत्तात्वा
दिकमेव जातिसमानाधिकरणाभावप्रतियोगितासामान्ये तदवच्छेद्यत्वस्याभावादतिव्याप्तिरतः स्वविशिष्टेति। स्वविशिष्टत्वं सा
ध्यतावच्छेदकताघटकसंबंधेन तत्तेन धूमवान्वह्नेरित्यत्र कालिकेन घटादेरपि धूमत्वविशिष्टत्वात्धूमत्वविशिष्टस्य संयोगेन यत्सं
बंधितन्निष्ठाभावप्रतियोगितानवच्छेदके द्रव्यत्वादिन तदवच्छेद्यत्वाभावस्य वह्निमन्निष्ठाभावप्रतियोगितायां सत्त्वेपि नातिव्याप्तिः।
धूमवान्वह्नेरित्यादौ अतिव्याप्तिवारणाय संबंधित्वं साध्यतावच्छेदकसंबंधेन वाच्यं न च कालिकसंबंधेन धूमत्वविशिष्टसंबंधि

गुणान्यत्वविशिष्टसत्तावाञ्जातेरित्यादौ

राम
२५५

ग्रंथ चूक

निध्वंसादौ वर्तते यो भावः संयोगावच्छिन्नस्तत्प्रतियोगितानवच्छेदकप्रसिद्ध्या कथमतिव्याप्तिरिति वाच्यं। घटाभावत्वा
देरेव तथात्वात् घटाभावस्य संयोगावच्छिन्नप्रतियोगिताकाभावप्रतियोगितायां लाघवाद्भावत्वेनैवावच्छेद्यात्। न चैवम
पितदवच्छेद्यत्वाप्रसिद्ध्या कथमतिव्याप्तिः घटाभावस्य भेदप्रतियोगितायां घटाभावत्वावच्छिन्नस्य प्रसिद्धिसंभवा
त्। एत एव वह्निमान् धूमादित्यादावव्याप्तिर्न भवति। तादृशघटाभावत्वावच्छेद्यत्वाभावेनैव लक्षणसमन्वयात्।
प्रतियोग्यधिकरणपादमप्येतदर्थमेवाभावे देयं। अन्यथा संयोगावच्छिन्नप्रतियोगितावच्छेदकमात्रस्यै
व धूमत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वात् तदनवच्छेदकं घटाभावत्वादिकमेव वह्निस
मानाधिकरणाभावप्रतियोगितायां तदवच्छेद्यत्वाभावस्य सत्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिः। प्रतियो
गितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वं तदर्थः। तेनायं घटो घटरूपादिमत्त्वसमवा
येन घटत्वस्य साध्यतायां घटत्वविशिष्टसंबंधिनि घटे समवायावच्छिन्नज्ञानाभावस्य विषयतया प्रतियोगिसमाना
धिकरणत्वात् संबंधसामान्येन प्रतियोग्यधिकरणेऽतीततत्तद्व्यक्तित्वावच्छिन्नाभाव एव तत्प्रतियोगिताव
च्छेदकज्ञानत्वावच्छेद्यत्वसमवायावच्छिन्नत्वोभयस्य घटरूपवन्निष्ठाभावप्रतियोगितायां सत्वेन वह्निमान् धू

भा०
१५६
156

संबंधि

मादित्यादौ संयोगेन साध्यतायां वह्नित्ववि~~शिष्टप्रतियोगितायां भावेन वह्निमान् धूमादित्यादौ~~ शिष्टं निष्ठे घटाभावः कालिकसं
बंधेन प्रतियोगिसमानाधिकरण एवेति निष्प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितानवच्छेदकं घटत्वं न द्रव्यच्छे
द्यत्वसंयोगावच्छिन्नत्वोभयस्य धूमवन्निष्ठाभावप्रतियोगितायां च सत्त्वेन सत्ताद्यवान् जातेरित्यत्र च सत्तात्वविशि
ष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकं विशिष्टसत्तात्वं तद्द्रव्यच्छेद्यत्वसमवायावच्छिन्न
त्वोभयस्य जातिसमानाधिकरणाभावप्रतियोगितायां सत्त्वेऽपि च नासंभवोऽव्याप्तिर्वा वृत्तिनियामकसंबंधस्या
भावप्रतियोगितावच्छेदकत्वे सर्वस्यैव धर्मस्य वह्नित्वादिविशिष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्र
तियोगितावच्छेदकत्वात् तदनवच्छेदकावच्छेद्यत्वाप्रसिद्ध्यासंभवः मेयत्वत्वादेरपि पर्वतादौ विषयितासंबंधा
वच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकत्वात् यद्विच इदंत्वाद्यभाववह्निमदन्यतरत्वं वह्निमन्निष्ठता
दृशाभावप्रतियोगितानवच्छेदकं वह्निमति संयोगेन समवायेन तदन्यतराभावसत्त्वेऽपि तत्प्रतियोगितायां जाद्य
वेन वह्निमत्त्वेनैवावच्छेदात् विषयितादिरूपव्यधिकरणसंबंधावच्छिन्नतदभावप्रतियोगितायाऽपि वह्निम
त्त्व इदंत्वाभावत्वादिनैवावच्छेदात् ध्येमिति विभाव्यते। तदसंभवविरहेऽपि धूमवान् वह्नेरित्यादावतिव्याप्तिरु १५६

तदवच्छेद्यत्वे च भेदप्रतियोगितायां प्रसि॰

नवच्छेदकत्वेन तदवच्छेद्यत्वसंयोगावच्छिन्नत्वोभयाभावस्य वह्निमन्निष्ठाभावप्रतियोगिता १

क्रीत्याह ह्रदत्वाद्यभावधूमवदन्यतरस्यैव धूमवन्निष्ठाभावप्रतियोगितासामान्ये सत्वादतः प्रतियोगित्वमपि साध्य
तावच्छेदकसंबंधेन वाच्यं। इत्थंच धूमत्वविशिष्टसंबंधिनिष्ठतादृशाभावीयसंयोगावच्छिन्नप्रतियोगिताया अनवच्छे
दकं धूमत्वायोगोलकावृत्तित्वादि तदवच्छेद्यत्वस्य तादृशप्रतियोगितायां सत्वादेव नातिव्याप्तिरिति ननु तथाप्युक्ता
प्तिः कालो जगदाधारः कालपरिमाणात्त ईश्वरज्ञानं सर्वव्तन्नित्यसविषयकत्वादित्यत्र कालिकविषयितासंबंधाभ्यां
साध्यतायां तेन संबंधेन जगदाधारत्वस्य सर्वत्र विशिष्टसंबंधिनि महाकाले ईश्वरज्ञानादौ च तेन संबंधेन प्रति
योगिव्यधिकरणस्याभावस्याप्रसिद्धेः। न च महाकालान्य विशिष्टघटाभावस्य ईश्वरज्ञानान्यत्वविशिष्टघटाभा
वस्य तथात्वान्नाव्याप्तिरिति वाच्यं। तथापि महाकालमात्रवृत्तिविशेषणताविशेषेण ईश्वरज्ञानमात्रवृत्तिविशेषण
पा ताविशेषेण च साध्यतायामव्याप्तेरपरीहारात्। तेन संबंधेन महाकालान्यत्वविशिष्टघटाधिकरणस्याप्यप्रसि
द्धेरिति चेन्न। स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायां यद्धर्मावच्छिन्नत्वयत्संबंधावच्छिन्नत्वोभयाभावः हेतु
समानाधिकरण[illegible]भावप्रतियोगितासामान्ये तद्धर्मावच्छिन्नत्वतत्संबंधावच्छिन्नत्वोभयाभावस्य विवक्षितत्· ला

भवति हि सर्वह्निविशिष्टसंबंधिमहाकालनिष्ठसमवायाद्यवच्छिन्नप्रतियोगिताकघटाभावादिप्रतियोगितायां सर्वैत्वा
वच्छेद्यत्वकालिकसंबंधावच्छिन्नत्वोभयाभावः कालपरिमाणसमानाधिकरणतादृशाभावप्रतियोगितायामपि तदुभ
याभाव इति नाव्याप्तिः॥ धूमत्वविशिष्टसंबंधिनिष्ठतादृशाभावप्रतियोगितायां धूमत्वाद्यवच्छेद्यत्वसंयोगावच्छिन्न
त्वोभयाभावसत्वे पि वह्निसमानाधिकरणतादृशाभावप्रतियोगितायां तदुभयसत्वान्न धूमवान्वह्नेरित्या
दावतिव्याप्तिरिति कृतं पल्लवितेन॥ ननु प्रमेयधूमवान्वह्नेरित्यादौ प्रमेयधूमत्वे गुरुधर्मे स्वविशिष्टे
त्यादिपारिभाषिकावच्छेदकलक्षणमव्याप्तं॥ स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकेत्यत्र
तादृशप्रतियोगितावच्छेदकप्रतियोगिभेदस्यातिप्रसंजकतया तादृशप्रतियोगितावच्छेदकत्वावच्छिन्न
रि प्रतियोगिताकभेदस्य विवक्षणीयत्वे प्रमेयधूमत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्व
स्य धूमत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य लघुरूपसमनियतस्य गुरुतया निव
च्छेदकत्वात् एवं प्रमेयवह्निमान्धूमादित्यत्र प्रतियोगितो धर्मिकोभयाभावलक्षणमव्याप्तं॥ प्रमेय

वह्नित्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुतरधर्माभावप्रतियोगितानवच्छेदकत्वेन तादृशप्र
तियोगितानवच्छेदकावच्छेद्यत्वाप्रसिद्धेरत आह॥ तादृशेति॥ तथा च प्रमेयवह्नित्वविशिष्टसंबंधिनिष्ठाभावीया
याः प्रतियोगितायास्तत्तदवच्छेदकभेदकूटवत्त्वेन तादृशानवच्छेदकं प्रसिद्धमिति नाप्रसिद्धिः॥ एवं पारिभाषिका
कावच्छेदकलक्षणमपि प्रमेयधूमत्वादौ ज्ञेयमिति॥ न च तादृशावच्छेदकमेव विशिष्य वक्तुमुचितमिति
वाच्यं। एकप्रतियोगिताया अपि नानावच्छेदकानां विशिष्योपादाने गौरवात् तत्प्रतियोगितावच्छेदकत्वेनोपा
दाने च लाघवादिति प्रतियोगित्वमिति। प्रतियोगिताधर्मिकोभयाभावविवक्षायां स्वविशिष्टसंबंधिनि
ष्ठाभावप्रतियोगित्वं साध्यतावच्छेदकसंबंधेनैव वाच्यं न तु पूर्वत्र तत्र साध्यतावच्छेदकसंबंधेन प्रतियो
गित्वमधिकरणत्वे नैव संबंधभेदे माहाय दोषाभावात् व्याप्तिस्तु नँह्यारस्यानावसर एव प्रपंचितेति॥
साध्यतावच्छेदकसंबंधेन संबंधित्वं प्रतियोगितावच्छेदकत्वे नेह प्रस्तूयते। एवमुत्तरत्रापि संबंधित्वं स्वविशिष्टसंबंधित्वं प्रतियोगित्वस्य च समोक्तत्वेपि प्रतियोगित्वस्या
व्यवहितलक्षणे एव विशेषणदानात्तस्य प्रथममिहैव शः संबंधित्वस्य लक्षणद्वयेपि विशेषणदानात्तस्य च रम

3

भा०

निर्द्दिष्टः॥ अभावे प्रतियोगिवैयधिकरण्यं च वस्तुतस्तत्सारस्य लक्षणत्रय एव देयमित्यभिप्रायेण तत्र एवं पूर्वसमा
धानयोरप्यवतारणीयत्वेन च तस्य चरमं निर्द्दिष्टः। ननु कालो घटवान् कालपरिमाणादिस्वरूपकालिकसंबंधेन
घटत्वविशिष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावीयकालिकसंबंधावच्छिन्नप्रतियोगितावच्छेदकाप्र
१५८ सिध्दा तदनवच्छेदकावच्छेद्यत्वमप्रसिद्धमत आह। कालिकेति॥ अनित्येति अतीतत नष्टघटव्यक्तित्वाव
158 च्छिन्नानधिकरणं घटत्वविशिष्टसंबंधिवर्त्तमानक्रियात्मकखंडकालोपाधिरेव तन्निष्ठतादृशाभावप्रति
योगितावच्छेदकं तन्नष्टघटव्यक्तित्वमिति नाप्रसिद्धिः। कालो जगदाधारः कालपरिमाणादिस्वरूपं तु पूर्वो
क्तदिशा लक्षणसंगमनीयकमिति। अभावस्येति। अत्र प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचि
त्सामान्यस्य वा प्रतियोगितावच्छेदकयत्किंचिदवच्छिन्नस्य वानधिकरणं वाच्यं। आद्ये धूमवान्वह्नेरित्य न
त्रातिव्याप्तिः। धूमवतो पर्वतादेर्यत्किंचिद्धूमव्यक्त्यनधिकरणत्वेन तदृत्तिधूमाभावस्य प्रतियोगिव्य
धिकरणत्वात्तादृशप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदके घटाभाववत्त्वावच्छेद्यत्व घ १५८

दित्वोभयाभावस्यतादृशप्रतियोगितायांसत्वात्‌वह्नितीयेद्रव्यत्वाभाववान्‌गुणत्वादित्यादौव्याप्तिः।गुण
त्ववन्निष्ठाभावप्रतियोगितायांगुणत्वाभावत्वावच्छिन्नायांप्रतियोगितावच्छेदकावच्छिन्नसामान्याधि
करणद्रव्यत्वाभावसंबंधिनिष्ठाभावगगनाभावप्रतियोगितानवच्छेदकगुणत्वाभावत्वावच्छेद्यत्वतादृ
शसंबंधावच्छिन्नत्वोभयसत्वान्‌गुणत्वाभावाभाववतोपिगुणस्यनित्यत्वादिविशिष्टगुणत्वाभावात्म
कप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरणत्वात्‌नित्यादिविशिष्टगुण[illegible]त्वेनित्यत्वस्यविशि स्य
ष्टगुणत्वाभावाभावात्मकस्यगुणत्वानतिरेकात्‌तत्तृतीयेधूमवान्वह्नेरित्यत्रातिव्याप्तिः।धूमत्वविशिष्ट
संबंधिनोधूमाभाववत्पर्वतादेरपिधूमाभाववत्पर्वतभिन्नत्वप्रकारकप्रमाविशिष्य[illegible]त्वाभावान्य
तैकांचि तरत्वावच्छिन्नप्रतियोगिताकाभावत्वरूपयत्प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वा
त्तादृशाभावप्रतियोगितानवच्छेदकघटाभावत्वादिमेवतद्वच्छेद्यत्वसंयोगावच्छिन्नत्वोभयाभा
वस्यवह्निसमानाधिकरणत्वात्तादृशाभावप्रतियोगितायांसत्वात्‌किंतुतादृशसंबंधेनयादृशप्र

गुणत्वाभावाभावात्मकस्यगुणत्वस्य

४

भा० अव
१५८
159

तियोगितावच्छेदकावच्छिन्नानधिकरणत्वं स्वविशिष्टसंबंधिनत्तादृशप्रतियोगितानवच्छेदकत्वं वाच्यं तेन ना
तिव्याप्त्यादिदोषः एतस्य व्यावृत्तपस्तु ध्येतृणव्याख्यानावसरे वानुसंधेया। मौलं न्तु नोपात्तं। इदमीयं। अवच्छे
दकलक्षणप्रविष्टं। ननु मौलप्रतियोगित्वे व्यधिकरणधर्मानुपादाने इह संयोगी द्रव्यत्वादित्यादावव्याप्तिरत आ
ह। संयोगत्वेति। संयोगत्वस्य द्रव्यत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेपि तदवच्छिन्नाभावव
ति संयोगत्वविशिष्टस्य संबद्धत्वात्संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं। तादृशावच्छेदकत्वं गगनत्वादि
कमेवेति तद्भिन्नत्वस्य संयोगत्वे सत्त्वान्नाव्याप्तिरित्यर्थः॥ इदमीये प्रतियोगित्वे व्यधिकरणधर्मानुपा
दानेपि संयोगी सत्त्वादित्यत्रातिव्याप्तिं निरस्यति। गुणादीति। संयोगत्वावच्छिन्नाभाववति संयोगत्व
विशिष्टस्य संबंधत्वेपि गुणादिनिष्ठाभावप्रतियोगितावच्छेदकीभूतद्रव्यत्वत्वावच्छिन्नाभाववत्त्वसंबं
द्धत्वात्संयोगत्वस्य पारिभाषिकावच्छेदकत्वेन तद्भिन्नत्वाभावान्नातिव्याप्तिरित्यर्थः। सकलद्रव्यत्ववृत्ति
त्वघटितं द्रव्यत्वत्वं नावच्छेदकमतो द्रव्यमात्रेति। द्रव्यान्यासमवेतत्वावच्छिन्नेत्यर्थः। संयोगप्रतियोगि १५८

मे१

कांभाव माहाय्याप्यतिव्याप्तिं वारयति । द्रव्यमात्रेत्यपि कश्चित् । अवच्छेदकलक्षणे तस्य दंशं वेशयितुमाह । धूमवान् ~~वह्नि~~व
ह्नेरिति अत्राप्यतिव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यपदे दत्तेऽन्येऽप्यव्याप्तिवारणाय तद्धेतुमिति भावः तद्देवद
र्पितेति धूमवान्वह्नेरित्यत्र वह्निसमानाधिकरणाभावीयसंयोगसंबंधावच्छिन्नप्रतियोगितावच्छेदकं यद्यदुत्पन्निका

नहीति
स

लावच्छेदेन तत्तदवच्छिन्नाभाववति धूमत्वविशिष्टसत्वात् । धूमत्वस्य पारिभाषिकावच्छेदकत्वमनुपपन्नमितिता
दृशावच्छेदकगगनत्वादिकमेवेति तद्भिन्नत्वस्य धूमत्वे सत्वादतिव्याप्तिरित्यर्थः । येनेत्यादि । यदि यत्किंचित्
संयोगेनोत्पत्तिकालेऽपि वर्तेत तदाऽयोगोलकावृत्तिद्रव्यत्वावच्छिन्नाभाववदयोगोलकादेव स्यात् । न धूम
वत् येन तत्र धूमत्वविशिष्टस्यासंबद्धत्वाद्धूमत्वस्य पारिभाषिकावच्छेदकत्वं स्यादिति भावः । अयोगोलको
वृत्तिद्रव्यत्वेत्यत्र द्रव्यत्वपदं संयोगसंबंधेनायोगोलकावृत्तित्वस्यावच्छेदकस्य संयोगावच्छिन्नाया अप्रति
योगिताया लाभायेति तदवच्छिन्नाभाववदित्यादि प्रथमविवक्षायां प्रतियोगिताधर्मिकोभयाभावविवक्षा
यां चातिव्याप्तिः । प्रथमे गगनत्वरूपतादृशावच्छेदकस्याप्रसिद्धत्वात् तद्भेदस्य धूमत्वे सत्वात् तृतीये धूमत्व
विशिष्टसंबंधिनि घटाभावस्य संयोगावच्छिन्नप्रतियोगितानवच्छेदकं घटाभावत्वं संयोगावच्छिन्नप्रतियोगि

भा॰
१६०
160

तायात्लाघवेनाभाववत्वेनैवावच्छेदात् । तदवच्छेद्यत्वस्य भेदप्रतियोगितायां प्रसिद्धस्य संयोगावच्छेद्यत्वस्य उभयाभावेस्य
हेतुसमानाधिकरणतादृशाभावप्रतियोगितासामान्ये सत्वादतिव्याप्तिः । प्रथमविवक्षायां तु नातिव्याप्तिः गग
नत्वविशिष्टसंबंधाप्रसिध्या गगनत्वस्य पारिभाषिकावच्छेद्यत्वासंभवात् । किंतु संयोगे साध्यतायामव्याप्ति
स्तादृशपारिभाषिकाप्रसिद्धेरिति । न च प्रथमविवक्षायां कथमतिव्याप्तिः हेतुसामानाधिकरण्यस्य संयोगेन
कभेदाभावस्य प्रतियोगितावच्छेदकं यद्द्रयोगेत्वकभेदत्वं तदवच्छिन्नाभाववत्संयोगेत्वके धूमत्वविशिष्टस्या
संबद्धत्वेन धूमत्वस्य पारिभाषिकापारिभाषिकावच्छेदकत्वादिति वाच्यं । प्रतियोगिवैयधिकरण्यानुपा
दानेनातादात्म्येन साध्यतायां धर्ममात्रस्यैव तदवच्छिन्नाभाववत्संबद्धस्य च विशिष्टसामान्यकत्वेन तादृशावच्छे
दकाप्रसिद्धाऽव्याप्तिभयेन प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्य विवक्षणीयत्वात् संयो
गावच्छिन्नप्रतियोगितायां लाघवेन भेदत्वस्यैवावच्छेदकत्वेनासंयोगेत्वकभेदत्वस्य प्रतियोगितानवच्छेदक
त्वेनातिव्याप्तेः सत्वादिति । वस्तुतस्तु संयोगेत्वकभेदस्य कालिकसंबंधावच्छिन्नप्रतियोगिताकोभावः

हम्र

१६०

कात्वेऽयोगोलकावछेदेनवर्त्तमानस्य विवादं जन्यमात्रस्यैवकालोपाधित्वाच्चपर्वताद्यपि तादृशाभाववद्वृत्तमत्र
चक्षुमत्त्वविशिष्टस्यसंबद्धत्वात्साध्यतावछेदकसंबंधावछिन्नप्रतियोगित्वाविवक्षणेप्यतिव्याप्तिर्दुरुद्ध
रैवेति। तथा चातिव्याप्तिवारणाययद्रूपीयप्रतियोगित्वेव्यधिकरणेपाद्याने कपिसंयोगत्वादित्याद्यव्याप्तिः ॥
एतद्वृक्षत्वसमानाधिकरणत्वंताभावप्रतियोगितावछेदकावछिन्नप्रतियोगिकाधिकरणाभाववतिगुणेक
पिसंयोगत्वविशिष्टस्यासंबद्धत्वेनावछेदकलक्षणाक्रांतत्वात्। एवंचाव्याप्तिवारणायमोलमपिप्रतियोगि
त्वेव्यधिकरणपुमुपादेयमितिभावः। प्रतियोगित्वयोरिति। हेतुसमानाधिकरणाभावप्रतियोगिताव
छेदकलक्षणनिविष्टाभावप्रतियोगितयोरित्यर्थः। तथा च हेतुसमाधिकरणाभावीयत्संबंधावछि तदवछिन्न ५
न्नप्रतियोगितावछेदकं यद्यत्तत्संबंधावछिन्नप्रतियोगिताकाभाववद्दसंबद्धत्वविशिष्टसामान्यकं
यद्यत्तत्पारिभाषिकावछेदकमिति। एवमन्यलक्षणेपि योज्यं धूमवान्वह्नेरित्यादौ हेतुसमानाधि
करणाभावीयस्वरूपसंबंधावछिन्नप्रतियोगितावछेदकमयोगोलकभेदत्वंतदवछिन्नप्रतियोगिता

काभाववत्प्रयोगो नकेधूमत्वविशिष्टस्यासंबद्धत्वान्नावछेदकत्वमिति॥ एतत्तत्वयोरनुगमाद्विशिष्यत
त्त्संबंधानांनिवेशो विशेषणताविशेषस्य निवेशादेव सर्वसामंजस्ये संबंधांतरप्रवेशो व्यर्थ इति अस्याशये
नाह विशेषणताविशेषेति जातिमान्भाववत्वादित्यत्र भावत्वसमानाधिकरणभावीयविशेषणतावि
शेषावछिन्नप्रतियोगितावछेदकं जातिमत्वप्रकारकप्रमाविशेष्यत्वत्वं तदवछिन्नाभाववति सप्रणाये
न संबद्धत्वस्याप्रसिध्या जातित्वस्य पारिभाषिकावछेदकत्वमिति॥ अतो मध्यमप्रकार[illegible]मवलंब्य प्रति
योगिवैयधिकरण्यानुपादाने पि व्यभिचारित्वमिति व्याप्तिनिराकरणप्रकारं दर्शयति। यत्रेत्यादिना।
घटत्ववान्घटतद्भिन्नान्यतरत्वादित्यत्र घटभिन्नात्मक~~स्याभावीयविशेषणतानसर्वसिंमतेप्य~~
तो~~ज्ञानविषयतानिरूपिता~~ व्यभिचारनिरूपकाधिकरणान्यत्वादेः साध्यवन्निष्ठस्य घटत्वात्मकस्या
भावीयविशेषणतानसर्वसिंमतेप्यतोज्ञानविषयतानिरूपितविशेषणताविशेषमवलंब्याति व्याप्तिवा
रण[illegible]माह। तदन्यत्वप्रकारकेति॥ नायमभिप्रेत्याह। साध्यवत्वेति। यद्धर्मविशिष्टसंबंधिनिष्ठाभावी

यविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभावीयविशेषणताविशेषावच्छि-
न्नप्रतियोगितावच्छेदकं तदन्यधर्मवत्त्वंव्यापकमित्येवमर्थप्रकारपर्यवसितार्थे कालो घटवान्कालपरि-
माणादित्यादावव्याप्तिः। तादृशपारिभाषिकावच्छेदकाप्रसिद्धेः महाकालान्यत्वविशिष्टघटत्वादीनां प्रागुक्तयुक्त्या
तादृशत्वासंभवात्। एवंसमवायेनगगनादेरपि धूमव्यापकतापत्तिः समवायेन गगनत्वविशिष्टसंबंधाप्र-
सिद्ध्या गगनत्वादेरपि तादृशपारिभाषिकावच्छेदकत्वाभावादतः प्रतियोगिताधर्मिकोभयाभावलक्षणमेवत-
त्रद्यप्रकारं। साध्यतावच्छेदकसंबंधावच्छिन्नत्वांशपरित्यागेन परिष्कृतेतयाचेति। विशेषणताविशेषस्य लक्ष-
णघटकत्वेइत्यर्थः। यद्धर्मेतियद्धर्मः साध्यतावच्छेदकरूपधर्मः तत्संबंधावच्छिन्नेति विशेषणताविशेषावच्छिन्ने-
त्यर्थः। धूमवान्वह्नेरित्यादौ वह्नित्वप्रकारकप्रमाविषयत्वाभावप्रतियोगितायां धूमत्वविशिष्टसंबंधिनिष्ठाभाव-
प्रतियोगितानवच्छेदकीभूतधूमत्वप्रकारकप्रमाविशेष्यत्वात्वावच्छेद्यत्वाभावादतिव्याप्तिरतः सामान्यइति
इत्थंचधूमत्वप्रकारकप्रमाविषयत्वाभावप्रतियोगितायां तदवच्छेद्यत्वाभावस्यासत्त्वादेवनातिव्याप्तिः॥

आ॰

१६२ कालेघटवान् कालपरिमाणमित्यादौ तु कालान्यत्वप्रकारकप्रमाविशेष्यत्वाभावप्रतियोगितादृशीप्रसिद्धेति नाव्या
प्तिरिति। अत्र यद्यपि साधनसमानाधिकरणाभावप्रतियोगितासामान्ये यद्धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियो
वह्नि॰का गितानवच्छेदकत्वं तस्य तत एव सर्वसामंजस्ये नञ्द्वयगर्भतायां गौरवं। तथापि मूलेन अनुपादानात्तत्र हृदि तन्मेवा
162 न्तरेणानुक्तं। यथासन्निवेशे च न वैयर्थ्यं परे तु। नञ्द्वयगर्भतायां व्यभिचारिण्यतिव्याप्तिः। वह्निसमानाधिक
रणधूमवत्त्वप्रकारकप्रमाविषयत्वाभावप्रतियोगितायां तादृशप्रमाविषयत्वात्मकप्रतियोगिरूपायां
धूमवत्त्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकीभूतं यन्महानसवृत्तित्वविशिष्टतादृशप्रमाविषय
त्वत्वं तदवच्छेद्यत्वस्य सत्त्वात् महानसवृत्तित्वविशिष्टतादृशप्रमाविषयत्वाभावप्रतियोगितारूपस्य महा
नसवृत्तित्वविशिष्टस्यापि तादृशप्रमाविषयत्वस्य तादृशप्रमाविषयतानतिरेका तादृशप्रतियोगितान
वच्छेदकावच्छेद्यत्वाभावाभिधानेन तु नायं दोषः। तादृशप्रमाविषयत्वत्वरूपतादृशप्रतियोगितानवच्छेदका
वच्छिन्नत्वेन तदभावासंभवादिति। न चैवं वह्निमान् धूमादित्यादावव्याप्तिः वह्नित्वविशिष्टसंबंधिनि

ष्याभावप्रतियोगितानवच्छेदकं यद्वह्नित्वप्रकारकप्रमाविषयत्वत्वं धूमसमानाधिकरणमहानसवृत्ति
त्वविशिष्टतादृशप्रमाविषयत्वाभावप्रतियोगितायां विशिष्टतादृशप्रमाविषयत्वरूपायां तदव
च्छेद्यत्वसत्त्वेन तदभावासंभवादितिवाच्यं। विशेष्ये तादृशप्रमाविषयत्वे तदवच्छेद्यत्वसंभवेपि विशे
षणे तदभावेन विशिष्टे तदवच्छेद्यत्वाभावादित्याहुः। यत्र सद्धेतु विशेष इति। प्रमेयं वह्निमान्धू
मादित्यादावित्यर्थः। तत्रैवेति। वह्निमान्धूमादित्यादौ तु प्रतियोगितावच्छेदकसंबंधेन प्रतियो
गिव्यधिकरणस्य हेतुसमानाधिकरणस्याभावस्य प्रतियोगितायां यद्धर्मावच्छिन्नत्वयत्संबंध
त्वावच्छिन्नत्वोभयाभाव इत्येतावदेव सम्यगिति भावः। तेन कालो घटवान्कालपरिमाणा
दित्यादौ साध्यतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या नाव्याप्तिः। यत्रासद्धेतुवि
शेष इति पाठः। प्रामादिक-असद्धेतौ व्याप्तेरभावेन तत्र लक्षणस्याप्रसक्तत्वादिति। वदंती त्वरसंतु
दीजं तु व्याप्यवृत्तिसाधके प्रतियोगिव्यधिकरणत्वघटितलक्षणापेक्षया निरुक्तःन लक्षणमे

ती

ट

भा०

वल्लघुतयोचितमिति। गौरवे सतीत्यादृशावच्छेदकत्वविरहस्तादृशावच्छेदकत्वस्य संसर्गतयावगाहि
१६२ नेगौरवज्ञानं विरोधिप्रवृत्तेतेच गौरवज्ञाने सत्यपि कंबुग्रीवादिमान्नास्तीति। कंबुग्रीवादिमत्त्वस्य
ऽप्यवच्छेदकत्वेनेखिप्रत्ययसत्त्वाद्गौरवज्ञानं नैतादृशावच्छेदकत्वग्रहविरोधीत्यभिप्रायेणाह। गौ
163 रवेति। अस्याः कंबुग्रीवादिमान्नास्तीतिप्रतीतेः। तथाविधेति। कंबुग्रीवादिमद्यत्किंचिद्व्यक्ति
सत्त्वे इत्यर्थः। अतएवेति। यत एव कंबुग्रीवादिमान्नास्तीति प्रतीतेर्यत्किंचित्कंबुग्रीवादिम
त्प्रतियोगिकाभावमात्रं न विषयः किंतु कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताभाव एव ऽत
तएवेत्यर्थः।। अन्यथा एकघटवति ऽपि यत्किंचित्कंबुग्रीवादिमत्त्वभेदाभावसत्त्वात्त क
त्रापि प्रमाणं स्यादिति भावः।। ननु गुरुतया न वच्छेदकस्य कंबुग्रीवादिमत्त्वस्यावच्छेदकत्वा
वगाहनादेव स शब्दो न प्रमाणमत आह।। प्रमाणं चेति। तथा सति घटसामान्यभेदेऽपि

१६२

प्रमाणमवहारेनस्यादिति भावः। नचैवं। यदि गुरोर्धर्मस्य न प्रतियोगितावच्छेदकत्वं। गुणादीति
इदं द्रव्यं गुणात्गुणकर्मान्यत्वे सत्वात् द्रव्यत्वाद्वेत्यत्र त्रयाणमेवामाप्यत्वं स्यादित्यर्थः। लाघवेनेति
गुणादिसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकत्वत्वस्य द्रव्यत्वात्यंताभावप्रतियोगि
तावच्छेदकत्वत्वलघुरूपसमनियतस्यानवच्छेदकत्वादिति भावः। एवं तादात्म्येन द्रव्यस्यापि नव्या
प्यता द्रव्यसंबंधिनिष्ठत्वाद्यपेक्षया द्रव्यवृत्तीत्यादेर्लघुत्वादिति। ननु तत्तदवच्छेदकस्य की
प्रातिस्विकरूपेणोपादाने प्रत्तावदभावकूटएववक्तव्य इत्यत आह। तत्तदिति।। ननु तादृशा
वच्छेदकत्वत्वावच्छिन्नाभावो न वाच्यः। किंतु स्वावच्छिन्नाभाववत्संबंध हेतुमन्निष्ठाभावप्र
तियोगितावच्छेदकत्वसामान्यकोयो धर्मस्तद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्वं साध्यता।

भा.

१४८

164

वच्छेदकं तदवच्छिन्नसामाधिकरण्यं व्याप्तिः। इत्थं गुणादिसाध्येऽपि द्रव्यनिष्ठाभावप्रतियोगितावच्छे
दकत्वावच्छिन्नाभाववत्संबंधमेव गुणवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्यमिति।
द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वमेव तादृशांस्वं तदवच्छिन्नाभावस्य च द्रव्यत्वत्वेस
त्वान्नगुरोरवच्छेदकत्वस्वीकार इत्यत आह। उपदर्शितेति। इत्थं च स्वत्वसंसर्गाभावप्रतियोगि
तावच्छेदकत्वत्वमेव प्रकृते स्वपदार्थः। तस्य च न दुर्ज्ञेयत्वमतः। स्वत्वादीति। आदिना हे
तुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य कीनां प्रातिस्विकरूपेण ज्ञाने तत्सामा
न्येतादृशाभाववत्संबंधस्य ज्ञातुमशक्यत्वादित्यादेः परिग्रहः। यद्यपि धूमत्वावच्छेदेन
वह्निमदन्यावृत्तित्वमिव गुणसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छि

न्ने द्रव्यवृत्तित्वं तदभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभाववदसंबंधत्वं सुग्रहमेव तथापीदृशज्ञा
नसामग्र्यभावदशायामपि निरुक्तरूपायाः तन्मात्रज्ञानादनुमितेरानुभविकत्वान्नायं प्रकारः संभवतीति
भावः॥ अत एव प्रागुक्तव्याप्त्यनुगतत्वादेर्गुरोरपि प्रतियोगितावच्छेदकत्वमत एवेत्यर्थः। केचित्तु
पूर्वोक्तरीत्याव्याप्तेर्न दुर्ज्ञेयत्वमित्यस्वरसादत एवेति। अत्र हेतुसमानाधिकरणाभावप्रतियोगि
तावच्छेदकं यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकं स धर्मः पारिभाषिकावच्छेदक
इत्येवरीत्याव्यभिचारस्य दुर्ज्ञेयत्वं न तत्प्रतियोगिताव्यक्तीनां विशिष्यज्ञानासंभवेन तादृशव्य
भिचारज्ञानासंभवादिति माचवक्तुः॥ अवच्छेदकत्वलक्षणं संपूर्णं॥ ॥व्याप्तिलक्षणानंतरं सा
मान्याभावः प्रपञ्चयेवेति ग्रंथस्यावतारार्थमाह। ननु यएवेति। प्रत्येकमिति। महानसे पर्वतीयव
ह्नेरभावः। पर्वते महानसीयवह्नेरभावः इत्येवं चालनीन्यायेनेत्यर्थः॥ तत्र महानसाद्यवच्छेदेन

भा०

संस्त्वं तत्तत्प्रतियोगितात् तथा च तेषामभावानां महानसाद्यवच्छेदेन यत्तत्प्रतियोगितावच्छेदकं त

तद्वह्नित्वावच्छिन्नवैयधिकरण्यं तन्निरूपकेत्यर्थः॥ तथा च यादृशप्रतियोगितायां यत्किं

१६५ चिदवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वं लक्षणघटक

165 मिति भावः॥ एवं वह्नित्वस्यापि तत्तत्प्रतियोगितावच्छेदकत्वे। तद्वृत्तित्वात् महानसावृत्तित्वात्

न तथात्वं। तत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं तथा च यादृशप्र

तियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत इत्यत्र यत्किंचित्सद्वाप्रवेशेण प्रति

योगितावच्छेदकसामान्यमेव धर्तव्यमिति भावः॥ एवं सति वह्निमान् धूमादित्यादौ संयोगेन

साध्यतायां साध्यतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणस्याभावस्याप्रसिद्धात् तत्रत्यं विह

य प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्त्यभावप्रतियोगि १६५

तायां यद्धर्मावच्छिन्नत्वयत्संबंधावच्छिन्नत्वोभयाभाव इति विवक्षणमावश्यकमणीयं तथा सत्याह । तथा
सतीति । जलह्रदे ह्रदवृत्तिर्नास्तीति बुद्धेः सर्वेषामेव ह्रदवृत्तीनामभावो विषयं धर्मोपि च ह्रदवृत्ति
रिति तत्तद्धूमाभावस्यापि ह्रदवृत्तित्वेन प्रतियोगितावच्छेदकं तदवच्छिन्नं च वह्निमदयोगोलके व
र्त्तत एवेति न तद्धूमाभावस्यापि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्याभा
वात[illegible]भावांतरमादाय धूमवान्वह्नेरित्यादावतिव्याप्तिरित्यर्थः । न च प्रतियोगितावच्छे
दकसंबंधेन प्रतियोगिवैयधिकरण्यस्याऽप्रसिद्ध्या कथमतिव्याप्तिरिति वाच्यं जन्यमात्रस्य
कालोपाधित्वानंगीकारे कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य घटादेरभावस्यैव तथात्वात् ।
एवं विषयितासंबंधेन घटादेरभावोपि महानसादौ प्रतियोगिव्यधिकरणः । कालिकसंबंधे
न विषयितादिना वा पदार्थमात्रस्यैव महानसादावभावेन केनापि रूपेण प्रतियोगितावच्छेदका

॥

भा॰
१६६

वच्छिन्नाधिकरणत्वस्य हेत्वधिकरणेऽसंभवात्। तद्धीत्याचेदमनुगतं रूपं तदभावप्रतियोगिता
नवच्छेदकमित्यंगीकृत्य वह्निमान्धूमादित्यादौ वह्नित्वाद्यवच्छेद्य॰त्वस्याप्रसिद्ध्या प्रतियोगि
ताधर्मिकोभयाभावविवक्षणमुपेक्ष्य हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रति
योगितानवच्छेदकत्वघटितलक्षणमंगीकरोषि तदा धूमवान्वह्नेरित्यादावतिव्याप्तिरित्याह। अथे
त्यादिना। केचित्तु पूर्वलक्षणे वृत्तित्वविशिष्टस्य यत्किंचिल्लक्षणवृत्तित्वविशिष्टस्य वा तद्रूपाभावस्याभाव
एव साध्यतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणाभावप्रतियोगिकस्यापि प्रतियोग्याद्यतिरि
क्तस्य विशिष्टाभावस्याभ्युपगमादिति। तदसत् पूर्वलक्षणे वृत्तित्वविशिष्टतद्रूपाभावाभावस्यापि
विशेषणतया तद्रूपवद्वृत्तित्वावच्छिन्नाभावतया विशेषणतया तद्रूपवद्वृत्तित्वरूपप्रतियोगि
तावच्छेदकावच्छिन्नेन समंसंयोगेन सामानाधिकरण्यात्। अन्यथा पूर्वलक्षणे वृत्तित्वविशिष्टस्

१६६

रूपस्याभाव एव प्रतियोग्यसमानाधिकरणत्वेन कुतो नोच्यते। अथ पूर्वक्षणवृत्तित्वविशिष्टरूपस्या
भावो वायुवृत्तित्वावच्छिन्नाभावतया वायुवृत्तित्वरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरण
स्तद्दशावृत्तेपि तुल्यं। अन्ये तु। आकाशाभाव एव प्रतियोग्यसमानाधिकरणः। न च तस्यापि तद्दशावृत्तित्वात्त
दभावोपि तथा। यस्य तद्दशावृत्तेरभावाभावेन तद्दशावृत्तिर्नास्तीति प्रतीते तदभावस्तदभावस्यैव तद्दशावृत्तित्वं प्र
तियोगितावच्छेदकं कल्प्यते। आकाशाभावस्य च केवलान्वयित्वात् व्यतिरेकेण तज्ज्ञानीयाभावासिद्धेर्न त
स्य प्रतियोगितावच्छेदकमिति। तदपि तुच्छं। लौकिकशब्दस्यैव विषयाधीनतया इति रूपस्य तद्रूप
क्षणैकस्याभावस्याभावेन तादृशप्रतीत्यभावासिद्धेः। न तस्य तद्दशावृत्तित्वं प्रतियोगितावच्छेदकमिति।
तस्यैव प्रतियोग्यधिकरणत्वेऽतिव्याप्त्यसंभवात्। अभावांतरेति। अनुगतरूपस्य तदभावभिन्ना
भावप्रतियोगितावच्छेदकत्वे इत्यर्थः। तद्रूपावच्छिन्नसाध्यकेऽनुगतरूपावच्छिन्नसाध्यके। अत्र रूप
त्वं न तद्रूपाभावप्रतियोगितावच्छेदकं न वेति न विप्रतिपत्तिः॥ अभावाधिकरणकातिरिक्ताभावा

नाम्नानाधिकरणत्वे तत्त्वस्यत्वं ज्ञानमात्रपत्ति द्विमाधनं अवच्छेदकावच्छेदेन तिष्ठेयोगाध इतः वञ्जोतरं अयविव्यि कोटिस्य कोतः

११

भा

१६१

117

भिन्नरूपवद्वृत्तिवृत्ति

नभ्युपगमे सामान्याभावाभ्युपगमे आपित तद्रूपाभावस्य रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारात् किंतु
वायौ रूपं नास्तीति प्रतीतिरभाववद्रूपविषयत्वेनैवा॥ उत्पत्त्यंताभाववृत्तित्वरूपत्वावच्छिन्नप्रतियोगिताक
त्वं रूपकालावच्छेदेन रूपवद्वृत्तिनवेत्यादिकावा। अत्र घटोत्पत्तिद्वितीयपक्षणे स्यत्र वायुसंयोगस्यागभा
वरूपत्वावच्छिन्नप्रतियोगिताकत्वसत्त्वात् विधेयसिद्धसाधनमतः। पक्षे हसंतं तत्तद्रूपाभाववृत्तित्वात्
विधेयसिद्धसाधनमतः साध्ये विशेषितं। रूपसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन रूपवद्वृत्तित्वाद् घट
स्यतो रूपकालावच्छेदेनेति। भेदप्रतियोगिविशेषणं। रूपवत्त्वप्रकारकप्रमाविशेष्यत्वाभाववद्
त्तितया द्रव्यत्वाभाववृत्तितया च सिद्धसाधनमतो हसंतं। रूपकालावच्छेदेन तद्वृत्तित्वविशिष्ट
व्याप्तिरित्यादावित्यर्थः ।ननु पाथे साधनावृत्तितया कथं तन्निष्ठसाध्यसामानाधिकरण्यावच्छेदकत्व
मत आह ।विशेषणतामिति ।ननु अवच्छेदके विशेषणतामापन्नस्यापितस्य नावच्छेदकत्वं किंतु वृत्ता
वाद्धे धनत्वसमवद्वृत्तित्वमवच्छेदकं तत्र सामानाधिकरण्यसंबंधेन धूमे धनत्वसमवत्त्वविशिष्टवृत्तित्वं तत्रार्थे
धनत्वसमवत्त्वे न विशेषणत्वं सामानाधिकरण्यघटकतया संबंधत्वमेवेत्यत आह उपाध्यनुप्रवेशेनेति ।त

अनु॰

भा॰ से यावोपाध्यनुप्रविष्टधर्मेणावच्छिद्यत इत्यर्थः। तदनुप्रविष्टत्वं च तद्विषयकप्रतीत्यविषयत्वं। अनुप्रवेशे
१८२ वैलक्षण्यं दर्शयितुमाह एवञ्चेति। प्रमेयं धतयोरितरयोस्तु विशेषणतयानुप्रवेशः। आर्द्रेन्धनत्वस्योपा
धिघटकत्वतया निवेशोऽपि विशेष्यतया निवेशाभावं दर्शयितुं तस्य रूपयुक्तिं नवेति वाकारो। नास्थायां रासभत्व
दावार्द्रेन्धनप्रभववह्निसमानाधिकरणस्य सामानाधिकरण्यसंबंधेन विशेषणत्वे वैयर्थ्याभावात्। इत्य
देतदिति। उपाध्यनुप्रवेशस्य तु उभयथापि सत्त्वादिति भावः। सोपाधौ तु उपाधिनेति मूलमुपाधिनैवेति निय
193 स ममुख्येन साधनतावच्छेदकस्यानवच्छेदकज्ञापकमिति यथाश्रुतग्रन्थतात्पर्यं निरस्यति। अत्र चेत्यादिना। व्यभि
चारेति। नियमेन साध्यसामानाधिकरण्येनावच्छिद्यते तदवश्यं उपाध्यनुप्रविष्टमुपाधिरिति वा नियमं दू
षयति। शीतत्वेनेति। इदं स्नेहवत्स्पर्शादित्यत्र मेलसामानाधिकरण्यावच्छेदकं शीतत्वेनोपाध्यनुप्र
विष्टमिति व्यभिचारः। ननूपाधिनेति तृतीयार्थो विशेषणत्वं न यावत्तद्वलात्सामानाधिकरण्यसंबंधे
नावच्छेदके विशेषणतयायेनावच्छिद्यते तदवश्यमुपाधिरिति नियमान्न शीतत्वे व्यभिचारः। तस्या १८२

स्वरोबल तथापाठान्तरं

२१

वच्छेदकविशेषणत्वेनानवच्छेदकत्वादत आह। शीतान्यत्वेनेति। इदं निरुक्तेहंस्पर्शादित्यत्र शीतान्यस्प
र्शत्वमवच्छेदकं तच्च सामानाधिकरण्यसंबंधेन शीतान्यत्वविशिष्टं स्पर्शत्वं तत्र शीतान्यत्वं तादृशमवच्छे
दकमपि नोपाधिरिति व्यभिचार इति भावः। उक्तधर्मयोरनुपाधित्वे यथाक्रमं साध्यासामानाधिकरण्येत्यादि।
केवलेन शीतत्वेन विशेषणीभूतशीतान्यत्वेनावच्छिन्नेतरेत्यग्रेतनेनान्वयः। ननु तृतीयाबलादुपाधिना
विशेषणतामापन्नेनैवावच्छिन्नेतरेति लब्धं तथा चोपाधेरवच्छेदकत्वं ज्ञावच्छेदकविशेषणतयैवेति पर्यव
सितं मतं दूषयति। शीतान्यस्पर्शत्वेनेति चकारस्त्वर्थे। स्वेतर एव न तु तस्य विशिष्टविशेषणतया शीतान्यस्पर्श
त्वस्य च दृष्टपृथिवीत्वस्पर्शजन्यान्यतरत्वावच्छिन्नसाध्यव्यापकतयोपाधित्वं। यत्तु यत्रोपाधित्वं तत्रावच्छे
दकानुप्रविष्टत्वमिति नियमे व्यभिचारोद्भावनं शीतान्यस्पर्शत्वेति तन्नसत्। स्वतोवच्छेदकत्वेपि शीतान्यस्प
र्शत्वविशिष्टस्यत्वे सत्त्वादिसाधारणस्यावच्छेदकत्वे शीतान्यस्पर्शत्वस्यानुप्रविष्टत्वे व्यभिचारासंभव
त्। यद्यपि प्रथमनियमस्यैव प्रकृतोपयोगित्वं द्वितीयादिनियमानां तु साधनतावच्छेदकस्यावच्छेदक

मा त्वेपिसंभवान्नाशंकनीयत्वंतथापिप्रथमनियममात्रसंपादकतयाएवकारेआक्षिप्तेतद्दलस्यायावंतो
१८४ नियमास्संभवंतितावंतएवसाध्यदायिकाइतिमंदधीदूषिताइति।अस्य किंचिद्विशेषणविशिष्टस्यसा
१९४ धनेतिसाधनतावच्छेदकातिरिक्तमवच्छेदकमावश्यकमित्यर्थः।तद्विशेषः।साधनतावच्छेदकातिरिक्त
साध्यसंबंधितावच्छेदकविशेषः।अन्यथासोपाधौसाध्यसंबंधितावच्छेदकस्याप्यसत्त्वेतद्विशेषस्योपाधि
त्वाभिधानमसंगतंस्यादितिभवत्युपष्टंभकतेतिभावः।ननूपाधेःसाधनावृत्तितयाकथंतन्निष्ठसाध्य
संबंधितावच्छेदकत्वमित्यतआह।सामानाधिकरण्येनेति।तथाचसामानाधिकरण्यसंबंधेनोपाधि
रपिसाधनवृत्तिरितिनानुपपत्तिरितिभावः।अनतिप्रसक्तत्वरूपावच्छेदकत्वोक्तौउत्पद्यमुद्भूतरूपा
दित्यत्रमहत्त्वादेरुपाधित्वंनस्यादित्यतआह।तत्त्वंचेति।अवच्छेदकत्वंचेत्यर्थः।अन्यूनवृत्तित्वंन्यून
वृत्तिभिन्नत्वंतच्चतत्समानाधिकरणाभावप्रतियोगित्वमतितत्समानाधिकरणत्वात्तत्रचविशेष्यद
लस्यानतिप्रयोजनकत्वादाह।व्यापकत्वमितीति।धूमप्रागभावसत्त्वादित्यत्रघटत्वादावतिव्याप्तिरत। १८४

हेतुनिष्ठसाध्यसंबंधितान्यापकत्वंचोधर्मं १ अन्यथा
द्रव्यंजन्यतेसाधितमताहितत्त्वाकाशेस्वरूपात् ॥
स्वरूपिते

आह।तत्राधिकरणे इति। यदधिकरणं तर्भावेन साधने साध्यसामानाधिकरण्यं तदधिकरणं तर्भावेणोपा
धेरपात्येवं क्रमेणेत्यर्थः। सत्तायां द्रव्यत्वसामानाधिकरण्यं प्रदेपितत्र न घटत्वसामानाधिकरण्यमपि ति
नातिव्याप्तिः। पर्यवसितार्थमाह। तेनेति। साध्यविशिष्टं यत्साधनतावच्छेदकावच्छिन्नसाधनं तद्वृत्त्वव्यापके
त्यर्थः। अधिकरणताद्यप्रवेशे गौरवादाह। निरुक्तेति। साध्यविशिष्टेत्यर्थः। साध्यवैशिष्ट्यं च साध्यताव
च्छेदकावच्छिन्नसाध्यविशिष्टत्वं। तेन गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र गुणकर्मान्यत्वेना
व्याप्तिः। एतच्च तादृशव्यापकताविवक्षणे च। साधनतावच्छेदकावच्छिन्नत्वस्य फलमाह। नवेति। निर्मेह
स्पर्शादित्यत्र शीतस्पर्शान्यत्वस्य साधनव्यापकतया सर्वमतएवानुपाधित्वरूपान्यत्वस्य तु साधनाव्यापक
त्वेपि द्रव्यत्वाभावविशिष्टसत्तावत्तिस्पर्शादौ सत्त्वेन विरोधाभंजकतया एतन्मतएवानुपाधित्वमिति
उभयमुपात्तं। यद्यप्यत्र ते विशेषणत्वं रक्षितुं इदं। विशेषणत्वव्यावर्त्तकत्वं। तेनाश्रयतया।

सामानाधिकरण्येन वा। आद्ये शीतस्पर्शान्यत्वेति। शीतस्पर्शान्यत्वस्याश्रयतयाप्यस्पर्शान्तरव्या
भा वर्त्तकत्वात्। अत एव मिश्रव्याख्यानमपि दूषितं। शीतस्पर्शान्यत्वविशिष्टस्पर्शत्वरूपे विशिष्टे संबं
९८५ न धितावच्छेदके विशेष्यांशस्य धर्मतावच्छेदकांशमपहाय विशेषणांशस्य शीतस्पर्शान्यत्वस्योपाधित्वप्र
संगात्। द्वितीये रूपान्यत्वेति। रूपान्यत्वविशिष्टसंभिन्नेत्यादौ धर्मत्वविशिष्टाधिकरणवृत्तित्व
195 सामान्यस्याव्यावृत्तित्वात् धर्मत्वस्यावच्छेदकत्वमुपपन्नं। धर्मवान्वह्नेरित्यादौ धूमात् समानाधिकरणे
योगोलकत्वादौ वह्नित्वविशिष्टाधिकरणावृत्तित्वसामान्यस्य सत्त्वान्नातिप्रसंगः। तच्चादिद्रव्य
त्वादिविशिष्टावृत्तित्वविशेषस्यायोगोलकत्वादाववृत्तेर्वह्नित्वादावतिप्रसंगस्य ततः सामान्येति।
ननु संयोगेन वह्निसमानाधिकरणभेदाभावादौ धूमाधिकरणावृत्तित्वस्य संयोगरूपस्य कालिकादि
संबंधेन सत्त्वान्न तद्वृत्तित्वानां तत्तत्संबंधेन समवायादिना वृत्तित्वं वाच्यं तथा च संयोगेन वह्निस
मानाधिकरणभेदाभावादौ समवेतत्वोत्वजातिधर्मवद्वृत्तित्वस्य तादृशजात्यवृत्तित्वाभावादसंभव ९८५

स्येत्याहास्वविशिष्टेति। स्वं अवच्छेदकत्वेनाभिमतं धर्मत्वादिधर्मकान्वकेऽस्त्यादौ च वह्नित्वादवृत्ति
व्याप्तिवारणाय यावदिति। गुणत्वसत्त्वादित्यादावतिव्याप्तिनिरस्यति सत्तात्वेति। स्वविशिष्टसत्य म
मात्मकर्माचत्वेति। एवं चतुष्कावच्छेदकत्वनिर्वचने। मेयत्वादेरपीति। इदं वाच्यं मेयादित्यादौ मेयत्वस्य
वाच्यत्वसामानाधिकरण्याभाववत्तिगगनादौ सत्त्वेपि वाच्यत्वासमानाधिकरणस्य गगनादेः सत्
स्य मेयत्वविशिष्टमेयाधिकरणावृत्तित्वादनवच्छेदकत्वमुपपन्नमिति। अर्थः। मे घिलमतं इत्य
ति। यत्त्विति। वृत्तिश्च मेयत्वमित्यत्र मेयत्वस्यैव यथार्थं इति मत्त्वमेव निरुक्तपदर्शितं। मेयत्वादिनेति।
तेन मेयादिति प्रयोजनोपपत्तिः। वृत्तिमत्संगतात् द्रव्यत्वादिना। पिधूमादिनिष्ठवह्न्यादिव्याप्तिग्रहप्र
संगात् संबंधसामान्येन पक्षसाध्य[illegible]तोयात्र रूपवत्त्वविशिष्टसत्तातो व्यावर्तनत्वादित्यभिप्राय
कं रदा उक्तरीत्याय धाक्रतविशेषणत्वस्यापि सत्वादाहातत्रेति। शीतस्पर्शान्यत्वस्यापि आश्रयतया
साध्याभावविशिष्टसाधनव्यावर्त्तकस्य तस्य सत्वात्तत्रातिव्याप्तिवारणाय समानाधिकरण्येनेति

त्व१

मा तेन संबंधेन तत्त्वावच्छिन्नं हि तेन संबंधेन तदवृत्त्येव भवतीति साध्याभावविशिष्टसाधनसामानाधिक
१८६ रण्यं लब्धं तथा च तावन्मात्रेऽतिरिक्तसामंजस्ये व्यावर्त्तकत्वं व्यर्थं भव्याप्तिकरं चेत्याशयेनाह साध्याभा
196 वविशिष्टेति साध्याभावविशिष्टनिरूपितसाधनव्यापकीभूताभावप्रतियोगितावच्छेदकत्वं साध्यवि
शिष्टनिरूपितसाधनसमानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मे विशेषणमिति वस्तुतोऽर्थः।
तेन जातिमान्मेयत्वादित्यादौ साध्याभावविशिष्टसाधनवृत्तिजात्यादौ नपाधिता घटकत्वसंबंधेन वृ
त्तित्वाप्रसिद्ध्या सत्तादावुपाधौ नाव्याप्तिः। तादृशप्रतियोगित्वं च उपाधिघटकत्वसंबंधावच्छिन्नं ग्राह्य
तेन धूमवान्वह्नेरित्यादौ संयोगेन धूमविशिष्टवह्निव्यापकत्वस्य वह्नेः साधनवत्त्वस्य व विपक्षनिष्ठसंम
वायसंबंधावच्छिन्नाभावप्रतियोगित्वेऽपि नातिव्याप्तिः। यथाश्रुतत्यागे बीजमाह एवं चेति सत्तो
व याश्चभेदेपीति द्रव्यत्वाभावविशिष्टसत्तातो द्रव्यविशिष्टसत्ताया अभेदेन व्यावर्त्तकत्वासंभवा
दिति भावः। साधनतावच्छेदकविशिष्टघटकस्य निरूपितपदस्य व्यावृत्तिमाह। न वेति नन्वेतावतैव सा। १८६

मंत्रस्येसाधनतावछेदकभिन्नेत्यस्यवैयर्थ्यमत आह। इत्थंचेति। तत्र साधनतावछेदकभिन्नत्वंघनि
ष्ठलमव्याहार्यंदंदधीतिसाध्यंवनोपाधिरिति मतेप्याह। जन्यंवेति सामानाधिकरण्यसंबंधेनजन्यत्व।
विशिष्टंदधियत्रतत्रावश्यंदधित्वेजन्यत्वाभावविशिष्टंदधियत्रदधिमत्तिदध्यारंभकपरिमाणेत
त्रावश्यंदधित्वाभाव इतिक्रमेणविरोधमंजकेदधित्वादौसाधनतावछेदकभिन्नत्वाभावादव्याप्तेरि
त्यर्थः। साधनतावछेदकभिन्नेनेत्यस्यसार्थक्यंकर्तुंपदेति। इत्थंकल्पेचिप्रोबणनिष्ठत्वरूपवसद्धेतुनि
रासः।। अपरकल्पेतु इत्थंदलेनसद्धेतुनिरासः। इत्थंकल्पेतु तद्दलस्यसद्धेतुसाधारण्यंतथाव्याख्या
नात्। अनवछेद्यांतदलेनैवतद्वारणमितिदर्शयति। अकृतेति। सद्धेतौतुसाधनतावछेदकावछिन्नेव
साध्यसंबंधितेतितन्निरासः। तस्यसाधनतावछेदकस्यद्रव्यगुणकर्मान्यत्वेसतिसत्त्वादित्यत्रगु
णकर्मान्यत्वविशिष्टसत्तात्वस्यद्रव्यत्वाभावविशिष्टसत्तावृत्तित्वेनानवछेदकतयातत्रगुणक
र्मान्यत्वादौउपाधिलक्षणस्याव्याप्तिरत आह। तद्विशिष्टेति। अकृतसाधनतावछेदकविशिष्टसा
धनस्येत्यर्थः। विशिष्टसाधनातिरिक्तत्वात्पूर्ववदोषइत्यतसाध्याभाववत इति। अपरत्रचविशिष्टनिरू

भा गमत पिताधिकरणतानगुणादावितिनदोषः॥ इदंत्वत्रावधेयं। यथासंयोगस्यदंडपुरुषप्रतियोगिकस्य भू
तलादौसत्वेपिपुरुषेदंडाभावदशायांनदंडविशिष्टपुरुषप्रतियोगिकत्वंतथागुणसत्ताप्रतियोगि
१५७ कसमवायस्यगुणादौसत्वेपिनगुणकर्मान्यत्वविशिष्टसत्ताप्रतियोगिकत्वंतेनगुणादौसमवायेन
१९७ विशिष्टसत्तावत्वमिति। यत्तुगुणकर्मान्यत्वस्यपरंपरयाभानेगुणकर्मान्यत्वसत्तावत्संबंधत्वेनगुणक
र्मान्यत्वविशिष्टसत्ताश्रयसमवायसत्वेपिगुणादौनतादृशधीरितितन्नुच्छं। गुणकर्मान्यत्वविशि
ष्टसत्तावानितिप्रतीतौगुणकर्मान्यत्वस्यविशेष्येपरंपरासंबंधेनअप्रकारत्वात्। अतएवगुणकर्मा
न्यत्वविशिष्टसत्तायाःसमवायेनसाध्यत्वंतत्रतत्रोक्तंसमवायेनतदभावस्यप्रतिपादनंचसंगच्छतेइ
तरथासर्वंदुर्घटंस्यादिति। एतेनतादृशानवच्छेदकत्वनिर्वचनेनानुमेयत्वरूपेणमेयानवच्छेद्यत्वंज्ञा
इंधनवकृत्वावच्छिन्नसंबंधितायांरसिद्धमतआह गुणवदिति। अत्रगुणकर्मान्यत्वविशिष्टत्वंहेतु १५७
तावच्छेदकं। समवायेनचहेतुताबोध्या जातित्वघटकनित्यत्वादेरित्युपलक्षणंतद्घटकस्यसर्वस्यैवनिः
प्रयोजनकत्वात्। परंतुयत्किंचिद्विशेषणानिर्देशेतादृशविशिष्टत्वस्यसत्वंतसमभिव्याहारेणबतिपा

उपाधेःसाधनाव्यापि
नैयत्यात्

दनासंभवइतियद्यपिगुणकर्मान्यत्वविशिष्टजातित्वावच्छेद्यत्वाप्रसिद्ध्याकथंतत्रातिव्याप्तिस्तथापिप्रकृत
साध्यसंबंधितावच्छेदकत्वंसाधनतावच्छेदकेवाच्यं।अतएवसाध्यविशिष्टस्येत्यादिनातथैवदर्शयिष्यति।
प्रागुक्तानुपपत्तेराह।अवच्छेदकत्वंचेति।प्रकृतसाधनस्यवारद्वयप्रवेशोगौरवान्नदूषेष्यानिस्फुटार्थमाह
तथाचेति।साध्यविशिष्टस्येति।साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टस्येत्यर्थः।तेनगुणकर्मान्यत्ववि
शिष्टसत्तावानित्यत्रगुणकर्मान्यत्वस्यशुद्धसाध्यविशिष्टसाधनाव्यापकत्वेपिनाव्याप्तिः।अत
एवसाध्यसंबंधितानवच्छेदकत्वमित्यत्रापिसाध्यतावच्छेदकावच्छिन्नसाध्यसंबंधितानवच्छेदकत्वंवा
च्यं।अन्यथाजातित्वस्यसत्तासंबंधितावच्छेदकत्वेनतत्रैवाव्याप्तिः।इदंद्रव्यंजन्यत्वेसतिसत्त्वादौस्पर्शत्वा हिता
दावव्याप्तिवारणायसाधनतावच्छेदकावच्छिन्नेति।नप्रदर्शितेति।निरुक्तेहेतौस्पर्शादित्यादावितिभावः।शीतपद
स्यगुणिपरत्वभ्रमवारणायस्पर्शेति।स्पर्शान्यत्वेपयाकृतंमिश्रव्याख्यातंतत्रविशेषणत्वंनसंभवती
स्पर्शत्वेनगन्धस्पर्श तितद्विशिष्यखंडयितुंशीतेति।शीतस्पर्शान्यस्पर्शत्वेसंबंधितावच्छेदकेशीतस्पर्शान्यत्वस्यतादृशविशेषणत्वे

गौतं॰ ?॰ [illegible] व्यतिरेक घटपि ? गारहत्वे मेव करणे इनाव ? सर्वदृत्ते साध्यवत्त्वं घटितानवच्छेदकावच्छिन्न अविशेषणले ? [illegible] तदेवाविशेष संदिग्धानैव व्यापकत्व मात्रनिरूपितप्रकारकत्व [illegible] इति

नातिव्याप्तिरनुमानादित्यभावः। घ्वंसत्वादिना ध्वंसत्वादित्यादौ रूपान्यत्वपरिग्रहः। ध्वंसत्वादित्यादौ साध्य
१८८ शून्यगुणादौ सत्तायाः सत्त्वेन गुणकर्मान्यत्वादेः तद्व्यावर्तकत्वासंभवादाह। यत्सामानाधिकरण्येति। गुण
वा॰नं॰भ॰ कर्मान्यत्वविशिष्टसत्तायामपि साध्यशून्यगुणादिवृत्तित्वाभावादाह। साध्याभावविशिष्टेति। ध्वंसगुण
168 न्यत्वे सति सत्त्वादित्यत्र कर्मान्यत्वे ऽव्याप्तिवारणाय प्रकृतेति। साधनतावच्छेदकावच्छिन्नेत्यर्थः। ध्वंसत्वा
दित्यादौ कर्मान्यत्वस्य साध्याभावविशिष्टसत्तावृत्तिमव्यावर्तकत्वादतिव्याप्तिरतः सामान्यादीति। ध्वंसा-
जन्यत्वे सति सत्त्वादित्यादौ स्पर्शवत्त्वे ऽव्याप्तिवारणाय द्वितीयदले प्रकृतेति। एवमिहार्थकं। ध्वंसत्वादित्या
दौ घटत्वादावतिव्याप्तिवारणाय सामान्येति। इत्थं साध्याभावविशिष्टप्रकृतसाधनाधिकरणसामा
न्यभेदव्याप्यतावच्छेदकं यत् साध्यविशिष्टप्रकृतसाधनतावच्छेदकं तद्वत्त्वं फलितोऽर्थः। न तु साध्याभावविशि
ष्टप्रकृतसाधनाधिकरणत्वव्यापकीभूताभावप्रतियोगितावच्छेदकं सत्त्वं यत् साध्यविशिष्टसाधनव्या
[illegible] सर्वनाम॰ पकतावच्छेदकं तद्वत्त्वमित्यर्थः। तथा सति सर्वकस्यापि भेदः स्यादिति। सार्वभौममतमवलम्ब्याह। केचित्तु १८८

व्यापक॰ २

लीवे
तिसामानाधिकरण्यप्रत्यासत्त्यावच्छेदकत्वे विवक्षमाणे सामानाधिकरण्यस्य प्रवेशाद्व्यर्थतां दर्शयितुमाहु
विशेषणं सामानाधिकरण्यमिति तत्पाद्ये हेतुत्वरूपव्याप्तित्वेन कथं तन्निरूपसंबंधितावच्छेदकत्वमत आह तथ
चेति। सामानाधिकरण्यसंबंधेन विशिष्टबुद्धौ मानाभावान्न तत्संबंधस्य प्रत्यासत्तित्वमत आह। अवच्छेदकीभू
तेति। यत्र नवान्वके इत्यादौ आर्द्रेन्धनजवह्नित्वमेव स्वरूपसंबंधरूपावच्छेदकं लाघवान्न तु तादृशवह्नि
त्वं सामानाधिकरण्यगौरवादित्यतो ऽवच्छेदकं निर्वक्ति। अवच्छेदकत्वं चेति। प्रत्यासत्त्यादित्यत्र महत्त्वस्य न संग्र
हत्वं प्रत्यक्षत्वाभाववद्विशिष्टरूपवति चक्षुरादौ महत्त्वस्य सत्त्वेन वक्ष्यमाणलक्षणाभावादुद्भूतेति। अ
त्वचक्षुर्योग्यत्वं च तावद्ध्येते न प्रत्यक्षाविषयस्यापि उद्भूतरूपवतो महत्त्वसत्त्वेपि न क्षतिः। अत्र अत्र यद्वत्त्वसा
मानाधिकरण्यं गुणत्वादौ तत्र न महत्त्वसामानाधिकरण्यं महत्त्वसामानाधिकरण्यं गगनत्वादौ तत्र न प्रत्यक्षत्व
सामानाधिकरण्यं तथापि त्यादौ हेतुतावच्छेदकावच्छिन्नहेतुर्वाच्य इति भावः तन्निदर्शयितुमुदाहरणांतरं व
आह। मतान्निति। वक्ष्यमाणलक्षणाक्रांतत्वं घटितावनित्येति। तेन महत्त्वविशिष्टद्रव्यत्ववति गगनादौ

भा.
१५८
१९

अनित्यसमवेतस्पर्शत्वेसत्त्वेपि न वृत्तिः। अत्र महत्त्वसामानाधिकरण्यं गगनत्वादौ तत्र नानित्यसमवे
तत्वसामानाधिकरण्यं अनित्यसमवेतत्वसामानाधिकरण्यं गुणत्वादौ तत्र न महत्त्वसामानाधिकरण्यमि
ति तत्पापीत्यादिहेतुपदद्वयं हेतुतावच्छेदकावच्छिन्नपरं। तेन महानित्यद्रव्यत्वादिस्तत्र गुरुद्रव्यत्वे गगनाव
च्छेदेन महत्त्वसामानाधिकरण्यवत्तितदवच्छेदेनानित्यसमवेतत्वसामानाधिकरण्यं विरहेपि नासं
संगः॥ न वायवीयकर्मान्यत्वे सतिसत्त्वादिमादौ गुरुद्रव्यत्वायां कर्मावच्छेदेन द्रव्यत्वसामानाधिकरण्याभावव
त्वां तदवच्छेदेन गुणान्यत्वसामानाधिकरण्ये सत्वेपि गुणान्यत्वे व्याप्तिरिति। अत्र चोभयत्रानतिरि
क्तवृत्तित्वावच्छेदकेऽवच्छेदत्वनिष्ठत्वं निवेश्यं न न्यूनवृत्तित्वावच्छेदकेपि वैयर्थ्याहितिध्येयं॥ द्रव्यं सत्त्वा पत्रा ४
दित्यत्र कर्मान्यत्वेघटपिवत्त्वादौ चातिप्रसंगं निरस्यति सत्त्वनिष्ठेत्यादिना। तन्निष्ठेति सत्तानिष्ठेत्यर्थः।
सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्यस्यातिरिक्तस्वत्वीत्यर्थः। एवमुत्तरत्रापि। तदभावो द्रव्यसामानाधि
करण्याभावः। जलादावितितदवच्छेदकं द्रव्यत्वसमानाधिकरण्यावच्छेदकं जलाद्यवच्छेदेन सत्ता १५८

जर

यं द्रव्यत्वसामानाधिकरण्यस्य सत्वात् पृथिवीत्वसामानाधिकरण्यस्य चासत्वादित्यर्थः। साध्यव्यापका
नां। वह्न्यादिव्यापकानां द्रव्यत्वादीनां सद्धेतौ धूमादौ धूमनिष्ठद्रव्यत्वादिसामानाधिकरण्यस्य सा
धनतावच्छेदकभिन्नत्वात् एवं दोषरत्यतस्तादनवच्छेद्येति पदं च साध्यसमानाधिकरणविशेषणं। तेन
नातिप्रसंगः। तच्च केवलान्वयिकत्वाभावसामानाधिकरण्यस्य नाव्याप्यवृत्तित्वमित्यस्वरसः। ननु घटः प्रत्यक्षो
मूर्तत्वादित्यादौ व्यभिचारोन्नायकतयानुकूलरूपवत्त्वाद्युपाधित्वं सर्वसंमतमेव तत्र च निरुक्तावच्छेदक
त्वाभावात् एवं तत्र विशेषणमनुपाधिरिति नियमः कथमिति शंकते। नन्विति। यत्किंचित्सोपाधौ सर्वेणोपाधिना सा
ध्यसंबंधो वह्निघटत इति नियमोऽस्त्येव यथाऽवद्वान् कालाकाशान्यतरत्वादित्यादौ। अत सर्वत्रेति। सर्वत्र सोपा
धौ समनियतस्योपाधेर्निरुक्तावच्छेदकत्वसंभवादाह। सर्वेणेति। तदसंभवात्। अत एवोद्भूतत्वाभावविशिष्टमूर्तत्ववति
परमाणावुद्भूतरूपवत्त्वस्य सत्वेन निरुक्तावच्छेदकत्वासंभवात् तामुद्दिश्य साध्यव्यापके साधनस्य तद्व्याप्यतावच्छेदकत्वा
संभवे। तमाह धूमादिकमुपेक्ष्य याश्रुतवक्ष्यमाणलक्षणेति व्याप्तिं दर्शयितुं साधनावच्छिन्नसाध्यव्यापक

अवच्छेदकत्वघटित
विशेषणतावत्त्वम्

त्रै

साध्य

भा. मेवोदाहृतवान्। तथात्वसंभवः निरुक्तसाध्यसंबंधितावच्छेदकत्वसंभवः। तत्र उपाधौ। तादृशनियमवादिमते नि
२०० रुक्तसाध्यसंबंधितावच्छेदकत्वनियमवादिमतेरिदंलक्षणमिति। तथा च लक्ष्यतावच्छेदकमविवक्षित्वैवेदमपित
थारुक्तमेवेति लक्ष्यतावच्छेदकेन तदसंग्रहेण दोषायेति। यथाश्रुतलक्षणेन उद्भूतरूपवत्वादेरवारणादाह। सा
धनाव्यापकेति। उद्भूतरूपवत्वादेरपि द्वित्वाद्यवच्छिन्नाभाववत्यात्मादृशसाधनाव्यापकत्वादाह। तादृशसाधनासामा
नाधिकरणपर्यवसितमिति। तथा च तादृशसाधनव्यापकीभूताभावप्रतियोगितावच्छेदकं तद्द्रव्यत्वमित्यर्थः। तेन
जातिमान् भावत्वादित्यादौ साध्याभावविशिष्टसाधनाधिकरणे जात्यादौ समवायेन वृत्तित्वाप्रसिद्ध्या सत्तादा
वुपाधौ नाव्याप्तिः। पदव्यावृत्तिस्तु स्वयंकाग्राह्योपदर्शितेति। प्रत्यक्षो मूर्त्तत्वादित्यत्र उपदर्शितोद्भूतरूपवत्वा
देरुपाधित्वमुदाहरणमित्यर्थः। प्रत्यक्षः प्रत्यक्षस्वरूपयोग्यः। तेन घटत्वेन सत्त्वंताभावः। साध्यव्यापकत्वेन साध्य
तावच्छेदकावच्छिन्नसाध्यव्यापकत्वेनाते न गुणकर्मान्यत्वे सति सत्तावज्जातेरित्यादौ द्रव्यत्वेनाव्याप्तिः। ननु व्यभि भा. २००
चारोन्नयनरूपस्योपाधिफलस्योद्भूतरूपवत्वादावपि सत्वेन तद्वारणमेव किमर्थमिति शंकायां मूलं यो

भा प२ यद्रुपाधितावच्छेदकं ६

जयति। साध्याभावसंबंधिनीत्यादिना संबंधः सामानाधिकरण्यं। तदसमर्थानां। तादृशोपपादनासमर्थानां केवल
विपक्षगामिनीचिह्नेसाध्यसंबंधासंभवेन न विरोधसंभावनापीत्यत आह। सपक्षविपक्षेति। अत एवैतानीति व्य
भिचारे चावश्यमुपाधिरिति ग्रंथेन व्यभिचारस्योपाधिव्याप्यत्वप्रदर्शनेन तत्फलं च व्यभिचारेणोपाध्यनुमानं व्यभिचारो
न्नयनस्योपाधिफलत्वे व्यभिचारेणैवोपाध्यनुमानं व्यर्थमेवं स्यादतो विरोधभंजनमेवोपाधिफलमिति मूलार्थः।
प्राभाकरमतोपष्टंभेनात एव तत्रैवं व्याख्यायते आचार्यमतोपष्टंभेन चतुर्थमत एवेत्यादिव्याविरव्यासुराह्यत एवे
ति। स्वाभाववित्का। किंचिदनवच्छिन्ना। अत एव स्वाभाववित्कहेतुतावच्छेदकस्य साध्यसंबंधितानवच्छेदकत्वादेवा अन्न
यास्वाभाववित्कहेतुतावच्छेदकस्य साध्यसंबंधितावच्छेदकत्वे तत्र विशेषणतया साध्यसंबंधितावच्छेदकत्वभ्रमज
नकत्वरूपं तत्संक्रामकत्वमनुपपन्नमेवं स्यादित्यपष्टंभ उपष्टंभोपष्टंभकतया साध्यसंबंधितावच्छेदकत्वस
णव्याप्तिरित्यस्योपयोगः। उपाधिपदनिविष्टस्य उपपदस्यार्थमाह। स्वसमीपेति। सामाध्यं तावन्नसंयुक्तसंयोगा
त्मीयत्वमित्यादि। स्वसमानेति। संक्रामकतयेति। स्वविशिष्टहेतुतावच्छेदकस्य साध्यसंबंधितावच्छेदकत्वव्युत्पा

१ उत्पन्नपाधावतंमकार

भा॰ ४ व्यभिचारोन्नायकत्व रूपपादूषितं॥ तद्व्यतिरेकेण साध्यव्यापकव्यतिरेकेण॥ तर्हि संदेहव्याप्यकतौ कीर्तिं किं कमर्मतमनुहसाधनत्वस्तीति॥ श्रीः
दत्तेनोपाधेर्हेतौ साध्यसंबंधितावच्छेदकसंक्रामकत्वमिति भावः॥ साध्यव्याप्तस्यैवेति॥ एवकारेण विषमव्यापक॥
२०१ निरासः॥ विषमव्यापकेस्वनिष्ठसाध्यव्याप्तेरभावेन तत्संक्रामकत्वायोगादिति भावः॥ साध्यन्यूनवृत्तौ॥ साध्यव्या
201 पकेसाध्यव्याप्येन्नाच्यतयेति॥ उपाधिपदस्येति मध्यस्थितमनुषज्यते॥ तमव्याप्तस्यैव लक्ष्यत्वेन विषमव्याप्य
साधारणत्वान्नाव्याप्तिलक्षणत्वं घटत इत्यत आह॥ इष्टमौपाधिकमिति॥ साधनवन्नीति साधनवत्त्वेन ज्ञाते॥ धो
त्साधनवत्त्वे सति साध्यसंबंधाभावात्॥ प्रकारांतरं तु पाध्यभावातिरिक्तव्यभिचारानुमानप्रकारांतरं परं॥ तथाहि
धोन्निरिति॥ न तुल्यत्वेन तथैव निवेश इति भावः॥ तेन उपाधिव्यवहारं॥ विषमव्याप्तेप्यिति॥ उपजीव्यत्रिनिमित्तसत्वात्
हा॥ योगिकमिति॥ योगानादरमिति॥ नयाच विषमव्याप्तेप्युपाधिपदं मुख्यमेवेति भावः॥ अप्रयोजकत्वादव्यपिच
भिचारोन्नायकत्वरूपोपाधिसत्त्वेनेष्टापत्त्यापादनं न घटत इत्यतो व्याचष्टे॥ उपाधिपदेति॥ अप्रयोजकत्वादव
पितु पाधिपदप्रयोगेनेष्टापत्तिरिति भावः॥ ननु योगानादरे विव्यभिचारोन्नायकत्वमेव कुत इति विषयतावच्छे
दकमस्त्वित आह॥ योग्येति॥ लाघवादिति साध्यव्यभिचारानुमापककोटिप्रविष्टत्वापेक्षया साध्यव्यापकत्व २०१
२

स्य लघुत्वादिति भावः। साध्यव्यापकतामात्रइति। स्वनिष्ठव्याप्तिसंसर्गावच्छेदकतयैव साधनाव्यापकत्वलाभान्मात्र इति
व्याप्तिग्रहोपाये कथनीये प्रथमं साभाकरमतोपन्यासं संगमयन्नाह। व्याप्तीति। प्रत्येकपदस्वरसस्वादिरूपत्वइयमाह।
दर्शनानामिति। प्रत्येकं दर्शनानंतरमेकरूपे स्मरणेति विकरूपेणतत्तदुक्तित्वादिना। हेतुत्वं। फलोपधायकत्वं। ननु भूयो
दर्शनस्य हेतुत्वे स्वंग्रनीयेन चेत्यादि तज्जनितसंस्कारहेतुत्वस्वेउनमपक्त्त मनस्त्तं संगमयितुं विकल्पयति। मिल
नमपीति। किंतु नं एकस्मरणस्याद्यित्वं। स्वरूपतः स्वरूपाणां। व्यापारतः तत्तद्व्यापाराणां। तृतीयं। व्यापारतो मिल
नं व्यक्तिसहचरितो धर्म इत्याकारकसहचारदर्शनजन्यसंस्कारस्य धर्मव्यापकव्यक्तिसमानाधिकरणो धर्म इत्या
कारकव्याप्तिज्ञानं समानविशेष्यकं भवत्येवातो मेलनं संगमयति। व्यापकेत्यादिना। प्रथममेव। तादृशसंस्कारमि
लनात्पूर्वमेव। भिन्नविषयकत्वात्। साध्यविशेष्यकव्यापकत्वप्रकारकमपेक्ष्य धर्मविशेष्यकसाध्यसहचारप्र
कारकसंस्कारस्य भिन्नविशेष्यकत्वात्। ननु शुक्तिविशेष्यकरजतत्वप्रकारकभ्रमे रजतविशेष्यकरजतत्व

भा

२०२ प्रकारकसंस्कारस्य भिन्नविशेष्यकत्वात्तस्यापि हेतुत्वं दृष्टमेवेत्यत आह। भ्रमत्वेति। न तु ज्ञानद्वयमेव भ्र
मद्वयमनुपपन्नं भेदाग्रहकालीनस्य शुक्तिरजतगोचरसमूहालंबनस्य धर्मधर्मिभावानवगाहिनोपि
तन्मते भ्रमत्वादाह। नत्विति। तथा च वैशिष्ट्यावगाहित्वव्यवच्छेदनियमो न तु ज्ञानद्वयेपीति भावः। रजत
भ्रमस्य शुक्तौ रजतवैशिष्ट्यावगाहित्वे विभिन्नविशेष्यकत्वं स्यात् तत्तन्निष्ठकत[illegible]मतं वा। अग्रे तथैतस्य
अन्यत्रापि सत्वान्नतथेति पाठं संगृह्य व्याचष्टे। नतथेति। भूयोदर्शनत्वाभावे साध्यबाध इत्यतो व्याचष्टे। नव्या
प्तिग्राहकमिति। व्यभिचारादर्शनस्य हेतुत्वे तेनैव तर्कोन्यथासिद्ध इत्यतो व्याचष्टे। व्यापारतयेति। व्यापारे
ण च व्यापारिणो नान्यथासिद्धिरिति भावः। तर्कस्य हेतुत्वे भूयोदर्शनस्योपयोगित्वं दर्शयति। व्यभिचारे
त्यादिना। व्याप्त्यंतरेति। यद्यपि तत्तत्साधनत्वनिरूपिततत्तत्पानत्वनिष्ठव्याप्तेर्वह्निधूमव्याप्तिग्राहकत्वेमा
नाभावः। तथापि तद्व्याप्तिज्ञानमेव सर्वत्र तर्कमूलमिति भावः। तस्यैवं यं शंकेति भावः। अकारणककार्योत्प २०२
त्तिशंकानिरासद्वारा वह्निधूमव्याप्तिग्राहकतर्कस्योपयोगित्वमित्यप्याहुः। केचित्तु। यद्यज्ञातमात्रस्य तादृ

शाव्याप्तिज्ञानं तर्कं विना तथा च कथं मत्व्याप्तिग्राहकतर्कमूलव्याप्तिज्ञानमपि तर्कं विना भविष्यतीत्यपत्तिवं दि
विधया मूलं येन जयं तीति तनु जातमात्रस्य तादृशव्याप्तिज्ञानं तु । विनानुभवमिति तथा च न तदनुभवः प्रत्यक्षा
त्मक एव वाच्यः । शाब्दबोधादेः पदार्थस्मृत्यादिमूलकत्वात् । एवं च तत्रैव तर्कस्य व्यभिचार इति भावः । अस्तु तादृश
व्याप्त्यनुभवः । पर्यनुयोगेति । तर्कोपि संशयामननवस्थातदनपेक्षायां व्यभिचार इति भावः । चपनादित्वेनेति । अ
नाद्यैव स्याद्बीजांकुरवन्न दोषायेति व्यर्थः । परत इति । यत्र तर्के व्याप्त्यनुभवो मूलमित्यादिनानुग्रंथकारेणैव
तत्कल्प्यस्याश्रयणीयत्वादिति भावः । अवान्तरजातिभावे हेतोरदर्शनान्नत्तरस्यति । मानाभावादिति । तर्कजन्यता
वच्छेदकतयैव मा हृशजात्तिः स्यादत आह । तर्कस्येति । न तु सामान्यतयेतस्य व्यावृत्तिं दर्शयितुमाह । यदि चेति । पु
रो वर्तिनि शुक्तित्वग्रह इति । बंधकदोषसत्वकाले शुक्तित्वस्मृतिमतोपि शुक्तित्वसामान्यलक्षणया ज्ञानाभा
वादाह अगृहीतपुरोवृत्तीति । तद्गृहः सामान्यग्रहः । मूले काकतालीयत्वशंका । व्यभिचारशंका । सामग्या व

भी आत्मनो पकत्वज्ञानेभूयोदर्शनस्योपयोगंदर्शयति। साध्याव्याप्यत्वमित्यादिना। ताद्दशेति। स्वानधिकरणसाध्या
२२ ■धिकरणाव्यक्त्यंतरेत्यर्थः। मूले सर्वमनौपाधिकत्वज्ञानं व्याप्तिधीहेतुरित्यत्र। इदानीमुपाधिज्ञानाभाव
203 स्तेहेतुरिति शंकते। अथेत्यादि। बहिरिंद्रियव्यापारदशायां बहिरिंद्रियसहकारित्वेपि तद्व्यापारासत्वदशायां म
नःसहकारित्वसंभवात् तद्व्यापारंविनेति। मूलमनुपपन्नमतो मात्रपदमंतर्भाव्य व्याचष्टे। तदाहितेत्यादिना।
भूयोदर्शनाग्राह्यत्वंपयाकृतः परिशेषा। स च सकृद्दर्शनग्राह्यत्ववादिमतेपि भूयोदर्शनविषयत्वरूपत
द्ग्राह्यत्वसंभवादसिद्धः। भूयोदर्शनत्वेन भूयोदर्शनजन्यग्रहविषयत्वं तु तद्ग्राह्यत्वं प्रतियोगप्रसिद्ध्यादिना
दुर्वचमतः परिशेषमाह। साध्यसाधनेति। यद्यपि साधनेनुपाध्यभाव साधनमेवतन्मात्रग्राहकातिरिक्ता
नपेक्ष्येयेवक्तुंमुचितं तथाप्यनौपाधिकसंबंधरूपा व्याप्तिः पक्षः—जत एव निरुपाधिकसंबंधरूपव्याप्ति
त्वेन चेति वक्ष्यति। तद्ग्रहे च साधनग्राहकातिरिक्तस्य साध्यसाधनसंबंधग्राहकस्यापेक्षणीयत्वादसिद्धिरत २२

स्तयोरुक्तसाध्यसाधनसंबंधग्रहत्वव्यापकविषयिताव‍च्छिन्नजन्यतानिरूपितजनकतानाश्रयत्वं तदतिरिक्तत्वं तद
पेक्षग्रहविषयत्वं च ग्रहनिष्ठतज्जन्यताया विषयतयानवच्छेदकत्वे सति ग्रहविषयत्वं। तेनोपाध्यभाववादिमते
ग्राहकस्यापि समूहालंबनरूपसाध्यसाधनसंबंधग्रहजनकत्वेपि न क्षतिः। एवं च अयोगव्याप्ति। प्राथमिकसाध्यसा
धनसंबंधग्रहविषयासाध्यसाधनकसंबंधग्राहकातिरिक्तानपेक्षग्राहकत्वात्साध्यादिवदिति। ननु सहदर्श
नग्राह्यत्वव्यवस्थापने व्याप्तिलक्षणमसंलग्नमत आह। उपाध्यभावेति। उपाधिस्मरणेत्यादिना तद्व्यवहारहेतु
त्वादित्यन्तेन स्वरूपनाय विवक्षितार्थं दर्शयितुं यथाश्रुतार्थमाक्षिपति। नन्वेवमित्यादिना। एवं उपाधियोग्यानुपल
ब्धेरनुमितिहेतुत्वे। प्रसन्निरूपादित्यादिना व्याप्तौ ग्राह्यादिपरिग्रहः। कारणप्रदर्शनमिति। तथा च उपाधिस्मरण
इत्यादिकं कारणप्रदर्शनमुखेन कार्यपरमतोपाध्यभावत्वप्रकारकतानोपलक्ष्यत्वमिति भावः। नन्वतिरिक्ताभाव
वादिमते नुपाध्यभावत्वमपि ध्वंसत्वादिरूपमेव तथा च तत्प्रकारकज्ञानस्य हेतुत्वे व्यतिप्रसंगस्तदवस्थ एवेत
त आह। अभावत्वं चेति। अन्यदेतदिति। उपाधिर्नास्तीत्याकारकं विलक्षणप्रकारताशालिज्ञानं हेतुरतो नोक्तदो

भा॰ बइति भावः। नत्वेवमाकारकज्ञाने भूयोदर्शनापेक्षास्त्येवेत्यत आह। एवं चेति। व्याप्तिस्वरूपज्ञानेऽधिकापेक्षाने
२.४ तिभावः। नैय्यायिकमते व्याप्तिस्वरूपस्य चाव्यभिचारित्वघटितत्वात्तद्ग्रहे भूयोदर्शनापेक्षणादिति। आद्येति
२०५ अधिकरणस्वरूपनियतत्वादित्यर्थः। उपाधिस्मरणादिकं विनेति संबंधग्रह इत्यत्रान्वेति। आदिनोपाध्यभाव
त्वप्रकारकज्ञानजनकयावत्कारणपरिग्रहः। तदग्रहमात्रं उपाध्यग्रहमात्रं मूले चकाराधारणमर्मदर्शनादिरूपसं
अपाप शयविसामग्रीसंघटनायैतदुक्तमिति बोध्यं सचमदर्शने उपाध्यभावत्वेन निश्चयो दुर्घट इत्यत आह। स्मरयति। सत्त्वपे
धि इति। क्वचिद् संसर्गाग्रहादित्यपक्षमस्वरसाद्याचष्टे। न चात्रापीति। व्याप्तिग्रहमात्रविषयरासभ एव यथापदमेव
वक्तुमुचितं तथापि यत्र भ्रमस्तत्रस्मुतरां अन्यत्राधिभ्रमेऽपापादनायेसर्वत्रैव तदापादयितुमर्हमिति भावः। इ
त्यं च क्वचिद्रासभे यथा दोषमहात्म्याद्गवत्वारोपो भवति तथा सर्वत्र रासभे स्यादिति मूलार्थः। अवगतत्वस्य विव
क्षितत्वेऽनिरुक्तमहत्वसरत्रित्वेनाभावाग्रहदशायां सन्निकृष्टमहत्त्वसत्त्वाभावस्यावगतत्वेन महत्त्वसं २.४
योगात्यन्ताभावोऽवगतस्तत्प्रतियोगित्वसामान्याभावस्य तु ग्रहत्वादस्मिन्निति स्मरणमनुचितं अतस्वरसोक्तमप्य

५

वगत इति पदं शेषमतो व्याचष्टे । अवगत इति । स्वरूपेति । एवं चावगतज्ञानस्यानुमित्यजनकत्वादिति भावः । तथा
च महानसस्य सामान्यमादायैतादृशाभावोऽप्रसिद्धमत आह । महानसांतरासन्निकर्षादिना योग्यानुपलंभाभावाद
हा महानसत्वस्येति । तथा चैतन्महानसवृत्त्यत्यंताभावप्रतियोगित्वसामान्याभाव एतन्महानसासन्निकर्षकालेऽ
वश्यग्रह इति भावः । नन्वेतन्महानसनिष्ठात्यंताभावत्वप्रतियोगित्वस्यापि शशशृंगादिवृत्तेरतींद्रियस्यापि सत्वात् कथं त
त्सामान्याभावो योग्य इत्यतस्तद्योग्यतामुपपादयति महतीत्यादिना । योग्ये उद्भूतरूपवति योग्यवृत्तौ तादृशप्रतियो
गित्वसामान्य त्वेनोपलंभापादनसंभवादिति भावः । एतद्धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्व
स्य वह्नित्वादौ दुर्ग्रहत्वादाह । न धूमसामान्येति । साधनाव्यापकव्याप्यत्वाभाव इति । तद्व्याप्यत्वं तदन्यावृत्तित्वे स
ति तद्वृत्तिमत्वं इत्थं च साध्यतावच्छेदके तादृशसाधनाव्यापकव्याप्यतावच्छेदकत्वाभावः । तेन वह्निमान् धूमादि
त्यादौ साधनाव्यापकमहानसत्वपर्वतत्वव्याप्यत्वाभावकूटस्य प्रत्येकं वह्न्यावृत्तित्वेपि न क्षतिः । महानसीय
वह्नित्वस्य व्याप्यतावच्छेदकत्वे वह्नित्वे तदनव दकत्वं चावच्छेदकलक्षणे गौरवरीत्योपपादनीयं । मूलोपदर्शितस्य

भा.सह
२०५

द्विविधोपाधेः प्रथमोपाध्यभावघटितमनौपाधिकत्वं दर्शयित्वा द्वितीयोपाध्यभावघटितं दर्शयितुमाशङ्कते हि
नु निष्ठत्वार्थं चाह। एवमिति। साध्यसंबंधे साध्यसामानाधिकरण्ये। एवं च व्याप्तेरनौपाधिकत्वं स्वरूप
नोपि संगच्छते तदिति भावः। साधनतावच्छेदकातिरिक्तावच्छेद्यत्वं साधनतावच्छेदकानवच्छेद्यत्वे सत्यवच्छेद्य
त्वं। तेन वह्निमान्धूमादित्यादौ धूमनिष्ठसामानाधिकरण्यस्य धूमत्वातिरिक्ततत्तद्धूमत्वावच्छेद्यत्वेपि द्र
व्यं रूपादित्यादौ रूपनिष्ठसामानाधिकरण्यस्य रूपत्वातिरिक्तगुणत्वाद्यवच्छेद्यत्वेपि च न क्षतिः। एतच्च लघुगु
रुसाधारणं स्वरूपसंबंधरूपमवच्छेदकत्वं लक्षणघटकमित्यभिप्रेत्य परतः स्यात्साधननिष्ठसाध्यसं अस्याकरूपे साधनता-
बंधे साधनाव्यापकतावच्छेदकरूपावच्छिन्नसामानाधिकरण्यव्याप्यत्वाभावो नास्त्यर्थ इति ध्येयम्। इत्यनुश पकतावच्छेः प्रथमस
यान इत्याशयेनाहेत्यन्वयः। सामानाधिकरण्यमात्रस्यानौपाधिकत्वाविशेषितसामानाधिकरण्यस्य। तथा 'द्विरुचिनाहेतुरेवं
भावे सत्यदर्शनगम्यत्वं। मीमांसकमते विशेषणतानिधियो विशिष्टज्ञाने हेतुत्वात् दूरयति। तत्सामग्र
त्यादि। एतत्त्रयमनुपाधिश्चियोऽसत्वं। उपाधिसमाने इति। साधनाव्यापकस्यैव व्याप्यस्याक्षिप्तत्वात्त्वा २०५

त्वाभावं साध्येन योगपद्यमित्यर्थः। नन्वयोग्येति। तथा च सा धनाव्यापकग्रहत्वोक्ततद्रूपव्याप्यत्वाभावः। एवं च तत्र यादि
धर्मगुणादिव्याप्यत्वाभावः। एवं द्वितीयत्वात तत्र यत्र सहमितिभावः। उपाध्यभावत्वप्रकारकज्ञानस्यानुमितिहेतुत्वे
तदुद्ग्रहतात्पर्यार्थैर्मूलोक्तदोषस्यानुक्तिसंभवादाह। यथाश्रुतमिति। प्रत्यक्षे निर्णयात्मकप्रत्यक्षे। तथा त्वाभि
धानेऽन्यथा ग्राह्यसंशयस्यापि प्रतिबंधकत्वे। असाधारणेति। कालादावनिवेशे प्रयोजनाभावादिति कोटि
स्मृतिविशिष्टविशेषादर्शनादिरूपाणां तत्र साधनानां प्रत्येकं सत्वेऽपि निर्णयोत्पादादाह। मेलकेति। एवं विशेषा
दर्शनकोटिस्मृतिविशिष्टधर्मितानत्वादिना प्रतिबंधकत्वे। वैशिष्ट्यं चैककालावच्छेदेनैकात्मवृत्तित्वमिति भाव।
ननु व्यभिचारसंशयस्य तत्सामग्र्या वा नैव व्यभिचारग्रहत्वे प्रतिबध्यतावच्छेदकं तत्सत्वेऽप्यव्यभिचारसंशयोत्पादना
त्। नापि निश्चयात्मकतद्ग्रहत्वं नीलेतरघटत्ववन्निश्चयत्वस्य कार्यतानवच्छेदकत्वादत आह। विवेचितमिति।
तथा च निश्चयत्वस्य कार्यतावच्छेदकत्वमभ्युपेत्यैव मूलकमिति भावः। नुपविष्टादिति। संशयरूपात्वमिति व्य
वच्छेदेनावसर इत्यर्थः। ग्राह्याभावाभावव्याप्यत्वस्य साध्याभाववद्वृत्तित्वस्यासिध्या। न त्वसाध्याभाववद्वृत्ति

प्रतिबंधकत्वाभिधानं २

तत्र व्यदारहेत्वकारि
णि।

व्याप्तिग्रहोपायप्रवं
पत्राद्गाशति।

साधनमित्याकारकग्रहाभावो हेतुर्वाच्यः तादृशग्रहस्याभावे साध्यप्रतियोगिकत्वारोपेण सुघट एवेत्यत
आह । एवंउशरइति सर्वत्र साधने । तथा च मे साध्याभाववद्वृत्तीत्याकारकभ्रमे । अत एवेत्यस्यार्थं विवृणोति ।
सकलसाध्यतावच्छेदकइत्यादिना । तादृशावच्छेदकत्वेति । साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेत्यर्थः ।
तादृशावच्छेदकत्वग्रहस्य विषयताभावे उक्तसाधनसामानाधिकरण्याभावप्रतियोगितावच्छेदकं घटत्व
वह्नित्वं च प्रमेयमिति ज्ञानसत्त्वेऽपि व्याप्तिग्रहो न स्यात विषयतया तदभाववत्त्ववह्नित्वाभावात् । संयोगस्य महानस
यवह्निसंयोगत्वादिनैव विषयतया । अपि विशेषरूपेण प्रतियोगितावच्छेदकसंबंधत्वेन व्यतरस्यानुशयादाह । तद्वि
षयत्वाभाव इति । तादृशावच्छेदकत्वग्रहस्य तादृशावच्छेदकत्वप्रकारतानिरूपितविशेष्यत्वाभाव इत्यर्थः । न त्वप्रसि
षायत्वादिप्रवेशोऽनंतकार्यकारणभावप्रसंगाद्रूपमाणास्वरसाद्याहावच्छेदकत इति । यथायोगं इति । यत्रैक
विधं व्यभिचारज्ञानं तत्र तदभाव एव यत्र त्वनेकविधं व्यभिचारज्ञानं तत्र तावदभाव एव हेतुरित्यर्थः । पुरुषभि

तादृशावच्छेदकत्व प्रकारता [illegible] विना विशेष्यता [illegible]

[illegible]

ष्ट इति। सामानाधिकरण्यप्रत्यासत्त्याहेतुताग्रहइति भावः। अतएव नानाविधव्यभिचारग्रहाभावकूटस्य हेतुत्वादे
व। एवं च विशिष्यकार्यकारणभावस्यावश्यकत्वे च। इत्थं कल्पे अस्वरसमाह प्रसिद्धायाइत्यादिना। प्रसिद्धायाः।
ताद्दशानवच्छेदकत्वग्रहे जननीये प्रतियोगिज्ञानमुद्रायाऽवश्यंप्रसिद्धायाः। प्रतियोगितावच्छेदकत्वादीत्यादिना सा
ध्येसाधनवन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वबुद्धिसंग्रहः। ननु घटत्वादौ ताद्दशावच्छेदकत्वग्रहस्य प्रति
योगिग्रहत्वेनापेक्षितस्य वह्नित्वादौ तदभावग्रहे प्रतिबंधकत्वात्तद्विषयाभावस्यहेतुत्वे किंमानमत आह। स
मानेति। घटत्वादौ प्रतियोगितानवच्छेदकत्वग्रहे ताद्दशावच्छेदकत्वग्रहस्य समानविषयतया प्रतिबंधकत्वकल्प
नादिति भावः। तथा कल्पने साध्यतावच्छेदके तत्पुरस्काय ताद्दशावच्छेदकत्वग्रहविषयत्वाभावस्य हेतुत्वकल्पनं तत्
नेतत्प्रकारकादीति। तत्प्रकारोऽवच्छेदकत्वबुद्धिप्रकारः। आदिना धर्मितावच्छेदकपरिग्रहः। तथा कल्पने विशेषनप
र्यवस्येदित्यन्वयः। धूमजनकतावच्छेदकतेजोवह्निजातित्वादिना च वह्नित्वे ताद्दशावच्छेदकत्वग्रहे वह्नित्वत्वरूपे
णतदभावग्रहात्तवह्नित्वत्वेन यत्ताद्दशावच्छेदकत्वग्रहस्तद्विषयत्वाभावस्यहेतुतायां विशेषविश्रांतत्वेन न

तत्याग्रहस्य नं १८

भा सार्वत्रिकत्वमिति भावः॥ व्यापकत्वांशग्रहे व्यभिचारग्रहाभावस्य सामानाधिकरण्यांशे च विशेषणज्ञानमुद्रया
सहचारग्रहस्य हेतुत्वं दर्शयितुं व्याप्तिस्वरूपं दर्शयति। व्याप्तिश्चेति। केचिदित्यस्वरसबीजं तादृशव्याप्तिग्रहे व्यभिचारग्र
२.७ हस्य ग्राह्याभावानवगाहित्वेनाविरोधात् तदभावहेतुत्वोपदर्शनविरोध इति॥ किंचेति। न च विरुद्धादिसाधारणस्य
सहचारज्ञानादेरेकस्याभावाद् वह्निधूमयोः सहचारज्ञानस्य तद्व्यापकत्वग्रहहेतुत्वे युक्तिर्नेत्येवेति वाच्यं। वह्निविरुद्धे
वह्निसहचारभ्रमस्य वह्निव्याप्यत्वभ्रमं प्रति धूमविरुद्धे च धूमसहचारभ्रमस्य धूमव्यापकत्वभ्रमं प्रति च हेतुत्व
दर्शनात् वह्निधूमयोरपि व्याप्यव्यापकभावग्रहे तथा कल्पनमिति भावः। सामान्यत एवेति। भ्रमप्रमासाधारण
व्यापकत्वप्रकारकज्ञानत्वावच्छिन्नं प्रति तादृशसहचारज्ञानत्वेन हेतुत्वं यद्विशेषयोरिति न्यायादित्यर्थः। असिद्धत्वादि
ति। विरुद्धे सहचारभ्रमेण व्यापकत्वभ्रमस्यासिद्धत्वादित्यर्थः॥ असिद्धिं विवृणोति। विरुद्धे पीतत्वादिना ग्राहक
सामग्रीकल्पयोगपद्येति। ग्राहकसामग्रीकल्पनाधीनो ग्रहणस्य कल्पनं तद्योगपद्याधीनं च योगपद्यमित्यर्थः। न तु मि
य इति। अन्यथा केचिद्व्यापकत्वभ्रमोत्तरमपि सामानाधिकरण्यग्रहदर्शनात्सामानाधिकरण्यग्रहेऽपि व्यापक २.७

त्वग्रहे हेतुरिति किं न स्यादिति भावः। अप्रकृतांशे लौकिकप्रत्यक्षासंभवेप्युत्पादयत्यानुमानिकव्यभिचारधियो
विरोधित्वं व्यवस्थापयितुमिदं पुनरिति। अवहितेति। अवहितो विप्रकृष्टो वायोरास्माद्देशात्तन्निष्ठेत्यर्थः। व्यव
धानं मध्यवर्त्तिभित्त्यादिसंबंधः। विप्रकर्षो विदूरवर्त्तित्वं तत्र च प्रत्यासत्तिकर्षापेक्षत्वदोषाद्देवाग्रहादिति भावः। प्र
तियोगिसत्त्वविरोधित्वं प्रतियोगितत्वापादितप्रतियोगिकत्वं आदिनाप्रतियोगितद्व्याप्यतरस्सकलं तदुपलंभकसम
वधानरूपयोग्यतापरिग्रहः। कथं चिद्विरोधीति। धर्मवति धर्माभावस्येव धर्मत्वे धर्मवत्त्वाभावस्य प्रतियोगिता
वच्छेदकत्वेस्यापि विरोधित्वेन शंकानास्पदत्वदिति भावः। वस्तुगत्या विरोधस्फुरणस्य विशेषदर्शनतया व्यभि
चारशंकाप्रतिबंधकत्वे तत्राप्युपनयवशादेव तदभावो भाति तु महेति इति कथं चिदित्युक्तं। अत एव तादृशावच्छे
दकत्वाभावग्रहस्य तद्देशे लौकिकत्वादेवा निर्णयात्मनीति। निर्णयात्मनि दोषविशेषाजन्योपनीतभाने
संशयादिसाधारणस्य विपरीतज्ञानमात्रस्य संशयनिश्चयसाधारणेवा दोषविशेषजन्योपनीतभाने निश्च
यात्मनो विपरीतज्ञानमात्रस्य विरोधित्वादित्यर्थः। संशयानंतरमपि संशयोत्पादादाह। निर्णयात्मनीति।

भा.

२०८ स्यानुमानिकतदभावनिर्णयेपिदोषविशेषेणायित्वादिनालौकिकसन्निकर्षेणवानतज्ज्ञानदर्शनादाह। दोष
विशेषजन्यत्वेत्यादि। उपनीतभानशब्देनलौकिकसन्निकर्षाजन्यत्वंलब्धं। तथाचदोषविशेषजन्यलौकिकसन्निकर्षा
जन्यताहशज्ञानत्वंप्रतिबध्यतावच्छेदकं तेनसामान्यलक्षणादिजन्यज्ञानस्यापिसंग्रहः। तत्राद्येविशेषदर्शनमुत्ते
जकं तेनसंशयेसति विशेषदर्शनात्तादृशनिर्णयोनानुपपन्नः। नचैवं विशेषदर्शनेसति बाधनिश्चयेप्यनुमि
तिःस्यादिति वाच्यं। बाधनिश्चयेसंशयानुत्पादेनबाधनिश्चयत्वेनापिह्ययङ्प्रतिबंधकत्वात्। अतएवद्वि
तीयप्रतिबंधकतायाः अवश्यक्लृप्तत्वेप्रथमप्रतिबंधकतायांमानाभावइत्यनुशयात्साधारणेत्याद्युक्त
मधिकंचशब्दालोकसारमंजर्यांप्रकाशितमस्माभिः। मात्रपदंचस्पष्टत्वार्थकं। तेनानुमानिकादिविपरीतज्ञा
नस्यापिसंग्रहः। वस्तुभाववदितित्वरूपस्यातेलौकिकप्रत्यक्षंव्यवस्थापयति। तत्रइमादावितिपरमत्वा
ह वच्छिन्नेवस्तुभाववत्त्वंइत्वत्सत्वेपिनियमेनोधर्मांतरासन्निकर्षेनेवोपलंभापादनासंभवान्नचतदभावव २०८
मसंशयेनेतिभावः। यथाचकिंसमानाधिकरणतदासमेकालांतरदेशांतरवृत्तित्वसंभावनावशादभा

भा वोन्वयव्यतिरेकतेतयात्रूमेपीत्यत उक्तं देशांतरेत्यादि। वस्तुतस्तु तद्रूमस्य कदापि देशांतराद्वृत्तित्वायोग्यात्तु पल्ल
२०४ वितरप्रत्यक्षे हेत्वे तिभाव। लाघवादिति। प्रसिद्धमेव किंतु अन्वयगमाऽप्रभाववद्वृत्तिधर्मांतरकल्पने गौ
रवात्तत्समेव लाघवं। यद्धर्मितावच्छेदकविशिष्टप्रतियोगिसत्त्वेनोपालंभापादनं तद्धर्मितावच्छेदकावच्छे
देनैव तदभावोऽध्यक्षः। अन्यथा महतिवायौ रूपस्योपलंभापादने वायुत्वावच्छेदेन रूपाभावोऽध्यक्षः स्या
त्तथा चोक्तयुक्त्या धिधूमत्वावच्छेदेन तदभावस्य लौकिकप्रत्यक्षं न संभवतीत्यत आह सोऽवदंतीत्यनेनास्वरसं सूचितः। सहचारग्रंथः सम्या त्रिम गात
व्याप्तिग्राहकतर्कप्रस्तावे कार्यकारणभावग्राहकतर्कप्रदर्शनस्यार्थांतरत्वं परिहरन्नेव तत्र तर्कोपपादकं दर्श
यति। हुताशनेत्यादिना। रासभादीत्यादिना। आर्द्रेंधनादिपरिग्रहः। यद्यपि वह्नेः कारणतायां ग्रहे तद्द्वैव
द्र्ध्यान्वयव्यतिरेकग्रहस्यैव तंत्रत्वेन रासभघटितस्यान्वयव्यतिरेकानुविधानदर्शनमध्येन तस्याहेतुत्वनि
श्चयोपदर्शनं च प्रकृतानुपयोगि तथापि तत्र दिशा पंचकाचित्तरासभेपि कारणताग्रहः कुतो नस्या

९८

भा० तर्क

कोटेरुतत्प्रदर्शितस्य प्रकोतनवरुक्तं त्वमिति संप्रकारणत्वोमप्रदु । तस्य त्वद्धसकायारण त्यागे
नमात्र वा० २

दितिनिरस्तं तर्कावतारस्य कारणासंभवमाविष्कुर्वंस्तं चोन्नं। वस्तुतस्तत्कार्यं वह्नेरेव न भविष्यतीति शंकाव्युदा
सार्थं वह्निर्युक्तं कारणमस्तो मान्वयव्यतिरेकप्रदर्शनमहेतुक एवोत्पत्स्यत इति शंकानिराकरणयावश्यमे
२०९ तेषामन्यतमं कारणं धूमस्येत्यवधारणं दर्शितं तदनुपपादकतयैव व्यतिरेकोऽपि दर्शितः। अयं धूमा
२०१ ॰ तृणारणिमणिन्यायेन वह्निविह्नरेऽभविष्यति इत्थं चिद्वह्निं विनापि कारणान्तराद्रासभादेर्भविष्यतीत्याका रि
कायाम् क्वचिद्वह्निं विनापीति शंकानन्तनिराकरणाय रासभादेरहेतुत्वनिश्चयोपदर्शनं। यस्य व्यतिरेकेऽपिता
दृशापरसामग्र्यामन्वयेऽपि धूमानुत्पत्तिं पश्यतीत्यनेन च वकासमवहिताजन्यत्वस्य चक्रासमवधानकालीन
वह्नितत्समवधानेतरयावत्कारणवत्त्वस्य चक्रमेसत्त्वमादर्शितमिति सारं। तत्र च कारणत्वनिश्चयेवाऽप
कारणत्वसंदेह इति। धूमे वह्निजन्यत्वनिर्णयिसमानविभिवेध्यतत्यावत्कावधिधूमकारणत्वग्रहसंभव
नीत्याशयेनेदंस्वारसिकसंदेहस्य तर्ककारणीभूतव्याप्यवत्ताज्ञानेनैव निरासादाशयसंदेहं तस्यापि

२०९

५०

रोधित्वे तु इच्छायरितत्सामग्रीतया व्योध्यात् इत्युपयोगं दर्शयति। अनुसंधेयश्चेति। तर्कप्रयोतु रित्तिर
ऽ:प्रतिपाद्यस्य कार्यकारणभावग्रहफलं प्रतिसंधायैव तर्कप्रयोगादिति भावः। तदधीनत्वादिति। धूमो यदि
वह्निव्यभिचारी स्यात् तत्सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यो न स्यात्। एतादृशतर्कोत्थापकतयेति शेषः। उप
वश्याप्युपेयस्य सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावग्रहस्यैव व्याप्तिग्रहत्वं दर्शयति। सामानाधि
करण्येनेति। एतेन व्याप्तिग्रहकारणीभूतस्य सहचारज्ञानस्य व्यभिचारज्ञानाभावस्य च सत्त्वमाह। दर्शितेति तथैव
सामानाधिकरण्येनैव। गृहीतो विषयानुवर्तनात्। तस्यैव कार्यकारणभावग्रहस्यैव। व्याप्तिपरिच्छेदकत्वात्। का
प्तिविषयकत्वात्। ननु कार्यकारणभावग्रहस्य सामग्रीबलाद्व्याप्तिविषयकत्वेऽपि तस्य व्याप्तिग्रहानुपयोगि
तया तदुपपादकतर्कस्य च तदनुपयोगित्वमेव वाच्यं धूमत्वावच्छेदेन वह्निजन्यत्वे लाघवमित्याकारक
लाघवज्ञानस्य तदवच्छेदेन वह्निजन्यत्वग्राहकसामग्रीसहकृतस्यैव सामान्यव्यभिचारशंकायामुत्तेजकत
यातर्कानवतारे तादृशसामग्रीरहादुक्तलाघवज्ञानस्यानुत्तेजकत्वे सामान्यव्यभिचारशंकायामुत्तेजकतया

वि

तेधनापन

ग्राहकत्वे
वा

[illegible]

तर्कस्य [illegible]

वश्यंभावाद्व्याप्तिधीप्रतिबंधापत्त्यातादृशोन्नेजकसंपादकतत्त्वे~~साध्याभावव्यभिचारवंकालासुकेनै~~तस्य
यैवतर्कस्योपयोगसंभवात्। नच कारणताघटककालिकव्याप्तिज्ञानएवसामान्यव्यभिचारशंकायाःप्रतिबं
धकत्वेतादृशलाघवज्ञानस्योन्नेजकतयादैशिकव्याप्तौनतदुन्नेजकत्वमितिवाच्यं। सामानाधिकरण्येनतद्धर्म
त्वावच्छेदेनवह्निजन्यत्वग्रहस्यतादृशदैशिकव्याप्तिमविषयीकृत्यासंभवेनतद्ग्राहितस्योन्नेजकत्वक
ल्पनादिति। पक्षेवह्निसमवहितान्यजन्यत्वंविशेषणंदातुंप्रणालीमाह। विपर्ययेति। तत्कोटाविति। यत्सा
धीनायंतदेवतत्कोटिपदेनोक्तं। यत्तर्कस्यापादकव्यतिरेकव्याप्यज्ञानंपक्षेतत्कोटिविषयतांविना ऽनु
पपन्नंसएवतत्कौविपर्ययेतत्कोटिमात्रपर्यवसायात्तस्यैवतदभावकोटिकशंकाप्रतिबंधकत्वमि
त्यर्थः। जोऽप्यवधारणे। अन्यथापाक्षिकतत्कोटिविषयकत्वमात्रेणैवशंकानिवर्तकत्वेवह्नितद्
न्यजन्यान्यतरानस्यादितिपाठः। नचैवंतदसमवहितंनचनान्तरीयकवह्निर्वैव्यभिचारः। व[illegible]वस धमको
मवधानकालीनवह्नितत्समवधानेतरयावत्कारणवत्त्वरूपजन्यत्वाभावस्यैवापाद्यत्वात्। त

रूपं च तत्राप्रसिद्धत्वात् । वह्निपदस्य वह्निसमवहितपरत्वेन तन्न्यूनस्य वाच्यत्व इति तस्मान्नयीपरत्वे तु यथाश्रुतमे-
अभिधेयभिचा रसमुच्चार्पाः वसमंजसं तु व्यभिचाराभावेऽपि तर्कावतारसंभवात् । सूले वेति । तदसत्त्वा विपर्ययेतत्कोटिमात्रापर्यवसानेनैवाभा-
सत्वात् तत्त्वात् न व्यभिचारेणापीति । वह्नितत्त्वान्यान्यतरजन्यो न स्यादिति पाठस्तु वह्नित्वरूपेण तज्जन्यत्वको-
टिप्रसिद्धत्वाऽप्रसिद्धेरप्यभावाद्धेयः । तथात्वापत्तेः । वह्निजन्यत्वाभावशंकायां तु बंधकत्वापत्तेः । तथापर्यवसित-
रा तत्कोटिमात्रपर्यवसितता । विरोधतो व्याप्यस्य तत्कोटिमात्रवृत्तिधर्मावच्छिन्ननिरूपितव्याप्यस्य सामान्यतो व्या-
प्यस्य तत्कोटितदितरकोटिसाधारणधर्मावच्छिन्ननिरूपितव्याप्यस्य धर्मता बलाद् इतरकोटिबाधकबला-
त्संपन्नयोर्न तयोरुपस्थितिरिति । वह्निसमवहितजन्यत्वविशिष्टपक्षे नतीत्यर्थः । निस्पष्टं कल्प्यांतरं वह्निम-
त्र कल्प्योऽस्वरसं प्रकाशयति । वस्तुत इत्यादिना । वह्निजन्यमपीति । यद्यपि वह्निसमवहितजन्यत्वस्य वह्निज-
न्यत्वव्याप्यत्वेऽपि न वह्निजन्यत्वाभावप्रकारकशंकाप्रतिबंधकत्वं न वा वह्निजन्यत्वप्रकारकसिद्धौ तत्सह-
कारित्वं तद्रूपेण तदभावस्यानापादकत्वात् । तथापि वह्निसमवहितजन्यत्वस्य वह्निजन्यत्वरूपत्वेन निय-

ला॰ह॰श॰वे॰लं॰पत्रपे ४ पत्र ४

भा

२११ तत्वे वा तादृशव्याप्यवत्तेर्न धर्मदर्शनविधयापि प्रकृत न तर्कस्य वह्निजन्यत्वाभावशंकाप्रतिबंधकत्वं संभवति

॥ तिनत्वप्रतिबिंबमिति। ननु पक्षविशेषणीभूतवह्न्यसमवहिताजन्यत्वविशिष्टं वह्निसमवहितजन्यत्वं वह्निजन्य
त्वव्याप्यं स्यात् तत्तदपि जातिबाधितः। वह्न्यसमवहिताजन्यमिति पर्यवसितं तत्स्वरूपां वह्निसमवहितजन्यत्वं
वह्निसमवहितजन्यत्वपदार्थः तस्य वह्निसमवहितजन्यपदं वा वह्निजन्यं परं। ननु तर्कस्याहार्यशंकाप्रति
बंधकस्य एव फलं व्यभिचारसंशयशंकाप्रयोज्यत्वकारणीभूतव्याप्यवत्ताज्ञाने नैव निरासात् भवति हि अनिष्टोपदर्श
नेनेच्छाविच्छेदात् कारणाभावे नाहार्यशंकाया अनुत्पादात् तद्धर्मावच्छिन्नानिष्टोपदर्शने तद्धर्मावच्छि
न्नज्ञानेच्छाविरोधिनः रूपांतरेणापि नीलघटत्वावच्छिन्नेऽनिष्टोपदर्शनेपि घटत्वावच्छिन्नज्ञानेच्छाया
अनिवृत्तेः तदिह वह्न्यसमवहिताजन्यत्वविशिष्ट एव वह्निजन्यत्वाभावेऽनिष्टोपदर्शने तज्ज्ञानेच्छाविच्छि
त्तौ वह्निजन्यत्वाभावज्ञानेच्छानुकूलतर्करूपमभिप्रेत्य वह्निजन्यत्वाभावमेव केवलमापादकीकृत्याह। तथा
चेति। ननु योजि विशेषणत्वे व्यभिचारस्यैवासंभवादाह। प्रतियोगीति। तथा च वह्न्यसमवहिताजन्यत्ववि २११

१२

शिष्टंयत्तज्जन्यत्वंयत्तद्धर्मादोषसिद्धंतदभावः॥सर्वत्रास्तीतिनव्यभिचारइतिभावः॥यथाश्रुतस्यआवृत्तिंदर्शयति॥
ता =अजन्यइति॥विवक्षितस्यतात्पर्यंदर्शयतिजन्येषेति॥नांतरीयकेति॥धर्मजनकताघटकसंबंधेनस्वाधिकरणेस्वा ग
व्यवहितपूर्वक्षणावच्छेदेनउत्पत्तिमतः स्वजनकोवच्छिर्यत्रतस्मिन्धर्मरूपादावित्यर्थः॥एतेनविकिन्नस्यत्वाभा
वरूपापादकस्यव्यक्तसमवहितात्जन्यत्वस्यचापाद्यकोटिप्रवेशोपिविशेषणस्यसत्त्वमादर्शितं॥यथाश्रुतेज
न्यत्वेननांतरीयकवच्छिन्नेव्यभिचारस्यानारणादाह॥तदर्थस्त्विति॥वक्ष्मसमवधानेति वक्ष्मसमवधानका
लीनानिवक्षितत्समवधानेतराणेतराणियावंतिकारणानितज्जन्योनस्यादित्यर्थः॥ननुनांतरीयकवच्छि
स्यापिवक्ष्मसमवधानकालीनानियावंतिकारणानिस्वप्रागभावादीनितज्जन्यत्वसत्त्वाद्व्यभिचारइत्य
तआह॥तथाविधयावत्कारणकत्वमिति॥तथाचवक्ष्मसमवधानकालीनानिवक्षितत्समवधानेतरधर्मा
दिघटितानियावंतिकारणा~~कत्वमितितथाचवक्ष्मसमवधान~~नियमेविग्रहात्स्वीययावत्कारणेनाहस्वेति

भा
२१२
212

वह्निसमवधानकालीनत्वस्य विधेयत्वभानात् नांतरीयकत्वं किंतु यादृशयावत्कारणमध्यनिवि-
ष्टचरमकारणे वह्निसमवधानकालीनत्वस्याभावान्न व्यभिचारः। अत्र च वह्निसमवधानकाली-
नयावत्कारणकत्वं वह्निसमवहिताजन्यत्वविशिष्टमप्रसिद्धमतस्तद्वारणाय वह्नीतरेति कारणविशेषणं
वह्नीतरयावत्कारणमध्यनिविष्टस्य तत्समवधानस्य तत्समवधानेतरयावत्कारणमध्यनिविष्टस्य
चरके वह्निसमवधानकालीनत्वाभावादप्रसिद्धिरित्यूहमप्युपादाने धूमरूपादौ व्यभिचारवारणाय व-
ह्निसमवधानकालीनेति। नांतरीयकत्वं किंतु धूमरूपादेर्यादृशयावत्कारणमध्यनिविष्टस्य
धूमादेर्वह्निसमवधानकालीनत्वाभावादेव न व्यभिचारः। तादृशधूमरूपप्रागभावो देवह्निसमवधा-
नकालीनत्वात्तत्र व्यभिचार इत्यतो यावदिति। अत्र च तद्व्यक्तित्वं मज्जति कारणताघटकप्रत्यासत्ति-
तत र्वह्निसमवधानांतत्वावच्छिन्नप्रागभाववत्त्व वह्निसमवधानपदस्यार्थः। स च तद्धर्मावच्छिन्नयावत्प्रा- तेजामकार:
तद्व्यक्तित्वेन ... नेयम् गभावो वा तद्धर्मावच्छिन्नप्रतियोगिताकप्रागभावो वेत्यन्यदेतत्। तेन पक्षीकृतधूमस्य देशांतरीय २१२

५२

अत्यंताभावनिवेशे देशांतरेपर्वतादौ धूमारंभकसंयोगादिरूपस्य वह्निसमवधानस्य योऽत्यंताभावस्तत्कालीनत्वं धूमस्य कारणतासंबंधो व्यभिचारवारकादिति बोध्यं॥

क वह्निसमवधानकालीनयावत्कारणानयानाद्यसिद्धिः न वा तद्वह्निसमवधानध्वंसकालीनयावत्का
मक्क रणकेतद्भस्मादौ व्यभिचारः तद्वह्नितत्समवधानेतरधर्मस्वरूपकारणयावन्नव्यपत्तिनस्यतत्तद्भस्मादे
स्तादृशप्रागभावकालीनत्वाभावेन नोत्तरीयके व्यभिचाराभावात् ॥ अत एव वयवेंधने तद्वह्निसंयोगोत्प ध्वंसप्रा[illegible]भावसाधारण कालत्वेन[illegible] निवेशेत्र तांत्रिकमाह ॥
त्तिद्वितीयक्षणेनोत्तरीयको घटादिसंयोगस्तत्रतज्जनकक्रियापूर्वसंयोगनाशादेर्वह्निसमवधानप्रा
गभावध्वंससमानकालीनत्वेपि न व्यभिचारः तत्र पूर्वसंयोगनाशस्य तादृशप्रागभावसमानका
लीनत्वाभावात् तत्स्थापित तद्वह्निसंयोगानंतरोत्पद्यमानेतद्भस्मावयवसंयोगादिरूपवह्निसमवधान
प्रागभावसमानकालीनत्वात् वह्निसमवधानत्वावच्छिन्नप्रागभावपर्यंतानुधावनं ॥ न च तद्वह्नि
समवधानप्राक्कालीनव.तरसंयोगोत्पत्तिद्वितीयक्षणोत्पन्ने रंधनघटादिसंयोगेतद्वह्निसमवधान
त्वावच्छिन्नप्रागभावकालीनयावत्कारणके व्यभिचार इति वाच्यं तद्भस्मसमवहिताजन्यत्वस्यसत्वं

भा
२१२
213

तार्थकत्वात्। वह्न्यंतरसंयोगद्वितीयक्षणोत्पन्नयष्ट्यादिसंयोगादौ च तस्यासत्वात् तादृक्समवहिताज
न्यत्वं च तादृक्समवधानकालावच्छिन्नाजन्यत्वं। तेन यत्रेंधने तद्वह्निसंयोगोत्पत्तिकाले नांतरीयको य
ष्ट्यादिसंयोगस्तत्रापि न व्यभिचारः। तस्य तादृशासमवधानप्रागभावकालीनयावत्कारणवत्त्वेपि तादृक्स
मवधानकालावच्छिन्नेनैव जन्यत्वात्। कारणं चात्र फलोपधायकमेव धर्त्तव्यं तेन तद्व्यक्तिसमवधाना
नंतरोत्पन्नेंधनव्यक्तेस्तद्धूमं प्रति स्वरूपयोग्यतायाः तादृशासमवधानप्रागभावसमानकालीनत्वाभावेपि
न क्षतिः। न च तद्व्यक्तिसमवधानकालीनोत्पत्तिकेंधनव्यक्तेरपि तद्व्यक्तिजन्यधूमं प्रति फलोपधायकत्व
संभवात् तस्य च तादृशासमवधानप्रागभावकालीनत्वाभावात्तादृक्समवहिताजन्यत्वविशिष्टनि
रुक्तजन्यत्वस्याप्रसिद्धिरिति वाच्यं। तादृशेंधनजवह्नेरेव धूमं प्रति हेतुत्वेन स्वजन्यवह्निजन्यधूमं प्र
त्येव तत्र तादृशेंधनानां हेतुत्वेन तत्तद्व्यक्तिसमवधानकालोत्पन्नेंधनव्यक्तेस्तद्व्यक्तिजन्यधूमं प्रति अजन
कत्वात्। अन्वयश्च चरमोत्पन्नेंधनजवह्निना पूर्वोत्पन्नतादृशवह्निना च मिलित्वा एको धूमो जनितस्तत्र २१२

७४
१२२

तद्वितादवस्थामितिवाच्यं।यत्र एकेनैव वह्निना धूमो जनितस्तादृशस्थले एव उक्ततर्कावतारात्।तादृशव
ह्निद्वयजन्यधूमस्थले चरमोत्पन्नतादृशवह्निमेव तद्वह्नित्वेनोपादाय तादृशान्तर्कावतारस्य निष्प्रत्यूहत्वा
त्।न च तथापि वह्नितत्समवधानेतरयावत्कारणमध्यनिविष्टस्य धूमावयवतत्संयोगादेस्तद्व्यक्तिसमवधानका
लीनत्वाभावादसिद्धिरिति वाच्यं।दंडस्य घटजनकतावच्छेदकसंयोगक्रमिककपालिकाकपालद्वयसंयोगप
र्यंतानां व्यापारत्ववत् तद्वह्नेरपि तद्धूमजनकतावच्छेदकतद्धूमावयवतत्संयोगपर्यंतानां व्यापारतया तद्वह्निसम
वधानत्वेन वह्निसमवधानेतरेत्यनेनैव वारणात्।न चैवमपि तद्धूमावयवरूपादौ व्यभिचारः तद्धूमावयवस्य
तद्वह्निसमवधानत्वेन तदितरयावत्कारणानां वह्निसमवधानकालीनत्वादिति वाच्यं।तद्धूमावयवरूपा
दिजनकस्य तदवयवरूपस्य वह्निसमवधानकालीनत्वाभावात्।न चैवमपि तद्वह्निजन्यधूमद्व्यणुके
कत्वे व्यभिचारः॥ ध्वंसद्व्यणुकस्य स्थूलधूमजनने व्यापारत्वे तया तदितरयावत्कारणस्य प्रागभावपरमाण्वेक
त्वादेस्तद्व्यक्तिसमवधानकालीनत्वादिति वाच्यं।यत्र वह्न्यंतरजन्यधूमत्रसरेण्वादिसंयोगजननद्वारा

भा॰ तद्व्यक्तिनास्थूलधर्मवत्त्वादित्यादृशधर्मस्यैव पक्षत्वात्। तथा च तदवयवत्रसरेण्वावयवत्वानां तदवयवसम
२१४ मँहिताजन्यत्वाभावात्। तादृशस्थूलधर्मस्य चक्षुर्जनकतापर्याप्त्यधिकरणत्वेन तद्व्यक्तितादृशस्थूलधर्मज
२१४ नकसमवधाने तदवयावत्कारणमध्यनिविष्टस्य तादृशस्थूलधर्मस्य व्यक्तसमवधानकालीनत्वाभावे नर
न तादृशस्थूलधर्मैकत्वादौ व्यभिचाराप्रसंगात्। नहि तद्व्यक्तिघणुकादिमुत्पाद्यैव स्थूलधर्ममुत्पाद्यत
इति नियमेन मानमस्ति। नन्वयवत्रतादृशधर्मत्रसरेणुभिन्नद्व्यक्तिसमवधानं सर्वं च चक्षुःसंयुक्तैतादृशस्थ
त लधर्मतारंभकसंयोगजनितत्तत्द्वितीयक्षणोत्पन्नत्वत्यक्षे व्यभिचारः तत्र तादृशसंयोगस्य व्यक्तिसमवधा
नत्वेन तदितरयावत्कारणानां च पक्षस्याकुर्ध्यामवच्छेदकसंबंधितावच्छेदकप्रकारकज्ञानघटितानां व्यक्तसमवधा
नकालीनत्वादिति वाच्यं। तादृशत्रसरेणुक्रियया यदा धर्मारंभकसंयोगस्तदा चक्षुःसंयोगांतरस्योत्पत्तौ स
संभवेन यावन्मध्यनिविष्टस्य व्यक्तसमवधानकालीनत्वाभावादिति। व्यक्तत्वक्तत्वकत्वदिधने यः ज्ञायमि
कसंयोगस्तदसमवहितत्वानामप्यजन्यत्वस्य सत्त्वं तात्पर्यत्वात् न ज्ञानगुणेषु व्यभिचारः। तत्संयोगजनिते तदा २१४

ईंधनक्रियानाशेनत्संयोगस्य वह्निसमवधानं यावत्तदितरयावत्कारणानां तत्क्रियातदाश्रयेंधनादिव्यक्ती
नां निरूक्तत्वन्तत्समवधानकालीनत्वाद्व्यभिचारः परमवशिष्यते सोपि संयोगविरोधितस्यैव संयोगस्य हे
तुतायाः सांप्रदायिकत्वेन वह्निसंयोगस्य हेतुत्वेवह्नेरपि क्रियानाशेहेतुत्वात् वह्निजन्यत्वाभावस्यासत्त्वेनैव पारनस्पिर
निरसनीयः इति भावः॥ कारणं च कालोपाधिदिगुपाधिभिन्नं ग्राह्यं तेन वह्निसमवधानानंतरोत्पन्नघटादेर
पि कालोपाधिविधया पञ्चीकृतधूमकारणस्य वह्न्यसमवधानकालीनत्वाभावेपि सिद्धिः। न च वह्नेरपि वह्नि नाश
समवधानप्रागभावकालीनतया वह्नितत्समवधानेतरेत्यत्र वह्निपदं व्यर्थमिति वाच्यं। यत्र देशांतरादानीतव
ह्नितदा ईंधनसंयोगे सति तदा ईंधनजवह्न्युत्पत्तिः अनंतरं च धूमोत्पत्तिरिति क्रमः तत्र देशांतरादानी
तवह्निमादायैवान्वयव्यतिरेकग्रहात् तत्साधारण्यस्यैव तद्वह्नित्वस्यैतद्वह्न्यसमवधानकालीनेत्यत्र वह्न्यव्यत
याताद्दशधूमकारणीभूतवह्नेस्ताद्दशधूमप्रयोजकवह्न्यसमवधानकालीनत्वाभावेन अव्याप्तिवार
णार्थत्वात्। यदि च ताद्दशधूमकारणीभूतवह्निव्यक्तिरेव तद्वह्नित्वेनोपादीयते तदा वह्नितत्समवधाने

भर

भा. त्यत्र च क्लिप्तदंडो नोपादेयमिति नवीनानां पंथाः॥ यत्तु प्रतियोगितासंबंधेन यावत्तदुपलंभकत्वरूपयोग्यानुपलं
भौनुपलंभकतावच्छेदकयावत्त्वाविशेषणवदत्रापि कारणतावच्छेदकयावत्त्वं विशेषणं। तथा च वक्तृत्वतद्रूपसम
२९५ वधानत्वेतरचक्षुःसमवधानकालीनत्ववृत्तियावत्कारणतावच्छेदकाभावस्यादिति पर्यवसितोऽर्थः॥ दंडकावयवस्य
वद्धं जनयति नद्धसमवायित्वेन कारणत्वं धूमोत्पादत्ववद्धूमसमवायित्वविशिष्टस्याभावात् तानवकारणता
उपलंभेत्र वच्छेदकावलीढसत्त्वमेव कार्योत्पादप्रयोजकं। एवमपि छिद्रचिह्नं मध्ये विनेत्यत्र नियामकस्याभावात् किंतु स्प
र्शविशेषवत्पृथिवीत्वेन पृथिवीत्वेन वा स्पर्शविशेषादिस्तद्धर्मादौ स्पर्शविशेषादिवत्सहकारी एवं असम
वायिसंयोगस्यापि द्व्यारंभकतावच्छेदकजात्यैव हेतुत्वं न तु विशेषणरूपेणापि मानाभावात् तथा च पृथि
व्यारंभकं तस्य द्व्यारंभकतावच्छेदकजात्यवच्छिन्नसंयोगस्य चक्षुःसमवधानकालीनत्वाप्रसिद्धिः। कारण
तावच्छेदकं जातेर्व्यक्तिवृत्तिग्राह्यत्वेन न तत्संयोगस्य तदवयवस्य वा तद्व्यक्तित्वेन हेतुत्वेऽपि न प्रसक्तिः। तन्न सा
धीयः। पृथिवीत्वावच्छिन्नेतरमाण्वादौ तादृशजातत्वं नैव संयोगादौ सामान्यतो चक्षुःसमवधानका

घटादेः [illegible] समवायि
[illegible] लक्षितमप्रसिद्धमाणु

[illegible] भाव चक्षुःसंयोग [illegible]

[illegible] हितेन
[illegible] वेकेपि।

२९५

लीनत्वस्य निर्लयात् देशांतरीयवह्निसमवधानशंकायाः सर्वदेवसंभवात् । मतु तस्यैव दिशा सर्वत्र वह्निरदस्यत
द्वह्निपरत्वेनैव वह्नित्वतत्समवधानत्वेतरत्वस्य वैयर्थ्यात् । तावद्वह्नित्वादेरपि तद्व्यक्तिसमवधानकालीनवृत्ति
त्वात् । तद्वह्नित्वादेस्तत्स्थानेतरवृत्तित्वाभावादेव निरासात् । नांतरीयकवह्निके व्यभिचाराच्च ॥ तत्र हि पृथिवी
त्वेन तु धूमत्वेन वा तादृशधूमरूपविशेषं प्रति समवायिकारणता असमवायिकारणता तु अवयवरूपवृत्ति
नीलरूपत्वेन तादृशरूपत्वेन वा स्वसमवायिसमवेतत्वं तु प्रत्यासत्तिः । तथा च पृथिवीत्वधूमत्वतादृशरू
पविशेषत्वादीनां तद्व्यक्तिसमवधानकालीनवृत्तित्वेन व्यभिचारस्य वज्रलेपत्वात् तात्पर्यस्थानेतरवृत्ति ल
त्वाभावादेव निरासात् इत्यलमधिकेन । यत्तु नांतरीयकेति । वह्निजन्यत्वाभावे आपादके इति शेषः । आप
दककोटौ वेति । यथाश्रुतमूलानुरोधादिति शेषः । तेनापाद्यकोटिरिति यो विशेषणतया व्यभिचारस्यो
द्धारासंभवेऽपि न क्षतिः । यथाश्रुतेन व्यभिचारवारणादाह सत्त्वे इति । व्यवसायितानजन्यत्वं धूमेऽपि नास्तित्वाद
रोधनादिजन्यत्वादतः सामग्रीति । नांतरीयकवह्निकस्य सामग्रीव न वह्निघटितेति न तत्र व्यभिचार इति भा

तः तथा चापादकविशेषणत्वत्वेन प्रसक्ता नियये १

तथा चापादकविशेषणत्वत्वेन प्रसक्तानियये १

भा
२१६
216

वः। आकाशधर्मेव वह्निजन्यत्वनिश्चयात्त्वाकृत्तदसिद्धेः। वह्निघटितसामग्र्यजन्यत्वस्यानिश्चयेनोक्तरीत्याविशिष्ट
भावबुद्धे विशेष्याभाव मात्रावलंबित्वमितिभावः। त्वोक्तन्तर्कानुसारितयान्नलंभावः इष्टे। अत्र चेति। अत्र व
क्तत इत्यादिनाविवक्षिततर्के। इष्टापत्तीति। वन्हसमवहिताजन्यत्वस्योभयत्रैव कोटित्वात् वन्हसमवहि
ताजन्यत्वरूपविशेषणाभावादितिभावः। तृतीयापुनरिति। तथा चासत्तस्यात्तुपनीतहेतोरभावस्यैव
कार्यसामान्ये कार्याव्यवहितपूर्ववर्तित्वनियतत्वादरभावस्य वाशंकाः हेतुरूप एवेत्यनेन विवक्षितेत
र्थः। आपादकादीत्यादिना आपाद्यपरिग्रहः। वह्निभिन्नादेव उत्पन्नस्यापि नांतरीयकवह्निकस्यैव वह्निसम
वहितजन्यकैत्वाभावादवह्निपदस्य वह्निभिन्नपरत्वे विशेषणाभावेननेष्टापत्तिपर्यवसानं। अतएव आह व
ह्निमत्त्वादिति॥ भावव्युत्पत्त्यानुपादनपदार्थस्य हन्त्यादेः शंकाप्रतिबंधकत्वाभावादत आह करणेति। उ
पादीयतेऽनेनेति व्युत्पत्त्येत्यर्थः। नदीयेति तत्पदं वह्न्यादिपरं कार्यधर्मादितथा च वह्न्यादिविषयकं य द्वि ... २१६

मादिप्रयोजकताज्ञानं तत्परमित्यर्थः । यदि गृहीतान्वयव्यतिरेकं हेतुमिति मूलानुरोधेनाह तादृशेति । तादृशो
वह्न्यादौ तत्तद्धूमादेर्यो नियमस्तान्वयव्यतिरेकबोधस्तत्परमित्यर्थः । एतेन मपीत्यपिना व्याकृतनमपिल
क्षं । यथाश्रुते तु पएग्रिमाह । धूमत्वादेरिति । आदिनास्वक्रियापरिग्रहः । कारणताग्रहोत्तरमिति । कारणताग्रहो
त्तरं स्मृतिस्तया च शंकाप्रतिबंधे तत्र कारणताग्रहरूपत्वान्योन्याश्रयग्रस्तार्थः । वह्निसमवहितात् जन्यत्वस्य निरुक्तो
जन्यत्वस्य च धूमविशेष एव निर्णयाद्धूमत्वावच्छिन्ने तदनिर्णयेन तर्कप्रवृत्त्यसंभवात् कथं तदवच्छिन्ने
कारणताग्रह इत्याशंक्यते । यद्यपीत्यादिना । ननु विशेषे तादृशात्तर्कप्रवर्त्तकसामग्रीतः सामान्यतः कार
णताग्रहो भविष्यतीत्यत आह । तृणारणीति । तत्र च किं विशेषे । तृणजन्यत्वग्रहकृततर्कप्रवर्त्तकाव
पि वह्नित्वावच्छिन्ने तादृशजन्यत्वस्य ग्रहासंभवादिति भावः । तथा च विशेषाणां तादृशान्वयव्यतिरेका
नुविधायित्वं न तद्विरोधिशंकायां कार्यत्वकारणत्वाभावशंकायां तर्केणापंन्नातायां जायमाने विशेषाणां
कार्यकारणग्रहस्सामान्यत एव तंपरिच्छिन्नत्तीत्यन्वयः । तत्र सहकारिणं दर्शयति । सामान्यव्यभिचार

निर्णयेति। अनेन द्रव्यत्वादिनिरासः। अनुगत इति। यावद्व्यक्तीनामन्वयव्यतिरेकाद्यनुविधानं निश्चितं तत्
भा व्यक्तिसमूहगतेत्यर्थः। तेन तत्तद्व्यक्तित्वादीनां निरासः। अनुवृत्तिरिति। सामान्यधर्मापेक्षया अनुवृत्तिरित्यर्थः। ते न ताव
द्व्यक्तिसमूहगतमत्वनिरासः। विशेषेणेति। अगृहीतान्वयव्यतिरेकव्यक्तिव्यावृत्तेत्यर्थः। तेन गृहीतान्वयव्यतिरेकमात्रवृ यश
२१७ त्तित्वेन द्रव्यत्वादिकमनुपस्थितं तदानवच्छेदेनैव हेतुताग्रहे धूमत्वाद्यवच्छेदेनेति सम्बन्धितं। रूपान्तरेत्यत्रो
217 त्तरपदं स्वरूपार्थं। लाघवप्रतिसन्धानादीति। धूमत्ववह्नित्वयोर्जन्यत्वजनकत्वावच्छेदकत्वे लाघवे मिथ्याकार
कलाघवज्ञानेत्यर्थः। तेन यदि तादृशलाघवज्ञानवतापि तदा तत्तद्व्यक्तित्वावच्छेदेनैव हेतुताग्रह इति सम्बन्धितं। उपा
दिता। असाधारणकारणताग्राहकान्तरपरिग्रहः। सामान्यतः वह्निधूमत्वाद्यवच्छेदेन। तत्कार्यकारणभावं
परिच्छिनत्ति विषयीकरोति। अन्वयव्यतिरेकाविति विशेषणमित्यनुषज्यते। तथैव तत्सहकारिवशात्स
मान्यतः कारणताग्राहकत्वेनैव जातमाणिक्येऽप्रमाणसिद्धेऽपि न तु वह्निं विनापि धूमोऽभविष्यतीति व्यभिचार
संदेहदशायां कार्यधूमत्वावच्छेदेन वह्निजन्यत्वग्रहः इत्यत आह। फलबलेनेति। लाघवज्ञानादीत्या
दिना तर्कघटितायाः तादृशकार्यकारणभावग्राहकसामग्र्याः परिग्रहः। एवं च तर्कघटितताद्दृशसामग्र्या वि २१७

शिष्टलाघवज्ञानाभावविशिष्टं व्यभिचारज्ञानं तादृशव्याप्तिज्ञाने प्रतिबंधकं। अत एव पक्षतर्कौ वा तादृ
शकारणताग्राहकसामग्र्या वा नाकलितदोषलाघवज्ञाने विशेषसामान्यव्यभिचारशंकातस्तादृशव्याप्तिधीप्रति
षेधः। अत एव नतर्कस्य वैफल्यं तादृशे तेजकत्वसंपादनतया व्याप्तिग्राहकत्वादिति भावः। व्यभिचारनिर्णी
येतु त्तलाघवाद्यनुसंधाने व्याप्तेरग्रहादाहाशंकायामिति। न्त्ये वै व्यभिचारज्ञानत्वेन कथमेकाविरोधि
त्वेतिचेत् तत्सामान्यव्यभिचारानिर्णयघटिततादृशसामग्रीविशिष्टलाघवज्ञानाभावविशिष्टव्यभिचारज्ञान
त्वेनैव संशयनिश्चयसाधारणेन विरोधित्वात् व्यभिचारनिर्णयकाले च व्यभिचारानिर्णयरूपविशेषणा
भावेन तादृशविशिष्टलाघवज्ञानाभावेन प्रतिबंधकतावच्छेदकरूपसंभवादिति। ये तु धर्मत्वावच्छिन्नमेव
पक्षीकृत्य उक्तं तत्कारितारं विनिर्णयं तितन्मतमाह। परत्वेति। वस्तुजन्यत्वेनापादकेनाप्रयोजकत्वे तत्रतत्यदे
नधर्मत्वावच्छेदेन वस्तुसमवहितजन्यत्वस्य परामर्शार्थं तदेव विशेषव्याकृत्य निर्दिशति जन्यत्वविशिष्टस्ये
ति। यथाश्रुते त्वनेन केषांचिद्वक्तितस्य वक्ष्यघटितसामग्र्यजन्यत्वरूपस्य निरासः। तत्र धर्मत्वावच्छिन्नेवस

समवहितोजन्यत्वं च मननसैव सुग्रह मित्याग्रिमेणान्वयः। उक्तन्यायेन ज्ञानाशाननाश भावादिपदार्थसार्थस्येतर
क्तन्यायेन। संबंधांतरेण वह्नियुक्तकारणकलापघयोजनत्वग्रहे प्रवृत्तिकेन चित्संबंधेन वह्निव्यतिरेके जनत्व
शंकासंभवतीत्यत आह तादृशावह्नियुक्तेति। तेन संबंधेन वह्नियुक्तेनैत्यर्थः। तद्व्यतिरेकेति। वह्निव्यतिरेकेत्यर्थः
एतावता च वह्निरेव भविष्यतीति शंकाऽपहेतुक एव वोत्पत्स्यत इति शंका च निरस्तेना। ननु वह्निं किं विना विभ
विष्यतीति शंका च दुर्धाभरति वह्नेरन्यथा तिद्धसन्निधिकत्व शंकया विकल्पेन जननकत्वशंकयाऽपचारात आद्यां
निरस्यति। वह्नि विरहेपात्यादिना। निरतिशयस्यात एकार्यंतस्य त्न्यस्य। तादृशासमवहस्या। ऽपार्द्रेंधनादिसमवहस्य
तथाविधात्वह्निस्पन्दनादृशासमवहिता। तं देहस्य च योगादित्यन्वयः। द्वितीयां निरस्यति। तादृशास्यैवेत्यादिना। ता
दृशास्यैवाऽप्यार्द्रेंधनादिसमवहस्यैव। तथाविधजननकत्वसंभावनायाः धूम जननकत्वसंभावनायाः। अपनेयादित्य
ग्रिमेणान्वयः। कारणांतरव्यतिरेके। धूमानुत्पत्तिमत्यपि वह्निसत्त्वे व्यभिचारात्। तद्वह्निविरहस्य तत्प्रयोजकत्वं न
घटतइत्यत आह। तथाविधसमवहसत्त्व इति। प्रयोजकांतरकल्पनेकारणांतरव्यतिरेकेण। २१८

वस्त्रसमवहिते ॥ वस्त्रत्वपमान्द्रे धनकं देशस्य सत्ता ॥२

तद्विवव्लक्ष्मयं वस्त्रे पादानं नियमत इति पक्षकर्ता ॥१

कस्य नागोरवादिति भावः। तदुपादानपदेन वस्त्रसमवहिताजन्यत्वनिर्णयं प्रतिपादयितुं प्रथमतः वस्त्रा को चौर्थिपिच्छेदः॥१

वस्त्रे भावष्टे। वस्त्रसमवहितस्य त्वं प्रति। यथाश्रुते तु वस्त्रे नियमतो पादाने न वह्निभिन्नानुपादानं लभ्यते तद्व

न विवक्षितार्थप्रतिपादकं बाधितं चेति भावः। नियमव्यवच्छेद्यस्य नियमाधीनव्यवच्छेदबोधविषयस्य नि

यमलभ्यस्येति यावत्। यथाश्रुते वस्त्रसमवहितोपादानस्यैव नियमव्यवच्छेद्यत्वादसंगतेः। नियमतनुपा वस्त्रसमवहितमनुपादानः पर्यवसायने नेत्र

दानं रूपं कुर्यादिति रूपमित्यनेन व्यवच्छेद्यस्य नियमलभ्यस्येत्यर्थः इति तु कश्चित्। तदजन्यत्वज्ञाने। व

सेव स्त्रसमवहिताजन्यत्वनिश्चये। ननु तदुपादानं शंकाप्रतिबंधकमित्यत्र उपादानपदार्थस्य शंकाप्रतिबंध

कत्वं लभ्यते न तु नियमपदार्थस्य तथा च तत्र कस्य संबंधस्योपदर्शनमप्रकृतमत आह परंपरयेति। वस्त्रस निमकता

मवहिताजन्यत्वनिर्णयाधीनतद्ग्रहः तथा च किंजन्यत्वग्रहे समतिवह्निसमवहितोपादानमिति परंपरयेत्यर्थः।

तत्र। तदजन्यत्वनिर्णये विशेषदर्शनतया वस्त्रसमवहिताजन्यत्वस्य व्याप्यादिदर्शनतया। शंकाप्रतिबंध

कं वस्त्रसमवहितजन्यत्वशंकाप्रतिबंधकं। तदेवं अन्वयव्यतिरेकानुविधायित्वमेवान्यथा च द्रमोयदिव

क्रिजन्यो न स्यात् वह्न्यन्वयव्यतिरेकानुविधायी न स्यादिति तर्कशरीरमेवेति भावः। अन्वयव्यतिरेकानुविधायि
भा० २१९ त्वस्य तानस्य शंकाप्रतिबंधकत्वे मूलस्वरसमाहृत तदिदमुक्तमिति। यज्जातीयेष्वं चिदन्वयव्यतिरेकानुविधानं
तद्रूपवह्निन्नेतज्जन्यत्वमिति व्याप्तिः। यदवच्छेदेन यदन्वयाद्यनुविधानं तदवच्छिन्ने तज्जन्यत्वमिति व्याप्तिस्त
र्कमूलं तथा च धूमत्वं यदि वह्निजन्यतावच्छेदकं न स्यात् वह्न्यन्वयव्यतिरेकानुविधायि रत्रि वह्न्यन्वयव्यति
२१८ वर्य रेकानुविधायितावच्छेदकं वा न स्यात् इत्यर्थः। समानेष घमे दोषमाहाय्यादह्लिकत्वेनितज्जातीयपदस्य किंचिद्य(
क्तिनिष्ठस्येत्यर्थः। व्यभिचारित्वात्। दृष्टिचैत्वाक्रांतयत्किंचिद्व्यक्त्यावन्वयाद्यनुविधायित्वस्य सत्त्वेऽपि
दृष्टिवत्वादेस्तज्जन्यतावच्छेदकत्वाभावेन व्यभिचारात् द्वितीये न्वयांशस्य वैयर्थ्यात्। नियतव्यतिरेक
मात्रोपादाने न च वह्न्यसमवहितानजन्यत्व एव पर्यवसानात्तमदुक्तरूपस्याभेद इत्याह। नियतस्येति। तस्येति।
तद्भिन्नत्वमिति चिंतामणिं तु वह्न्यसमवहितानजन्यत्वस्य धूमत्वावच्छेदेन निर्णये धूमो यदि वह्निव्यभिचा
री स्यात् वह्न्यसमवहितासमवहितानजन्यत्वे सति जन्यो न स्यादिति तर्केणैव व्यभिचारशंकानिराकरणोक्ता २१८

र्थकारणाभावग्राहकतर्कस्यैवावैयर्थ्यात्। किंच जन्यत्वस्य पक्षे तदर्थं नांतरीयकवह्निके व्यभिचारः। वस्तुतस्तम
वधानकालीनेत्यादिविकल्पितार्थे च वह्निपदस्य तत्तद्वह्निपरतया तद्घटितस्य धूमत्वावच्छिन्ने निर्णयाज्ञोक्तत
र्कावतार इति। व्याप्तिग्रहायेति। धूमो यदि वह्निव्यभिचारी स्यात् वह्निसामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यो न स्या
दिति व्याप्तिग्राहकतर्कावतारायेत्यर्थः। व्यधिकरणस्य जन्यत्वपर्यवसायिनो याशंका सामानाधिकरण्यप्रत्या
सत्त्या वह्निजन्यत्वाभावशंका तन्निरासार्थमित्यर्थः। यथाश्रुतमूलमनुरुध्याह एवकारसत्त्वं तन्निक्षिप्याह
तथावयदीति। अत्रापि निष्कर्षे व्यापाद्यकोटिवतियोगिविशेषणमेव सत्त्वं तं बोध्यं स्वव्यधिकरणवह्नि
जन्यवह्निरूपदौ व्यभिचारवारणाय सत्त्वं तं। धूमत्वावच्छिन्नसामानाधिकरण्येति निरुक्तप्रत्यासत्त्या स्वावयवजन्यत्वा
त्तत्र वह्निपदं। घटादौ व्यभिचारवारणाय प्रत्यापाद्यकोटौ वह्नीति। तर्कमूलभूतव्याप्तावश्यं जनकत्वं निरस्यति। अ
प्रत्यासत्त्यस्येति। पक्षे सत्त्वं तस्य प्रमितावेव तदुक्तन्यायेन विशेष्याभावसिद्धिरिति तत्साधयति। तादृशजन्यत्वे
सत्ता। ति। प्रत्यासत्त्येतरेति। संयुक्तसंयोगादिप्रत्यावह्निसत्त्वे वा तत्पर्थः। तद्धूमे तादृशाजन्यत्वग्रहस्य प्रत्यक्षतः संभवे पि

धर्मत्वावच्छेदेन तदसंभवात् तदवच्छेदेन तन्निर्णयार्थमिदं तत्त्वं इति ध्येयं। धर्मानुत्पादादिनेत्यादिना लाघवादि
परिग्रहः। इदमेव चेतितं वेगो भंग्या स्वल्पशब्देन। धर्मानुत्पत्तिं प्रति वह्निसंबंधाभावस्येत्यादिवक्ष्यमाणग्रंथपर्या
भा. लोचनेन कार्यकारणभावग्रहोत्तरं तर्कप्रवर्त्तकमयत्राप्तितुल्यत्वादिति भावः। परिष्कुर्वन्नीति। तत्र वह्निजन्यत्वा
देः प्रवेशे गौरवात्। तत्र तु तदभावप्रवेशेन लाघवमिति भावः। तत्रापि तद्रूमेव स्वसमानाधिकरणदेशानुत्पत्तिका
२२० त्वग्रहस्य प्रत्यक्षतः संभवेपि धर्मत्वावच्छेदेन तदसंभवात्। तदर्थमाह। नोद्देशादेशानुत्पत्तिकत्वे प्रतिवह्निसं श्री
बंधाभावस्येति। वह्नेः कारणत्वग्रहोत्तरं तत्संबंधाभावस्यैव तत्प्रयोजकत्वं कल्प्यत इत्यर्थः। तादृशसंबंधाभा
वस्यैव। समानाधिकरणघटकसंयोगात्मकतत्संबंधाभावस्यैव। तथात्वे प्रयोजकत्वं। तद्विंप्रतिनिश्चिं
ताबीजं तु धर्मत्वावच्छेदेन प्रथमतः एव तथाग्रहे धर्मोपदि वह्निव्यभिचारः स्यात्। समानाधिकरणातिरिक्त
प्रत्यासत्त्या वह्निजन्यत्वे सति वह्निजन्यो न स्यात् तदवच्छिन्नाधिकरणदेशानुत्पत्तिकत्वे सति जन्यो न स्यादिति तर्केण समानाधिकरणप्रत्या सत्त्यात्मक
व्याप्तिग्रहसंभवात् समानाधिकरणप्रत्यासत्त्या वह्निजन्यत्वग्रहस्य वह्न्यधिकरणदेशोत्पत्तिकत्वग्रहस्य च २२०
तत्संबंधाभावप्रयुक्तावश्यं धर्मानुत्पत्तिनिर्णयात् तत्संबंधांतरस्यानुपस्थितत्वा[redacted]त्कोरवाच्च। संयोगात्मकेपु

नैव्यर्थ्यांश्च यमेऽधर्मविशेषस्य सत्त्वे सामान्यव्यभिचारानिर्णयादिरूपसहकारिलाघवप्रतिसंधानादिवशान्न धूम
त्वावच्छेदेन ताहशजन्यत्वग्रहे स्वप्याश्रुतमेवास्तु किं सामानाधिकरण्यप्रत्यासत्तिसंनिवेशेन तत्सामान्यव्यभिचा
रशंकायां तत्कथं तज्जन्यकोटिप्रवेशेनैवोपयोगितायाः स्वयमप्यवश्याश्रयणीयत्वादिति।। एवं चार्वाकं तर्कोत
रोत्पादनद्वारा तन्नैतन्न विधयापि व्यभिचारशंकानिरासहेतुत्वेनानर्थक्ये वह्निजन्यत्वग्राहकतर्केति मूले तिलातर्कस्य मू
ले व्याप्तिः आदिना दृष्टापत्तिशंकापरिग्रहः। तं परं व्याघातोपदर्शनमेवाह। मैवमिति। तत्र ग्रंथस्वरसं दर्शयति
यदाहेत्यादिना जाड्यमिति। उपादानपदस्य याश्रुतार्थकत्वकरणे वचनभंगः। नन्वेवमपीति बंधकस्यैव
स्याऽयथाश्रुतार्थबाधात् शंकाप्रतिबंधकशंकाविरहे लिंगस्य घीवान्याःत याचसेवा तं गतिरिति वाच्यं। शंका
यां तन्निवृत्तेपादानं नियतोपादानेन शंकेति मूले स्वं प्रतिबंधकत्वविवेरोनैतस्य याश्रुतार्थत्यागस्य चोक्तत्वा
दिति। तत्पदस्य सहचारज्ञानपरामर्शकत्वे शाब्दादिव्याप्तिज्ञानेपि पदार्थोपस्थित्यादिविधया सहचारज्ञानस्य हेतु
त्वात्तदभावेपीति। मूलासंगति तदर्थमाह। व्यभिचारादर्शनेति। व्यभिचारदर्शनपदस्य निश्चयमात्रपरत्वे

प्रतर्काः शंका प्रतिबंधक
ता भावात्

तद्येवासंगतिरिं। तोव्यभिचारज्ञानसामान्येति। व्यभिचारज्ञानसामान्याभावस्य शाब्दादावहेतुत्वं दर्शयति।
योग्यतादीति। आदिनासाध्यपरिग्रहः शब्दादिनेत्यादिना ऽनुमानपरिग्रहः। नपुंसकनिर्देशार्थं स्वरूपमि
ति। तर्कस्य व्यभिचारेण हेतुत्वमित्यस्वरसं सूचयति। केचित्त्विति। वस्तुतो वस्तुतो ज्ञानात तर्काभासादिति। धर्मो
२२१ पदिवद्विव्यभिचारास्यात् इत्यं न स्यादित्याकारादित्यर्थः। व्यभिचार इति। सत्तर्कस्य प्रमायां व्यतिरेकव्यभि
चारोपसत्तर्कस्य प्रमेयत्वव्यभिचार इत्यर्थः। तस्य विशेषदर्शनस्य बोध्यं पुरुषत्वादि। तथा च पुरुषत्ववि
शेषदर्शनस्यासत्यत्वं पुरुषत्ववद्विशेष्यकत्वं ऽसत्यत्वं च पुरुषत्वाभाववद्विशेष्यकत्वं तेन दंडादौ करादिभ्रमा
त्मकस्य पुरुषत्वविशेषदर्शनस्य पुरुषत्ववद्विशेष्यकस्य सत्यत्वं यथा तथा व्याप्तिमद्विशेष्यकत्वं तर्कस्य सत्यत्वं
तच्छून्यविशेष्यकत्वं चासत्यत्वमित्युक्तं तर्काभासोपि सत्तर्क एवेति भावः। अत्र सत्तर्कादित्यादिग्रंथे चासत्यत्वा
दीत्यादिना ऽसत्यत्वपरिग्रहः। बोध्यादीत्यादिना बोध्याभावपरिग्रहः। यत्र कुत्रचिद्दोषसत्वेपि तच्छून्ये प्रमानुदयादाह।
धर्मिण इति। फलीभूतज्ञानविशेष्यस्येत्यर्थः। एवं मतेपि तथा च वह्नेर्व्याप्तिप्रमाप्रमालघटकविशेष्यतासंबंधेन तत् २२१

त्र व्याप्तिः व्याप्तिमदित्युपसन्निरूढो वेत्येवं सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वं ग्राह्यमिति भावः। बोध्यस्य व्याप्ता सामानाधिकरण्यरूपापाः।
देरनातत्वादिदर्शायां नत्वमायां तस्य हेतुत्वासंभवात् आह। बोध्यादिमद्धर्मीति। लाघवात्। व्याप्तिमद्विशेष्यक
तर्कत्वापेक्षया व्याप्यादेर्लघुत्वात् संयोगाद्यन्यतमत्वरूपसन्निकर्षत्वस्य तर्कत्वापेक्षया न लाघवमत आ
हा न तर्कस्येति। व्यभिचारेति। यत्र व्याघातादिनाप्यतः सिद्धो वा शंकाविरहस्तत्रेत्यर्थः। विपरीतज्ञानेति। न मन्वयव्यो वि
परीतज्ञानत्वेनानुगमः। तन्निवर्त्तकत्वेन। विपरीतज्ञाननिवर्त्तकत्वेन। तत्र विपरीतज्ञाननिवर्त्तकत्वं वा। व्यभिचा
रज्ञानोत्तरव्याप्तिप्रत्यक्षे व्यभिचारज्ञाननिवर्त्तकत्वेन। व्याप्यदर्शनस्य हेतुत्वं न संभवतीति व्यभिचारशंकानिव
र्त्तकत्वेन तर्कस्यापीति। तेन रूपेण तर्कस्यापि हेतुत्वमित्यर्थः। आपाततइति। विपरीतज्ञानाव्यवहितोत्तरत्वस्यान
प्तिविश्रांतत्वेन तादृशप्रत्यक्षनिर्णयत्वस्यार्थसमाजग्रस्ततया कार्यतानवच्छेदकत्वादिति। तथा। तादृशहे
तुत्वं। अन्यत्र विपरीतज्ञानानुत्तरप्रत्यक्षे तत्र विपरीतज्ञानोत्तरप्रत्यक्षे। तस्यापि विपरीतज्ञाननिवर्त्तकस्यापि
विशेषतः विपरीतज्ञानोत्तरप्रमात्मकप्रत्यक्षं प्रतिविपरीतज्ञाननिवर्त्तकत्वादिना। न तु सन्निकर्षत्वं तावद

२२२ न्यतमत्वरूपं गौरवात् दुर्ज्ञेयत्वाच्च ज्ञानजनकतावच्छेदकं तथा चानयैव संशयामाप्रयोजकं किं मत आह। उक्तेति।
भा विशेष्यसंबंधेति। तद्वद्विशेष्यतासंबंधेन यत्र पुरुषत्वप्रमा तत्र स्वविषयीभूतपुरुषत्वाश्रयत्वसंबंधेन
पुरुषत्वज्ञानं यत्र भ्रमत्वघटकविशेष्यतासंबंधेन पुरुषभेदस्तत्र स्वविषयीभूतपुरुषत्वाभावाश्रयत्वसंबं
२२२ धेन पुरुषत्वज्ञानमित्येवंरूपव्याप्त्या तादृशविशेषणज्ञानस्य प्रमाभ्रमहेतुत्वं ग्राह्यं। तेन यथाश्रुते पुरुषसी
बद्धपुरुषत्वज्ञानस्य पुरुषभिन्नावबद्धपुरुषत्वज्ञानस्य च कारणत्वपर्यवसानेऽव्यावर्त्तकत्वादिदोषप्रसंगो
न प्रसज्यते। स्वमते भ्रमत्वप्रमात्वयोः पर्यवसानसंपन्नतया कार्यतानवच्छेदकत्वादुक्तं नीति। वस्तुगत्याऽनादिसि
द्धकार्यकारणभावस्य शंकापनायकत्वे तत्र प्रमाणप्रश्नाऽसंगतेरत आह यदपीति। दंत इत्यादिना दुष्टत्वाप्रयोज
कत्वं शंकाप्रतिबंधे प्रयोजकत्वं। स्वार्थस्य फलेनानुयोगस्यासंभवात् तत्र प्रमाणानुयोग इति ग्रंथस्य रसादाह। परा इ
ति। तथा च तत्र शंकाप्रतिबंधाय प्रअनादिसिद्धकार्यकारणग्रहमूलकत्वेन तर्कोपन्यासे तत्रानादिसिद्धत्वे प्र
माणानुयोगो युज्यत एवेति भावः। परमते ऽनुपपत्तेरर्थापत्तित्वात् तु भयमतसाधारणमर्थमाह व्याप्तिग्र २२२

साधीनेति। व्याप्तिग्रहस्यापेक्षणीयतायामेवानवस्थेति भावः। ननु व्यभिचारशंकानिरासस्यावश्यमपेक्षणीयत्वे
तेनैवान्यथासिद्धोऽपि सबाधकतर्कः कथं कारणमित्यत आह। द्वारेणचेति। पक्षे साध्यनिश्चये सिषाधयिषाविधी
नायत्रानुमितिस्तत्र पक्षेतरत्वस्य साध्याव्यापकत्वग्रहात् सोपाधित्वं संभवतीत्यत आह। अनिश्चितेति। संभवित्वा
त्साध्यव्यापकत्वग्रहस्यासंभवित्वात्तदैव स्यादिति। अनिश्चितार्थनिर्णयोऽनुमानफलं पक्षे साध्यनिश्चये च तद
भावादित्यर्थः। एवं च मूलेऽनुमानपदं सफलानुमानपरमिति। उपाधित्वेनेत्यस्य। यदि साध्यव्यापकत्वे सति सा
धनाव्यापकत्वेनेत्यर्थः क्रियते तदा किं लिंत्यादिना तेनैव हेतूपकस्योक्तत्वाद् असंगतिरत आह। स्वव्यभिचारेणेति।
मान व्यभिचारोन्नायकत्वेन व्यभिचारानुमित्युपधायकत्वेन। एवं चानुमात्रोच्छेदे व्यभिचारानुमितेरप्युच्छेदात्। व्य
भिचारानुमित्युपधायकव्यभिचारप्रतियोगिकत्वरूपेणोपाधित्वेन तस्य दोषत्वं नावश्यमह इति मूलार्थः। मू
ले च साध्यव्यावर्त्तकतयेत्यस्य साध्यवत्ताज्ञानप्रतिबंधकतयेत्यर्थः। विरुध्यादिति प्रतिकूलतर्कविधायेति शे
षः। प्रागुक्तासिद्धात्वमते एतदनुमानासंभवादाह। परमतेनेदमिति। इदं च प्रयोजकमनुमानं स्वमतेपि श्लिष्टा

धकानुमान एवाप्रयोजकत्वमिति दर्शयति॥ शब्दवृत्तित्वविशेषणगर्भ इति। नत्र॥ स्वप्रयोज्य कर्म अनुमाने प्रतियो
गिसमानाधिकरणत्वविशेषणविरहेणैव पाठः॥ तत्रापि॥ अनुमितिहेतुज्ञानविषयेऽन्योन्याभावघटितव्याप्ताव
पि घटितनात्यंताभावघटितव्याप्तिसमुच्चयः॥ तत्प्रतियोगिसामानाधिकरण्यं एवं प्रतियोगिसामानाधिकरण्यस्य
गा. अनुमितिहेतुज्ञानविषयतानैयत्यं प्रतियोगिसामानाधिकरण्यादीति पाठः॥ आदिना तदभावपरिग्रहः॥ प्रतियो
२२२ गिसामानाधिकरण्यादीति पाठः॥ न च तत्रादिना साध्यतावच्छेदकसंबंधावच्छिन्नत्वसमुच्चयः॥ समवायावच्छि
न्नवन्त्वाद्यभावमादाय असंभव तथा तद्विशेषणस्यावश्यकत्वादिति। वाच्यं॥ धूमवति महानसादौ वर्त्तमानस्य सम
वायादिनावह्निमतो भेदस्य प्रतियोगितावच्छेदकत्वात् गुणादौ रव्याप्यत्वात् प्रतियोगितावच्छेदकत्वे साध्यतावच्छे
दकसंबंधावच्छिन्नत्वविशेषणस्यावश्यकत्वात्। तु पाध्याय मतं निरस्यति॥ नचेति। तत्तु रूपवीयस्य प्रतियोगिसामा
नाधिकरण्य ग्रहस्य विशेष्यतया भावावच्छिन्नायां वं तन्तोदृशा॥ अभावात् तत्प्रतियोगितानवच्छेदकत्वग्रहस्तत्तु
रूपवीयानुमितौ हेतुरित्यर्थः॥ तादृशाभावः॥ हेतुसमानाधिकरणाभावः॥ तदसंभवादिति। नीलघटवत्त्वेन ज्ञातेय २२२

रत्वेन पीतघटस्याभावज्ञानासंभववत्प्रतियोगिसमानाधिकरणतादृशप्रतियोगितावच्छेदकत्वग्रहे प्रतियोगिस
मानाधिकरणत्वेनाज्ञायमानाभावप्रतियोगितावच्छेदकत्वानां तादृशाभावप्रतियोगितावच्छेदकत्वत्वेनाभावज्ञा
तत्र नासंभवादित्यर्थः। जातिस्विकरूपेण तत्त्वप्रतियोगितावच्छेदकत्वत्वेन । रूपांतरेण येन केनचित्रूपेण तथात्वज्ञ
गौ पिसंयोगित्वादित्यत्र प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वत्वेन तदभावज्ञानं हेतुः संभ
वत्येवेति भावः। इष्टापत्तिवारणाय वह्नित्वावच्छिन्नप्रतियोगिताकेत्यादि। ममेत्यंतं तु कंग्रमकालेन तादृशावच्छेद
कत्वसामान्याभावस्य दुर्ग्रहत्वात् वह्नित्वानवच्छिन्नेत्यादि धूमसमानाधिकरणेति विशेषणं विशेष्यभावा
पन्नतादृशपदार्थज्ञानरूपार्थं तत्कं नवेति तत्पावत्त्वस्याभावस्यापि हेतुसमानाधिकरणत्वेन ज्ञायमानत्वात् व
ह्नित्वानवच्छिन्नप्रतियोगिताकत्वेन च तत्परिग्रहणाभावात् तत्प्रतियोगितावच्छेदकत्वाभावज्ञानादेव नानुमितिप्र
तिभावः। वह्नित्वरतितत्पावत्त्वस्याभावस्य धूमसमानाधिकरणत्वेनाज्ञानात् वह्नित्वानवच्छिन्नप्रयोगिताकत्वेन
तादृशत्रितिविलाभावपरिग्रहः संभवत्येवेति भावः। उक्तरूपेण वह्नित्वानवच्छिन्नप्रतियोगिताकधूमसमानाधि

करणाभावप्रतियोगितानवच्छेदकत्वत्वेनानुपदाद्धर्मसमानाधिकरणासमभामावेवकिंत्वावच्छिन्नप्रतियोगि
भा. ताकत्वमस्तदादादिवृत्तित्वमभावस्यापि प्रमेबाधकाभावान्नोक्तरूपेणनाहशाभावपरिग्रहइत्यतोदोबांत
रमाह।धर्माधिकरणांतरेति।।अधिकरणांतरोपस्थितौतद्वृत्त्यभावस्यापिहेतुसमानाधिकरणत्वेज्ञायमानत्वसंभ
२२४ वादेतदधिकरणवृत्त्यभावत्वेनतत्परिग्रहाभावरतीदमुक्तं इत्थंचाधिकरणांतरस्याभावनिष्ठत्वनिरूपकत एतेनेत्यादि ... इत्यर्थः
याऽनुपस्थितावित्यर्थः।अधिकरणांतरवृत्त्यभावस्यधर्मसमानाधिकरणत्वेनानुपस्थितावित्यर्थः बाधः।एक
स्यैवघटत्वाभावस्याधिकरणांतरवृत्तेरस्मिन्नधिकरणेधर्मसमानाधिकरणत्वेनज्ञानादितिसंपूर्णमभिधानं।अ
नुमितेरनुभावविरुद्धत्वाभावदर्शनाचरासमत्वादावितिनाहशाप्रमोत्पादेपिधर्माधिकरणेतद्वृत्त्यभावप्रति
योगितानवच्छेदकत्वप्रमोत्पादेपितथाचधर्माधिकरणेतन्मतानसमनिष्टाभावप्रतियोगितानवच्छेदकावच्छि लो
धा च्छिन्नसमानाधिकरणधर्मवान्पर्वतइतिस्मरणात्मकात्परामर्शादनुमित्यापत्तिरित्यर्थः।एतेनएतदधिकरणे इत्यादि... २
पसत्ताप्रसत्तेऽनुमितावपिष्टापत्तिःअधिकरणांतरेचानुमित्यापादनेपक्षधर्मताज्ञानार्थं तदुपस्थित्यावश्यकत्वे २२४

धिकरणांतरानुपस्थितावितिविरुद्धंसामान्यलक्षणघटकाधिकरणांतरवृत्त्यभावस्यापिधूमसमानाधिकरण
त्वेनोपस्थितिसंभवाच्चतद्विरुद्धंइत्यादिदूषणमनवकाशंनानुपर्वतादौवह्नेःसंदेहाभावदशायांएतन्मतान
र्सदौवह्न्यनुमितावेष्टापत्तिसंदेहदशायांहेत्वधिकरणत्वेनज्ञायमानधर्मिवृत्तित्वेनवह्न्यभावस्याप्युपस्थितत्वा
वा॰ म२ग
त्तत्प्रतियोगितानवच्छेदकत्वग्रहादेवनानुमितिरितरत्राहाएवमितिधूमवत्तिवह्निर्नास्तीतिभ्रमदशायांचवह्न्यभा
वस्यधूमप्रतियोगिकत्वेनइतरेषांतुवह्नित्वानवच्छिन्नप्रतियोगिताकत्वेनपरिग्रहेधूमसमानाधिकरणत्वेनइ
तरेषांतुवह्नित्वांज्ञायमानानांयावतामेवाभावानामुक्तरूपेणप्रतियोगितावच्छेदकत्वंचवह्नित्वेसुग्रहमिति
व्यभिचारज्ञानदशायामप्यनुमित्यापत्तिरित्यर्थः॥वह्निःधूमभरतिज्ञानदशायांधूमप्रतियोगिकत्वेनवह्न्यभा
वस्याप्रतीतानसंभवात्तेनरूपेणप्रतियोगितानवच्छेदकत्वंवह्नित्वेदुर्ग्रहमतोवह्नित्वावच्छेदेनेति॥यत्किंचिद्
व्यधूमत्वज्ञानेपितथैवदोषःइत्यतोऽवच्छेदकानुसरणं॥वह्नेर्धूमव्यत्वज्ञानदशायामपिवह्नित्वंधूमाभावप्रतियोगिसा
भावप्रतियोगितावच्छेदकंनवेतिसंशयस्यासंभवात्तत्त्वेनाहशानवच्छेदकत्वनिर्णयासंभवात्तत्सान

भा०

२२५

225

णो विषयतायस्तु ज्ञानत्वाभावव्याप्यपर्यंतानुधावनं। गाहेपि वह्नेरनुमानाज्ञेऽत्यन्वयाः। तादृशावच्छेदकत्वानां विशि
ष्टाभाववह्नित्वावच्छिन्नाभावज्ञानमादाय अनुमित्यापत्तिर्नोक्तसामानाधिकरण्येन प्रतियोगितावच्छेदकत्वव्य
तिरिक्तानवच्छेद्यप्रतियोगितावत्तादृशावच्छेदकत्वाभावज्ञानत्वेन हेतुत्वोक्तौ तत्परिहारसंभावात्। विशिष्टाद्य
भावस्थले च विशिष्टत्वादेव तादृशस्यावच्छेदकत्वादिति। तेषां। उपदर्शितद्विविधाभावानां न तु विषयतानतुग
मप्यतद्विषयकज्ञानत्वेन हेतुत्वोक्तौ प्रमेयत्वेन तज्ज्ञानमादाय अतिप्रसंगः। तो ज्ञानमेवानुगमयति। तद्बुद्धी
मिति। ननु उपदितादृशावच्छेदकत्वग्रहत्वावच्छिन्नं प्रतिविरोधित्वमुच्यते तदा हेतुसमानाधिकरणाभावप्रतियो
गितानवच्छेदकत्वबुद्धेरसंग्रहः। प्रतियोग्यसमानाधिकरणघटिततादृशग्रहत्वस्य तत्त्वप्रतिबध्यतानवच्छे
दकत्वात्। अथ यत्किंचिद्रूपावच्छिन्नतादृशग्रहं प्रतिविरोधित्वं तदा वह्नित्वं तादृशावच्छेदकं घटवत्त्वेति
समूहालंबनविरोधिनिश्चयाभाववह्नित्वमिति तन्मते। अतिप्रसंग इति चेन्न। एवं वह्नित्वविशेष्यकतादृशा
वच्छेदकवैशिष्ट्यप्रकारकग्रहत्वघटकाभावविषयितावच्छिन्नप्रतिबध्यतानिरूपितविरोधित्वस्योक्तत्वात् भवदि २२५

२६

हि प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रकारकवत्कृत्वविशेष्य
कग्रहत्वं वा घटकं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रकारकवत्कृत्वविशेष्यकग्रहत्वं ननु
त घट[illegible]प्रकारकवत्कृत्वविशेष्यकं मितिनोक्तदोषः इदं नास्तीति ज्ञाने पि नीलघटवानिति ज्ञानोदयापत्तिः सामान्यघ
हितेति सामान्यघटितायाविशेषवत्तातद्बुद्धिरित्यर्थः सामान्यस्य घटकत्वं प्रतियोगितयाने न इदं नास्तीति ज्ञा
ने पि इदं घटत्वविशिष्टघटोस्तीति बोधेनानुपपत्तिः तदेवानुभवेन द्रढयति सत्यं हीति नीलो घटोस्तीति ज्ञा
ने नीलं नास्ति घटो नास्ति नीलो घटो नास्तीति त्रय सप्रियाह्यमाभावावगाहितया विरोधीति भावः इष्टमिति तद्भविक
स्येति तत्र यतित द्विशिष्टेति प्रतियोगितावच्छेदकता घटकसंबंधेन तद्विशिष्टत्वं व्याप्यवृत्तिप्रतियोगिता त्र न
एव तादृशग्रहविरोधित्वे न हेतुत्वादेवान्योन्येति नैवमवच्छेदत्वा [redacted] भावादिव्याप्यबोधस्याप्युपसंग्र
ह इति वाच्यं तादृशावच्छेदकत्वप्रकारकग्रहत्वघटकीभूतनिविष्टतानिरूपकधर्मावच्छिन्नप्रतियोगिताकत्व

संबंधेन यत्किंचित्प्रकारतानिरूपिताभावप्रकारतानिरूपितसाध्यतावच्छेदकनिष्ठविशेष्यताशालिग्रहत्वेन
प्रतिबंधकत्वस्य विवक्षणात् । भवति हि तादृशविषयितानिरूपको धर्मस्तादृशावच्छेदकत्वं तादृशावच्छेदकत्वं चेति
भा० तदवच्छिन्नान्योन्याभावत्वं ताभाववत्त्वो धसंग्रहः । व्याप्यदर्शनस्थले तु तादृशाभावप्रकारतानिरूपितानन्साध्यतावच्छेदकनि
२२६ ष्ठविशेष्यता किंतु तद्व्याप्यप्रकारतानिरूपितेति नातिप्रसंगाय तु साध्यतावच्छेदकनिष्ठविशेष्यतानिरूपितस्य
दभावप्रकारत्वे प्रतियोगितान्यसंबंधेन यत्किंचित्प्रकारत्वानवच्छिन्नं तदवच्छिन्नप्रतिबंधकत्वविवक्षणात् । त
दभावव्याप्यनिरासः । तत्र हि प्रतियोगितान्यसंबंधेन व्याप्तिप्रकारकत्वावच्छिन्नस्यैव प्रकारकत्वस्य साध्यतावच्छेद
कनिष्ठविशेष्यतानिरूपितस्य प्रतिबंधकतावच्छेदकत्वादिति । न दसत् ॥ तादृशावच्छेदकत्वव्यापकाभाववद्वृत्ति
त्वमिति ग्रहे ऽतिप्रसंगात् इति । ननु प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानव
च्छेदकवृत्तित्वेन साध्यतायां तादृशसाध्यतावच्छेदकविशेष्यकप्रतियोग्यसमानाधिकरणाभावप्रतियोगिता
वच्छेदकत्वज्ञानमात्रप्रसिद्ध्या लक्ष्यं तद्विरोधित्वेन तादृशहेतुसमानाधिकरणतानद्यानुगमहेत्यत आह हेत्वाभा
से चेति । तादृशस्याहार्यतानस्य प्रतिबंधकत्वात् द्विविधविषयकग्रहविरोधित्वेनाननुगम इति भावः । न च वृत्तित्वं ता २२६

नवच्छिन्नं तादृशाभावप्रतियोगितावच्छेदकमित्यपि ज्ञानं तद्विषयविषयकं तद्ग्रहविरोधि चेत्तादृशाभावप्रतियोगितानवच्छेदकमित्यपि ज्ञानं न भवतीत्यतो। १ कुत्रचित्पाठः

दृशाप्रतियोगितानवच्छेदकमित्यपि ज्ञानं तद्विषयविषयकं तद्ग्रह विरोधि भवतीति तद्ग्रहे पि तादृशाप्रतियोगिता
नवच्छेदकवत्त्वबुद्धेरनुमितित्वापत्तेरिति वाच्यं। तादृशसाध्यतावच्छेदकविशेष्यकं यत्तादृशविरोधि
ज्ञानं तत्त्वेन हेतुत्वस्य विवक्षणात्। नन्वेवं तादृशावच्छिन्नं अभावप्रतियोगितानवच्छेदकमित्यादिग्रहस्यापि तादृ
शग्रहविरोधित्वात्ततोऽप्यनुमितिः स्यादत आह यदि चेति। आदिना समानाधिकरणाभावप्रतियोगितानव
च्छेदकमित्यादिसंग्रहः। वस्तुतस्तादृशग्रहादनुमितिर्भवत्येव अत एव केवलान्वयिसंबंधज्ञानादेवानुमिति
रेकदेशिनां संमतेत्याशयेन यदि चेत्युक्तं। तादृशावच्छेदकत्वेति समानाधिकरणाभावप्रतियोगितावच्छेदक
त्वग्रहविरोधित्वमित्यर्थः। तेनाभावप्रतियोगितानवच्छेदकत्वत्रिमदभावप्रतियोगितानवच्छेदकत्वा
दीनामपि ग्रहस्य निरासः। न चैवं वह्नित्वं अभावप्रतियोगितानवच्छेदकं चेति समूहालंबनात्मकग्रहस्यापि तद्ग्र
ह इति वाच्यं। समानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधितानवच्छेदकं सत्प्रतियोगिसमा पद
नाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वग्रहविरोधितावच्छेदकं मदवच्छिन्नस्योक्तसमूहालंब

× असमानाधिकरणाभावप्रतियोगितानवच्छेदकं ३ ×

न साधारण्यात्। नचैवमपि वह्नित्वं धूमसामानाधिकरण्याभावप्रतियोगितानवच्छेदकं वह्निसमानाधि
भा. करणधूमवानिति ज्ञानादप्यनुमितिः स्यादिति वाच्यं। तादृशविरोधितावच्छेदकीभूततया वह्नित्वस्य विवक्षि
२२७ तातन्निरूप्याश्रयावच्छेदकैर्विवक्षितातन्निरूपितायाः सामानाधिकरण्यविवक्षितातन्निरूपितं यत्तत्पक्षे हेतुमत्ता
वगाहित्वं तेन रूपेण हेतुत्वस्योक्तत्वात्। समूहालंबने च तादृशानवच्छेदकवह्नित्वविशेषयितानिरूपितानव
कः सामानाधिकरण्यप्रतियोगित्वे न विवक्षितेति नातिप्रसंगः। स्तु नरामिति -अन्योन्याभावस्याप्यवृत्तित्वे
ऽवारणाभूतज्ञानानुगमाय तद्विषयतावच्छेदक एव तद्विशेषणं न तु व्याप्तिलक्षणे। व्यावर्त्तकत्वात् -अव्या
प्यवृत्तित्वे तु -अ[illegible]व्याप्तिवारणाय व्याप्तिलक्षणेपि तद्विशेषणमिति भावः। तथापि तादृशान्योन्याभावे
विशेषणं तत्र तस्य प्रवेशोपि प्रतियोग्यवृत्तित्वस्यैवेति -अत्यंताभावे तु प्रतियोगितावच्छेदकावच्छिन्ना
धिकरणावृत्तित्वं विशेषणमिति तत्रावच्छेदकांशस्याधिकरणांशस्य प्रवेशावश्यकत्वमिति भावः। स्व
रूपांतरमाह। नचेति। भेदस्य तादात्म्यातिरिक्तसंबंधानवच्छिन्नतया साध्यवत्तां संबंधांतरेण हेतुमन्नि २२७
२८

ष्टभेदाप्रतियोगित्वात् इति भावः। न च समवायेन वह्निमद्भेदस्य धूमसमानाधिकरणत्वात् साध्यतावच्छेद
कसंबंधेन प्रतियोगितावच्छेदकत्वस्याभावघटितविवक्षावश्यकत्वे कथमेतदिति वाच्यं तथापि विशिष्यत्वा
दिनावच्छिन्नत्वस्यापि तादृशात्यंताभावप्रतियोगितावच्छेदकतया साध्यतावच्छेदकताघटकसंबंधेन तादृशा
वच्छेदकत्वस्याभावविवक्षावश्यकत्वेन साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यापि प्रतियोगितानिवेशेन अभे का° ४
रवादिति ध्येयम् श्रुतेति। अत्यंताभावगर्भायामपि निरुक्तायां विशेषणताविशेषादिगर्भायां प्रतियोगि
व्यधिकरणत्वादेरप्रवेशात् कुतो लाघवमिति। अपरे त्वित्यारभ्य वदंतीत्यंतमेकेषां मतं। अनुभविकत्वा
दिति। न प्रामाणिकं गौरवं न दोष इति भावः। द्वितीयेति। अव्यवहितोत्तरघटितत्वं तत्र व्याप्तित्वं वा कार्यतावच्छेदकमि स
ति भावः। यत्तु यद्रूपावच्छिन्नेति पाठः। अत्रेदं विरोधित्वेनान्यतरंगाकारशून्यपाठः। यद्रूपं साध्यतावच्छेदकं तदवच्छिन्नसा
ध्याभाववत्त्वं च तेन साध्यतावच्छेदकावच्छिन्नात्यंताभाववत्तादृशसाध्यवदन्योन्याभावयोरुपसंग्रहः। व्याप्तिर्बुधैः अप
त्यंतान्योन्याभाववद्बुधः। साध्येति। साध्यतदवच्छेदकयोः सम्यगन्वयतदुहस्य तादृशसामानाधिकरण्यावगाहिग्रहस्याक

पे ४

यं चेदिति। अत्यन्ताभावे अन्योन्याभावे च साध्यस्य साध्यवतः तादृशप्रतियोगितासंबंधेनारोपेऽलौत्यर्थः। व्यतिरेकि-
भा. णि तादृशसाध्याद्यभावसामानाधिकरण्यव्याहितानंश्रमाद्रूपमपि व्याप्तित्वमस्त्येवेत्युक्तहेतौ परं तन्न संभवे व्यक्तानुवृ-
२२८ त्ति तु तादृशसामानाधिकरण्याव्याहितानमपि भ्रमाद्रूपं तत्संभवेऽसंभवेऽपि तत्स्वमिति भावः। नन्विदंत्वमिति चिन्ता वानेकवत्त्व ऽनेकतान्यतमत्वं
तत्त्वयोरननुगमात्प्रोक्तरूपेणाभावाननुगमः। एवं साध्यभेदसाध्यवदत्यन्ताभावसामानाधिकरण्यग्रहे। तिप्रसंगान्न
च साध्यवत्त्वग्रहविरोधिग्रहविषयतावच्छेदकरूपेण तत्सामानाधिकरण्यमाहि यज्ज्ञानं तद्विरोधित्वं वक्तव्यं प्रागु-
क्तरीत्यावश्यकाद्याप्यत्वविरोधित्वादिकं च तन्निर्वाच्यमिति वाच्यम्। एवमपि व्याप्यहेतुसमानाधिकरणात्यन्ताभावप्रति-
योगितानवच्छेदकत्वादिग्रहस्य भिन्नप्रकारतया साध्यात्यन्ताभाववद्वृत्तित्वादिग्रहं प्रति विरोधित्वासंभवात्प्रोक्तान-
नुगमः समर्थितः। एतदेवविवक्षानुगम इत्यर्थं ज्ञाननानुगमं परित्यज्य तादृशव्यभिचारज्ञानमेवानुगमय्य व्या-
प्तिज्ञानमनुगमयति। साध्यतावच्छेदकेत्यादिना योग्रह इति न यावत् तादृशसमूहालंबनरूपग्रहविरोधित्वेना-
नुगम इति भावः। अत्यन्ताभावपदतां मध्ये साध्यात्यन्ताभाववद्वृत्तित्वज्ञानस्यैवान्योन्याभावघटिता २२८

नां मध्ये च साध्यवदन्यावृत्तित्वज्ञानस्यैव लाघवाद्धेतुत्वमिति केवलान्वयिखंडने स्वयं वक्ष्यमाणमतमनुसंधायाह।
साध्याभाववद्वृत्तित्वेति। केवलान्वयिनि साध्याभावाप्रसिद्ध्या कथं तद्ग्रह इत्यत आह। असिद्धिरिति। एवं च। खंडशः प्र
सिद्ध्या न तु धर्मव्यापकवह्निमान् धूमादित्यत्र साध्यतावच्छेदके तादृशाग्रहाप्रसिद्धेः कथमनुगम इत्यत आह। अधिक
मिति। प्रागेव व्याख्यातं चैतत्। नन्वेवं व्याख्याने ऽन्योन्याभावगर्भैवेति ग्रंथो ऽसंगत इत्यत आह। अन्य एवेति। उपल
क्षणपरं अजहत्स्वार्थलक्षणया ऽन्योन्याभावात्यंताभावगर्भव्याप्तिप्रतिपादकं। उपलक्षणपरत्वे बीजं दर्शयति
प्रसिद्धत्वाति। विशेषनिषेधस्य शेषाभ्यनुज्ञाफलकत्वादिति भावः।। वदंतीत्यस्वरसः।। तद्बीजं तु अन्योन्यात्यंताभाव
घटितव्याप्तिज्ञानादनुमितिर्नतु भवकीयेनेंद्रियसन्निकर्षादिवद्विशिष्य कार्यकारणभावः कल्प्येत। अनुमवस्य
संदेहे तु साध्याभाववदवृत्तित्वादिज्ञानस्यैवातिलघुनो हेतुत्वकल्पनमुचितं। समूहालंबनात्मकव्याप्तिवारधी।
विरोधिधीत्वेन हेतुत्वकल्पनेपि घटविषयकतादृशसमूहालंबनग्रहविरोधीघटाभावग्रहोपातितस्यापि हेतुता
पत्तिः। नचतावन्मात्रविषयकसमूहालंबनं धर्म्यंतरापाभावेन हेतुः समानाधिकरणं इत्यादिग्रहस्यापि साध्यताव
च्छेदकावैतादृशप्रतियोगितावच्छेदकत्वादिग्रहविरोधित्वात्तस्यापि हेतुत्वप्रसंगः। तादृशाग्रहत्वावच्छिन्नविरोधित्व

न

भा

२२५

229

स्यनिवेशनेपुनरप्रसिद्धिः। स च साध्यतावच्छेदके साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वे च पत्तादृशात्यंताभावान्योन्या
भावप्रतियोगितावच्छेदकत्वावगाहित्वं तदन्यतरावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताशालित्वेनानुगमा
त्तोक्तदोषइतिवाच्यं। तथा सति समूहालंबनपर्यंतानुसरणेनैव पर्याप्तेर्लाघवात्तादृशव्याप्तिज्ञानद्वयान्यतरत्वादिनैव
हेतुत्वकल्पनस्योचितत्वात्। न च तदपि न्यून्यतरत्वघटकभेदयोः परस्परं विशेषणविशेष्यभावेन विगमनाविरहेण गौ
रवेण तादृशान्यतरत्वघटकस्य प्रातिस्विकरूपेण लाघवात् उपमोपस्थितत्वाच्च हेतुत्वकल्पनस्योचितत्वात् विभिन्नलिं
गकव्याप्तिज्ञानजन्यानुमित्यनुरोधेन कार्यतावच्छेदकसंकोचस्य सर्वमतत्वादिति। नन्वेवमुपाधिरसिद्ध्युपजीव्यत्वे
नेत्यादिमूलग्रंथस्य समाधानमग्रंथमधुनैव तात्पर्यमाह। व्यभिचारज्ञानस्येत्यादिना। साक्षात्किंचिदुन्नयनमवि
प्रीसृत्य विरोध्यविषयत्वादिति ग्राह्याभाववत्ताप्याविषयकत्वादित्यर्थः। ननु व्यभिचाराद्युन्नयने विरोधित्वेपि हेत्वाभा
त्वेन कुतस्त्यतत्राह। व इत्यनेनेति। साक्षात् ग्राह्याभाववत्ताप्यान्यतरावगाहितया तेन सिद्धसाधनव्युदासः। अनौपाधि
कत्वज्ञानं च न व्याप्तिधीहेतुरिति मूलस्य विवक्षितार्थं वक्तुं यथाश्रुतमनुवदति। निरुपाधित्वस्य ज्ञाने इति। तथात्वेपि नि २२५

६।२।२

२०

रूपाधित्वज्ञानस्य व्याप्तिधीहेतुत्वे पि तत्पाधेरिति। अनुमितेस्तत्कारणतानस्यवासाक्ष्यादविरोधित्वादिति भावः॥ इदं पुन
रित्यादि। इदं किं तत्राह। यदिति। वक्ष्यमाणवाक्यार्थपरामर्शकं वक्ष्यमाणं यत्तदवधेयमित्यन्वयः। तदेवाह। अन्योन्याभा
वस्येत्यादिना। तद्घटितलक्षणस्य च अन्योन्याभावघटितलक्षणस्य। अतिव्याप्तिरिति। संयोगी सत्त्वादित्यादौ संयोगिभेद
स्य जागुणकरीत्या गुणत्वावच्छेदेनापि संयोगिरूपप्रतियोगिवृत्तित्वाभावात् तादृशघटादिभेदप्रतियोगितानवच्छेदकं संयोग
वत्त्वमित्यतिव्याप्तिरित्यर्थः। प्रतियोगिभिन्नेत्यत्र स्वाधिकरणं न इत्यन्योन्याभावेत्यादौ चेव संयोगिद्रव्यत्वादित्यत्राव्याप्ति
तत्र हेत्वधिकरणस्य द्रव्यस्य संयोगिरूपप्रतियोगिभिन्नत्वात्। न च गुणत्वधर्मावच्छिन्नसाध्यकव्यभिचारिण्यतिप्रसंगवार
णाय प्रतियोगिवृत्तित्वं हेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसंबंधिनिष्ठतादृशा
न्योन्याभावप्रतियोगितानवच्छेदकं तद्धर्मभिन्नं यत्साध्यतावच्छेदकमित्येतावत्पर्यंतस्यावश्यं विवक्षणीयत्वे तथा
विधद्रव्यभेदमादायैव संयोगी सत्त्वादित्यत्र नातिव्याप्तिरिति वाच्यं। अत्रावच्छेदकं यदि साध्यतावच्छेदकसंबंधेन त्वे
तदा संयोगेन साध्यतायामव्याप्तिः प्रतियोगिवृत्तेरन्योन्याभावस्य संयोगेन प्रतियोगितावच्छेदकस्याप्रसिद्धेः। प्रति

तादृविशेषणे ।

भा॰ योग्यवृत्तिपदवैयर्थ्यं वा । अथ येन केन संबंधेन विशेषणे वा तदा तु तत्संसर्गप्रतियोग्यवृत्तिपदवैयर्थ्यमिति तस्य लघुगुरु
साधारणं स्वरूपसंबंधरूपमवच्छेदकत्वमादायैवायं विचारः । व्याप्यवृत्तीति । तत्प्रतियोग्यवृत्तित्वादेरप्रवेशा
२२ दिति भावः । स्वव्यापकेति । स्वं हेतुः तद्व्यापकं यत्साध्यं तत्सामानाधिकरण्यं ऽत्रान्योन्याभावघटितव्यापकत्वमु मिति
२३४ भयत्र निर्वाच्यं । प्रतियोगितावच्छेदकसंबंधाप्रवेशे लाघवादिति भावः । स्वव्यापकतावच्छेदकेति । स्वं साध्यं तत्प्रतियोगि
त्वादित्यादौ तु संयोगव्यापकतावच्छेदकरूपत्वावच्छिन्नाभाववत्त्वेन समं सत्तायाः सामानाधिकरण्यान्नातिव्याप्तिरि
ति भावः । ननु स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वोताभावेन समं सा
सामानाधिकरण्यमित्यपेक्ष्य स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकप्रतियोगितकरूपावच्छिन्नप्र
तियोगिताकान्योन्याभावेन समं सामानाधिकरण्यं लघुतरमित्यत आह । तादृशरूपविशिष्टावच्छिन्नेति । ता
दृशं स्वव्यापकतावच्छेदकं रूपं तु वस्तुतः यत्नेन तु लक्षणेऽनेन रूपेण प्रवेशः । लक्षणं तु क्रमेवेधर्तव्यमिति ध्येयं । अन्यो
न्याभावस्य देशिकमव्याप्यवृत्तित्वमनभ्युपगच्छतां प्राकरनेइदानीं अयं न स्पाम इति धीवलात्कालिकमव्याप्य
वृत्तित्वमभ्युपगच्छतां मणिकारादीनां मते संयोगाभावसाध्यके स्वव्यापकसाध्यसामानाधिकरण्यरूपलक्षणस्य म २२

वच्छेदकता [illegible]

२१

ज्ञात

लक्षणे मतत्वत्तद्रूपेस्य अन्यत्राव्याप्तिमाह। स्मृतीत्यादि। इदं स्मृतिविषयः संस्कारविषयः जन्यज्ञानविषयो वा वा

च्यत्वादीत्यादावित्यर्थः। तत्र स्मृतेरुद्बोधकाधीनत्वेन संस्कारस्याप्युद्बोधकस्यैव विषयेसत्त्वे न सार्वत्रिकत्वात्तियम

त्जन्यज्ञानेति। नित्यज्ञानविषयतायाः सर्वदैवसत्त्वाज्जन्येति। तस्यच प्रलयकालावच्छेदेन व्योमादावभावस्य सत्त्वा

त्। प्रतियोगिवैयधिकरण्याघटितं नस्वव्यापकसाध्यसामानाधिकरण्यरूपं लक्षणं तथा पक्षव्यापकवृत्ति केव

लान्वयितरस्याभावप्रसिद्ध्या च उपैतरलक्षणमपि तन्नाव्याप्तमिति भावः। न च तद्व्यापकस्याकाशाभावस्य

भाव भावे आकाशे हेतुसामानाधिकरण्यसत्त्वान्नाव्याप्तिरिति वाच्यं। आकाशाभावस्य केवलान्वयित्वेन त

दभावासंभवस्य स्वयं व्यवस्थापनीयत्वादिति। सर्वसाधारणं लक्षणांतरमाशंकते। न च येति। स्वं हेतुः धर्मवा

न्वकेऽरित्यादौ धूमवन्नेदस्यापि वह्न्यधिकरणावृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वादतिव्याप्तिरतो यत्किंचि

त्सत्त्ववृत्तिधर्मावच्छिन्नेत्यपपाठः। वह्निमान् धूमादित्यत्र हेत्वधिकरणीभूतपर्वतावृत्ति महानसीयवह्नित्व

दवच्छिन्नप्रतियोगिताकोवह्निमद्भेदोपास्य आत। न च वह्निसंयोगिगुणकर्मान्यत्वेन तत्सत्त्वादित्यत्राव्याप्तिः। वि

शिष्टस्यानतिरेकादत आह। यद्धर्मेति। यद्धर्मः हेतुतावच्छेदकधर्मः। दमसमादिसाधारणपदार्थनाम्ना यद्धर्मविशिष्ट

इति। स्वाधिकरणीभूतयत्किंचि

त्वमिति।महाकालोघटवान्कालपरिमाणादित्यादौचवृत्यनियामकसंयोगेनगगनादिमद्भेदएवंतादृशाःप्रसि
भा. द्धइतिनव्याप्तिः।गुणइति।अनित्यस्यकिंचित्स्पंदाद्यवृत्तित्वात्गुणत्वपर्यंतानुधावनं।स्वरूपसंबंधः।कालिकवि
२२१ शेषणताविशेषः।तादृशेति।नचतादृशाभेदाप्रसिद्धिः।अतीततत्तद्व्यक्तिमद्भेदस्यैवतादृशस्याप्रसिद्धत्वात्।जाति
मदिति।मेयत्वाधिकरणीभूतयत्किंचिद्व्यक्तिसमवेतधर्मानवच्छिन्नप्रतियोगिताकेनजातिमद्भेदः।किंतुघटादेर्भे
231 दः।तत्प्रतियोगिताचनजातिमत्त्वेनावच्छिद्यते।जातिशून्यमेयव्यक्तौचसमवेतस्याप्रसिद्ध्याजातिमत्त्वावच्छि
पेन न्नाभावस्यासंग्रहादितिभावः।नचस्वाधिकरणयत्किंचिद्व्यक्तौयेनसंबंधेनधर्मस्यवर्त्तमानत्वंतेनसंबंधेनतद्व्य
क्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वस्यरूक्तौदोषद्वयस्यापिनावसरः।समवायेनगुणत्ववद्भेदस्यजातिमद्भे
दस्यचस्वाधिकरणीभूतस्पंदसमात्मादिवृत्तितानियामकसंबंधेनतदवच्छिन्नप्रतियोगिताकत्वादितिवाच्यं।स्वा
यमात्माज्ञानादित्यत्रकालिकसंबंधेनात्मत्ववद्भेदस्यापितादृशतयातत्प्रतियोगितावच्छेदकत्वेनात्मत्वस्या
माने।साध्यतावच्छेदकसंबंधेनतत्प्रतियोगितावच्छेदकंयत्तदन्यत्वस्यविवक्षणेचकालोघटवान्काल २२१

परिमाणादित्यादौ ऽप्रसिद्धिरिति। एतेन ग्रहविषयस्यानिर्वचनेना ऽऽलोपान्ति। व्याप्तिर्ग्रहेत्यर्थः। व्याख्यातः दुर्वच
तया व्याख्यातः। न संभवतीत्यर्थः। एवं ऽन्योन्याभावस्याप्यप्रसिद्धत्वे ऽव्यापकमेवेति। संयोगानधिकरणत्वस्य प्र
लयकालाद्यवच्छेदेन द्रव्येपि सत्त्वादिति भावः। स्वाधिकरणयत्किंचिद्वृत्त्यवृत्तीति। न स्वाधिकरणयत्किंचिद्व्यक्तिप
र्यतावच्छिन्नमहानसीयवह्निप्रतियोगिकस्य वह्नित्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकत्वाद्वह्नित्वस्य वह्निमान्
धूमादित्यादावव्याप्तिरिति वाच्यं। स्वाधिकरणयत्किंचिद्व्यक्तिवृत्तितानवच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वस्य त
दर्थत्वात्। अत एव गुणान्यत्वविशिष्टसत्त्वावानित्यादावपि नातिव्याप्तिः। स्वाधिकरणभूतयत्किंचिद्व्यक्ति व
त्त्यप्रतियोगिकेति च नोक्तं। वह्निमान् धूमादित्यादौ घटाभावस्यापि घटमेयत्वान्यतराभावाभिन्नतया तादृशाभाव
प्रसिद्धिरिति। पर्ववदिति। यत्किंचित्संबंधेन साध्यतावच्छेदकसंबंधेन वा ऽवृत्तित्वविवक्षणेरित्यर्थः। गुणः स्पंदत्वा
दिति। साध्यसमानाधिकरणहेतुत्वमित्यत्र साध्यतावच्छेदकसंबंधविवक्षायामव्यापकतालक्षणस्य केवलस्यातिव्या
प्तिरितरथा तु गुणे तत्स्पंदान्यतरत्ववान् स्पंदत्वादित्यादौ ऽव्याप्तिर्बोध्या यथाश्रुते तु स्पंदत्वे गुणत्वरूपसाध्यसामा

भा.
२३२

नाधिकरणत्वाभावादेव नातिव्याप्तिरिति भावः। स्वप्रतियोगिनिष्ठाधेयत्वेति। साध्यतावच्छेदकसंबंधेन स्वप्रतियो
गितावच्छेदकावच्छिन्ननिष्ठाधेयत्वं बोध्यं तेन गुणः स्पंदत्वात् गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादौ च नातिव्याप्तिः।
तादृशानिरूपकत्वं अव्याप्यवृत्तिव्याप्यवृत्तिर्वा। आद्ये दोषमाह उत्पत्तीति तत्कालेघटेन संयोगनिष्ठाधेयत्वनिरूप
कः प्रलये परमाण्वादिन संयोगनिष्ठाधेयत्वनिरूपकमपि उत्पत्तीतेर्विवादग्रस्तत्वात् आह उपगमइति। अन्त्ये दोष
माह। कालपरिमाणे चेति। कालिकसंबंधेन यत्र तत्र साध्य इति शेषः। साध्यतावच्छेदकसंबंधेन स्वप्रतियोगिनिष्ठा
धेयत्वानिरूपकहेत्वधिकरणत्वस्याभावस्याप्रसिद्धत्वात्। वृत्तिमात्रस्यैव महाकालाधेयत्वात्। अप्रवृत्तेश्चा
धेयत्वाभावादिति चेन्न आधेयत्वधेत्व निरूपकस्यापि कालस्याप्यावच्छेदेनाधेयत्वानिरूपकत्वादव्याप्तिरिति व्या
ख्यातं। तदसत्। उत्पत्तिकालइत्यादिना तत्कस्यैव दोषदानेन इष्टापत्तेः शंकानुत्थानादिति। यावत्साध्यव्यापकव्या
पकत्वं यावत्साधनाव्यापकाव्यापकसाध्यकत्वं वा। अनौपाधिकत्वं क्रमेण सिद्धांतयति। साध्येत्यादिना। प्रथमे
भावद्वयप्रवेशे गौरवादाह। स्वसमानेति। स्वं हेतुः। अनयोश्च पदव्यावृत्तिः पूर्वमेव व्याख्याता। लाघवादन्यदाह। स्व
समानाधिकरणेति। स्वं हेतुः। इदं गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेराह। यद्धर्मावच्छिन्नेति। साध्य २३२

सर्वपक्षानंपस्यालेदृलहूपंक्तितामलिनोरिकृते
तदेवप्रकारांतरेणस्वयमपिलिखितमपिमैकस्यपुस्त

स्वसामानाधिकरण्यव्यापकतावच्छेदकसाध्यसामानाधिकरण्यत्वकत्वमेव वक्तुमर्हं तथापि

तावच्छेदकावच्छिन्नेतराघटितत्वस्य व्यापकत्वादन्यस्य दुर्वचत्वाद्व्याप्तेर्विशिष्टैकार्थरूपत्वं चानिरुक्तमाह । (साध्य)सामानाधिकर
ण्येति । यद्यपि हेतौ तादृशसाध्यसामानाधिकरण्यत्वकत्वं स्वतंत्रं यः स्ववृत्त्यवच्छेदकत्वप्रतियोगिव्यापकताप्रतियोगि
सामानाधिकरण्यप्रतियोगित्वरूपः प्रकृते वक्तव्यस्तथापि जातिगौरवं तादृशसामानाधिकरण्याभावत्वकत्वमित्यत्र ता
दृशाभावत्वस्य हेतौ संबंधः स्वनिरूपकसामानाधिकरण्यप्रतियोगित्वमिति लाघवाय एवं व्यापकत्वं न तत्सामानाधिकरण्यान्योन्या
भावप्रतियोगितानवच्छेदकत्वं तत्र सामानाधिकरण्यव्यक्तीनां भेदात्तत्सम्भवत्यतत्तत्रतत्सामानाधिकरण्यत्वेन तत्समानाधि
करण्यान्यत्वेनाभावप्रतियोगितानवच्छेदकत्वादिरूपं तद्धर्मावच्छिन्नं यथा सामानाधिकरण्यत्वादिप्रवेशादतिगौरवमतोऽभाव
स्यावृत्तित्वादन्योन्याभावप्रतियोगितानवच्छेदकत्वमेव व्यापकत्वमस्तु न पुनरित्यतोऽपि नाभिधानमिति मंतव्यं । तादृश
व्यापकतावच्छेदकत्वसामानाधिकरण्यसामान्याभावत्वकत्वमित्यंताभावघटितव्यापकत्वाभिप्रायेण । अन्यो
न्याभावघटितव्यापकत्वप्रवेशे तु तादृशव्यापकस्वसामानाधिकरण्यसामान्याभावकत्वं तद्बोध्यमिति । साध्यता ल
वच्छेदकेत्यादि । समवायेन साध्यतायां वह्निमान् धूमादित्यादौ ऽतिव्याप्तिवारणाय साध्यतावच्छेदकसंबंधेने
ति । वह्निमान् धूमादित्यत्र संयोगेन हेतौ साध्यसामानाधिकरण्याभाववतो धर्मावयवरूपस्य धूमसामानाधि करण्यस

भा.
२२२
233

त्वादव्याप्तिवारणाय हेतुतावच्छेदकसंबंधेनेति एव्वं सत्त्वादित्यादौ सा(धा)धिकरणीभूतंवंधसामान्ये नावृत्तौ गगनादौ हे
त्वसामानाधिकरण्यसत्त्वादतिव्याप्तिवारणाय एकेनेत्यादि। एकत्वस्याननुगतत्वादाह। विशेषणताविशेषणेति लमपा
प्रसंगादिति। कार्येण व्याप्तिग्रहेणानुमतायाः कारणीभूतसामान्यलक्षणायाः अनुपेक्षणीयत्वादित्यर्थः। समानाधिक
रणयोरिति। अन्यथा तादृशवह्निसमानाधिकरणरूपत्रिधर्मत्वरूपाया व्याप्तेर्मानसीयधूमवह्निसन्निकर्षकाल
एवग्रहीतायाः स्मरणसंभवेन पर्वतीयवह्नेरग्रहेपि पर्वतीयधूमे विशिष्टज्ञानसंभवादिति भावः। नच पर्वतीयवह्नि
व्याप्तिग्रहकाले सत्त्वेनेति चेत्तु मितिलक्षणेत्यर्थः। उपोद्घातानौ प्रसंगसंगतिस्सूच्यते न्येविदिति। अत्र स्वरस
वीजं तु पर्वतीयवह्निव्याप्तिग्रहं विनापि व्यत्तद्वघिवीत्वव्याप्तिग्रहाधीनानुमितिं मतानसीयवह्निपरमव्याप्तिप्रत्य
क्षाधीनां तिसाधयिषानो वह्न्यनुमितिं वा तादृशज्ञातिघटितलक्षणस्य पर्वतीयवह्निमात्रदत्तानुमितावपि सत्त्वान्ने
पोज्ञातावसरइति। सा चेत्यनेन परामृष्टायाः सामान्यलक्षणप्रत्यासत्तेरीदृशसंबंधविशेषणेनेत्यस्यातिरिक्तै
व वेत्यस्य चाभेदे नान्वयपरस्तथैव भयत्रैव सामान्यलक्षणप्रत्यासत्तिशाब्दस्य सत्त्वे दर्शयति। अत्रचेति। तत्र २२२

ज्ञानमिति। सामान्यज्ञानस्य सामान्यनिरूप्यत्वादिति भावः। नन्वेवं धूलीपटले धूमत्वभ्रमे तदुत्तरं सकलधूमगोचरो
व्याप्तिग्रहो न स्यात्। धूमत्वस्य धूलीपटलाविशेषणत्वादतो विशेषणशरीरमाह। तद्विशेष्यकेति। इंद्रियसंबद्धवि
विशेष्यकेत्यर्थः। भावार्थं विवरयितुमाह। तत्रेति। तत्रेंद्रियसंबद्धे सत्त्वमप्यर्थश्च विशेष्यतासंबंधेनावच्छेदकत्वं। वि
शेषणत्वं प्रकारत्वं। न त्वेवं व्यधिकरणबहुव्रीह्यापत्तिः अतः प्रकारांतरमाह। संबंधपदस्यैवेति। परंपरासंबं
धं दर्शयति। तत्संबद्धेति। सैवेति। नो त्रिकैक्यैव परिभाषितत्वादिति भावः। अत्र चेति। इंद्रियसंबद्धविशेष्यकज्ञा
नप्रकारकत्वेनेत्यर्थः। बहिरिंद्रियस्येत्यत्र बहिःपदस्य फलमाह। एवं चेति मनसा लक्षणान्तिरासार्थं यत्किंचिदिति।
वदतीत्यस्वरसबीजं तु मनोवाहिनीसंपातस्थलेऽव्याप्तिप्रसंगवारणाय तदिंद्रियकरणकत्वधर्मवत्त्वे बो
धसामग्र्याः प्रत्यक्षत्वापत्तिः यत्वस्याव्यापकत्वे तेनैवातिप्रसंगभंगे क्वचित् तदिंद्रियजन्यत्वादिविशेषणेनेति। विशेषणे बा
धावस्य ज्ञानप्रकारार्थं करणे बीजं दर्शयति। एतेनेत्यादिना धूलीपटलरत्निसावधारणं। तेन धूलीपटल एव वह्नि
हचारग्रहस्तत्र धूमत्वो व्याप्तिग्रह इत्यर्थः। अन्यथैवं धूमे व्याप्तिग्रहः संभवेत् तत्रैव सामान्यलक्षणया सकल

८८१

८२ वर्त्तो

धूमगोचरवह्निव्याप्तिग्रहसंभवेन तन्मूलकस्यापरामर्शसंभवादिति भावः। हेत्वभावेनेति। धूमाभावव्याप्तिज्ञानस्य
भा. पहेत्वभावेनेत्यर्थः। सर्वोल्लेखमेण विशेषणशब्दस्यान्यार्थकरणे बीजमुत्कटशिष्यजिज्ञासाविषयतयाप्रय
२२४ मतः। प्रदर्शनवरमोल्लेखे ऐव विशेषणांतरयोर फलं दर्शयति। किंचेत्यादिना। तत्र ज्ञानस्य तादृशेन्द्रियजन्यत्वाभि
स्य फलमाह। धर्मिस्तरीरेति। लौकिकसन्निकर्षकाले तद्ग्रहासंभवादाहादो बवशादिति। ज्ञानप्रकारत्वरूपलक्षण
२३५ र्यमाह। स्मरणेति। सामान्ये न चाक्षुषज्ञानापत्तिरिति योजना। लौकिकसंबंधरत्वस्य फलमाह। उद्बोधनेन
वेति। नयनेनेत्यस्यानुषंगेणान्वयः। विगमे पीति नवहरणमात्रं सामान्यलक्षणाजन्यज्ञाने त्यन्तेकाहतिरि
ति वाच्यं। तादृशसामान्यज्ञानमूलकसामान्यज्ञानधारायाएव सामग्रीसंभवेनापादनानन्वेतदनुभव
सिद्धमिति भावः। ननु धूमत्ववह्नित्वे प्रत्यासत्त्यानिखिलवह्निधूमग्रहसंभवेपि निखिलवह्निमतांएकसामान्यभ
वेनाग्रहाद्वह्निसंयोगित्वलक्षणसामानाधिकरण्यग्रहसंभवानववह्निसंयोगित्वेन सामान्येन सर्वेषांव
ह्निमतां ग्रह इति वाच्यं। वह्निसंयोगित्वस्य वह्निसंयोगास्वरूपतया नानात्वादनुगमाभावेन नानात्वाभिप्रायकं व्याप्ति। २२४

२५

ग्रहस्थसामान्यलक्षणप्रत्यासत्त्येति मूलमनुपपन्नमत आह। सामान्यं चेति सखंडं अनेकवृत्ति तावच्छेदकानुगतरू
पावच्छिन्नं वह्निमत्त्वादिकं। अखंडं वानेकवृत्त्येकं घटत्वादिकं। सखंडे वह्निमत्त्वादौ अखंडं वह्नित्वादिकं। परंपरासं
बंधस्त्वाश्रयाधारकसंबंधेन प्रत्यासन्नानानुसमवायेन पुरोवर्त्तिनि घटत्वप्रकारकज्ञाने घटत्वसामान्यलक्षणाया
कालादेरपि भानस्यात्। तस्यापि त्रैकालिकतया घटत्वाश्रयत्वादित्यत आह। येनेति। इत्थं च वह्निमत्त्वं दंडित्वादेः परंप
रासंबंधेन वह्निदंडत्वाद्याकारक वह्नित्वदंडत्वप्रकारकज्ञानानंतरमेव सामान्यज्ञानमिति ध्येयं। वस्तुतस्तु सामा
मान्याभेदेन कार्यकारणभावस्यापि भिन्नतया वह्नित्वरूपेण वह्निप्रकारकज्ञानस्यैव वह्निसामान्याश्रयप्रत्यासत्त्वे
कार्यतावच्छेदकं कल्प्यते। न च परंपरासंबंधेन वह्नित्वप्रकारकज्ञानस्य तेन संबंधेन वह्नित्वाश्रयप्रत्यासत्तिका
दृष्टिम रणत्वस्यावश्यं कल्प्यत्वेनैवं यावत्त्वयत्वोपपत्तौ न कार्यकारणभावान्तरं कल्प्यत इति वाच्यं। परंपरासंबंधेन वह्नि
त्वाद्यवगाहि वह्निमानिति बोधानंतरं निखिलवह्निमत्प्रत्यक्षस्य सर्वानुभवसिद्धतया तदुपपत्तये च तथा कल्पनादि
ति। अखंड एवाशंकते नन्विति। सामान्यत्वलाभायोक्तं नानाधिकरणेति। अखंडत्वलाभायोक्तं एकव्यक्तिवृत्तित्वे सति
उत्वे तु परंपरासंबंध घटत्वादेरेवासत्त्वितया उक्तत्वेनाशंकावारणवानवतारादिति भावः। सिद्धांते परंपरासंबंधघटकु
घटक

स्यप्र दर्शनाय घटप्रागभावादि स्तैरिति। = आदिपदग्राह्येषु नित्यत्वं व्यावर्तयति। = अनित्य इति। तत्रं कपालादौ। न दभा
भा॰ वेति। घटादिनाशेत्यर्थः। तत्रापि तादृशकपालादावपि तद्व्यक्तिद्वारा तद्घटव्यक्तिद्वारा। तत्तद्घटप्रागभावव्यक्तिद्वारा न
चैवं तद्व्यक्तित्वेन तद्घटव्यक्तिभानेन तत्प्रागभावत्वेन भानं न स्यात् तद्व्यक्तित्वस्य तद्घटवृत्तिरूपाद्यात्मकतया तीतत्वात्। किं च ता
२२५ दृशपरंपरासंबंधेन घटत्वादेर्ज्ञाने कथं तत्प्रागसत्त्वमत = आह। एतदस्वरसेनैवेति। उक्त पदार्थातिरिक्तत्वस्या
नभ्युपगमाद् न्यायाभ्याचष्टे। = अतिरिक्तेति। तादृशं तदिंद्रियजन्यं प्रत्यक्षं सामान्यज्ञानं तदात्मिकेत्यर्थः। नवीनमतमाह। उ
235 तीतेति। आदिनाऽनागतपरिग्रहः। सामान्यज्ञानं सामान्यज्ञानमात्रं। न तु तदिंद्रियजन्यत्वं तदिंद्रियसंबद्धेत सामान्य
प्रकारकत्वं वा विवक्षितमित्यर्थः। इत्थं च स्मरणात्मकं निर्विकल्पकात्मकं वा सामान्यज्ञानमप्यत्र तत्प्रत्यासत्तिरिति
ध्येयं। तद्वैज्ञात्यतिप्रसंगवारणाय। = अपेक्षणीयं चेति। तदिंद्रियकरणकेति स्वरूपकथनमात्रं। त्वाचादिसामग्र्यां चा
क्षुषादिकं प्रतिसामान्यत एव विरोधित्वेनैवानतिप्रसंगात्। वस्तुतस्तु सामग्रीपदं = असाधारणकारणपरं। न तु फलो
पधायकपरमत एवात्रांतरमिति। सामान्यज्ञानातिरिक्तेत्यर्थः। तथा च तादृशचाक्षुषादिहेतुसामान्यालोकादीनां समव
धानमपेक्षितं तेषां हेतुत्वं च तेन तेन रूपेण चाक्षुषादिज्ञाने क्लृप्तमित्याशयेनैव तदिंद्रियकरणकेत्यत्र व्युत्पत्तिपंतयं २२५

ऽपत्र च सुरभि चंदनं घटाभाववद्भूतलमित्यादिचाक्षुषे सौरभत्वेन घटत्वेन च निखिलानां सौरभाणां घटानां च यदि वि
[redacted]षयतानुभवविलक्षणज्ञानतद्धर्मप्रकारकलौकिकचाक्षुषसामग्रीतद्धर्माश्रयचाक्षुषादिहेतुत्वेन न वाच्यालौ
किकत्वं तद्धर्मप्रकारतानिरूपितविशेष्यतायदंशे तदंशे ध्वंसे तेन यत्किंचिद्विशेष्यांशेऽलौकिकत्वाद्यापि प्रत्यक्षस्य ह
निखिलसामान्याश्रयविषयकत्वमुपपन्नं वस्तुतो बहिरिंद्रियस्य स्वयोग्यमुख्यविशेष्यांशे केन जनकत्वरूपस्य सण
य सौरभत्वेनोपनीतसौरभमुख्यविशेष्यकचाक्षुषज्ञानवारणाय सौरभत्वेन सौरभमुख्यविशेष्यकचाक्षु
कं प्रति सौरभत्वविशिष्टलौकिकचाक्षुषसामग्रीत्वेन हेतुताया व्याप्तत्वाच्च तावतैवातिप्रसंगभंगे सामान्यज्ञानं प्र नतिप्रसंगे
तितद्धर्मप्रकारकबोधसामग्रीहेतुतायां न लौकिकत्वस्य निवेशः। सुरभि चंदनमिति चाक्षुषे पूर्वानुपस्थितसौर
भाणां विशेषणत्वासंभवात् सौरभत्वसामान्यजज्ञाने मुख्यविशेष्यत्वस्यैवासंभवात् सौरभत्वविशिष्टलौकिकचा [illegible]
क्षुषसामग्र्याश्चन्दनं सौरभमिति चाक्षुषभ्रमदशायामेव सुप्रसिद्धत्वान्न च येन नातीन्द्रियमात्रवृत्तिना धर्मेण कदा [illegible]
पि न तो हृष्टो भवति तत्राप्रसिद्धा तादृशकार्यकारणभावस्यैकल्पनादुपनीततद्धर्माश्रयविशेष्यकालौकिकचाक्षु

स्य कथं कारणमिति वाच्यं । न च तेन रूपेण तद्भानोत्र प्रविशेष्यक चात्तुष ५

भा. र्वस्यापाद्यस्यापि संनिकर्षेरिति दिक् ।। ज्ञान एव तु न्नसामान्य ।। अपेक्षणीयत्वादेव । सौदामिनीति ।। आलोकसंयोगोत्तरकाला
२२६ सत्वप्रतिपत्तये तदिंद्रियजन्यत्वसंपादनाय वोक्तं ।। चरमं । सौदामिनीसंनिपातजनितचक्षुर्जन्यांत्य द्रव्यत्वप्रकार
236 कज्ञानोत्तरं ।। आलोकापेक्षयैव चरमत्वं किंचिद्द्येव चक्षुर्लौकिकसन्निकर्षस्यापि सत्वदर्शितं निर्विकल्प इति द्रव्यत्वसामान्यल
क्षणमधिकृत्य ।। अननुव्यवसीयमानस्य द्विविधासात्कारस्य स्वीकारे बलवत्तरबाधकाभावादाह अथैवं तमन्तरेति सौ
दामिनीसंपातजनितस्य सस्मापितदिंद्रियजन्यत्वान्नाहदशावाचक्षुर्धारावाहएवापाद्यत्वात् । न चैवं तदानुभवविरोधमि
तिभावः ।। नन्वस्याज्ञानात्मिकत्वे ज्ञानलक्षणातो । भेद इत्यत आह । इयं चेति धर्मिणं यदुर्मविषयकं ज्ञानं तदाश्रया
णां इतरा । ज्ञानलक्षणा ।। अतएव ज्ञानलक्षणातएव । ननु सामान्यलक्षणातः सौरत्वस्य स्वरूपत एव प्रकारत
यातद्विधर्मस्य ज्ञानात्सामान्यलक्षणयाभितज्ञानासंभवात् । नवीनमते सर्वांत्मिप्रत्युत्थाविशेष्ये लौकिकसन्निक
र्षस्यानपेक्षणात्तसौरभस्य सामान्यलक्षणया विभानसंभवान्नदोनापर्यंतानलक्षणया ।। अनावश्यकत्वात्सौ
रभत्वपर्यंतानुधावनं ।। अपिकारेणाव नु स्मृतज्ञानरजतत्वप्रकारकशुक्तिस्मरणमूलके रजतवृदित्याकारके

२२६

२२

उपनीतभाने शुक्तेरपि भानेन संमुखितं तत्र शुक्तित्वविरित्रिधर्मस्याज्ञानेन सामान्यलक्षणयाऽसंभवादिति।
ध्येयं चेदमत्र घटत्वसंयोगजन्यस्य विषयकज्ञानाजन्यघटप्रत्यक्षं प्रति घटत्वज्ञानत्वेन न हेतुता। अन्यत्वज्ञाना द
पितत्वेन तत्वोदयात्। घटत्वातिरिक्तघटवृत्तिधर्मज्ञानाजन्यत्वेन विशेषितेपि घटत्वद्रव्यत्वोभयसमूहालंबन
शान ज्ञानजन्यस्थले एवं तादृशधर्मत्रयजन्यस्थले च परापरकार्यकारणभावस्यानंतस्य कल्पनापत्तेस्तस्मात्
घटत्वप्रकारकघटप्रत्यक्षं प्रति घटत्वज्ञानत्वेन हेतुतेति घटत्वनिर्विकल्पकोत्तरं चक्षुःसंयुक्तघटस्य प्रत्यास
त्तिदशायां नैवग्रहे बाधकाभाव इति ज्ञानलक्षणयास्तु तद्वृत्तिधर्मप्रकारकतद्रूपेंद्रियसंयोगजन्यतद्घट
प्रत्यक्षं प्रति तद्घटत्वेन हेतुताप्येतद्येन संबंधेन तद्घटवृत्तित्वं धर्मांशे तेन तेन संबंधेन तद्वृत्तेतदप्रकारकत्व
बोधं। तेन प्रमुष्टनज्ञानकस्य समवायेन घटत्वप्रकारकतद्घट स्मरणाजन्यतद्घटोपनीतभानस्य कालि
कसंबंधेन तद्घटवृत्तित्वपरत्वसमवाये न तत्प्रकारस्यापि ज्ञानस्य नासंग्रहः। एवं विषयांतरेप्यूह्यं। लायन्ना
दाहवह्निमदन्येति। केवलान्वयिसाध्यकपक्षाया हवह्निसंबंधितेति। ननु गृहीतं यत्तादृशमहानसीयवह्नि

भा.
२.३१

समानाधिकरणवृत्तित्वविशिष्टधूमत्वं तन्न पर्वतीयधूमेऽस्त्यत उक्तमेकैव चेति । तथा च तादृशवृत्तित्वोपलक्षि-
तं धूमत्वमेव व्याप्तिस्तच्च पर्वतीयधूमेऽप्यविकलमिति भावः । सामानाधिकरण्यरूपव्याप्त्यभिप्रायकत्वे दोषमा-
ह । व्याप्तिर्नानात्वे इति । तत्र पर्वतीयधूमे । ननु शाब्दानुभवशाब्दस्मरणयोः समानप्रकारकता[illegible]णहे-
तु हेतुमद्भावे स्मृत्यनुभवयोर्विषयस्याभिस्मृतिविषयत्वे बाधकाभावात् स्मृतेरगृहीतग्राहित्वापत्तिरत उक्तं हा । शा-
ब्दानुभवेति । हेतुं प्रयोजकं । तेन शाब्दानुभवस्य शाब्दबोधं प्रति हेतुत्वाभावेऽपि न क्षतिः । पदार्थस्मृतिव्या-
पारकत्वेन हेतुत्वात् पदज्ञानमिव शाब्दानुभवोऽपि हेतुरिति कश्चित् । तथा च शाब्दबोधं प्रति पदानुभवयोर्हेतु-
त्वं तदेव दृष्टान्तीकृतमिति भावः । एवं समानप्रकारकत्वेन शक्तिज्ञानस्य शाब्दहेतुत्वांगीकारे जाति-
शक्तिरिति । समानप्रकारकत्वेन हेतुत्वे व्यक्तावपि शक्तिस्वीकारात् । ज्ञानस्य तथा शक्तिज्ञानस्य भ्रमत्वापा-
तात् जातिविषयत्वेनैवेति । ननु शाब्दबोधविषयीभूतव्यक्तावपि शक्तिग्रहः आवश्यकत्वाय इत्येवकारा-
र्थः । जातिविषयत्वेन । जातिप्रकारकत्वेनात एव तादृशविशेषणे जरदभिव्याप्तिरिति वस्तुतस्तदर्थश्च ज्ञाने त्या-

२३१
३८

प्रकारक

त्र ज्ञाने। न्वेति। तथा च जातिप्रकारकज्ञानविषयः शक्तिर्व्यक्तिमनुभावयतीत्यर्थः। तथा च गोत्वप्रकारकशक्ति
ज्ञानत्वेनैव हेतुतेत्यर्थः। एतेन गोपदं गोत्वे शक्तमेवं शक्तिग्रहे समानप्रकारकत्वविरोधः। गोशक्तं पदं गौः शक्येति वा क
शक्तिग्रहे जातिविषयकत्वज्ञानानुपपत्तिः शक्तिग्रहस्यैव गोत्वप्रकारकत्वात् शक्तौ तत्प्रकारकज्ञानानुपपत्तिः स
बंधविषयाणां गोपदीयार्थत्वाकारेण शक्तिग्रहं गोकारे तु नितरामेवेति दूषणं निरस्तं। पश्वादीति। निय
तसंस्थानव्यंग्यस्यैव तन्मते जातित्वात् दुष्टे अवसिते जसेवत्तित्वेन पृथिवीत्वेन संकरात् न पशुत्वं जातिः किंतु लो
मवल्लांगूलवत्त्वमिति भावः। पृथिवीत्वादिव्याप्यनानापशुत्वस्यैव शक्यत्वे त्वाह। लिङ्गादीति। कार्यत्वेन घटादावे
व शक्तिग्रहे योग्यताबलाद् दृश्यव्यक्तिलाभसंभवस्य प्रमाणत्वादिति भावः। ननु लिंगसंविज्ञानं बहुव्रीहिमप्युपपा
दयति। परेत्विति। परे नैयायिकाः प्रकृतावच्छेदकेति। पर्वतो वह्निमानित्यनुमितौ पर्वतत्वस्यापि विशेषणत्वादिति
भावः। ननु संयोगित्वस्य संबंधविषयाभानसंभवे पि अभावत्वाप्रकारकाभावप्रत्यक्षस्यानुभावादनुप
स्थितमेवाभावत्वं प्रकारो। नापत्यास्त्वाकरणीयः। तत्र सामान्यव्याप्तेर्व्यभिचारो सत्वतत्त्वानुगमस्ते त्वत।

भा॰ २२८ २३४

व्यभि॰ तादृशहेतुमानित्याद्याकारकं तादृशे एवं हेत्वादिना व्याप्यादिग्रहः ॥५

चाहाव क्तीति ननु यत्र गुंजापुंजे वह्नित्वप्रकारकव्याप्यत्वग्रहस्तत्र तदधीनानुमितौ वह्निमानार्थमुक्तकार्यका
रणभावबलात् सामान्यलक्षणातं भवेपि विशेषांतरे व्यापकताग्रहाधीन पर्वतोयं वह्निमाननुमितौ नसाऽऽपत्तिरंतर
ज्ञानजन्यत्वेनैव सिद्धसाधनादाहातद्वक्तीति ननु विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयो हे
तुत्वे दंडमानित्यनुमितौ विशेषणतावच्छेदकीभूततद्व्यक्तदंडभानार्थं सामान्यलक्षणास्यादत आह वि
शिष्टवैशिष्ट्यादिति । विशेषणतावच्छेदकादीनामित्यादिना विशेषणविशेष्यपरिग्रहः । व्यापकताग्रहः । अ
ल क्तिग्रहश्चेतेन रूपेणानुमितौ शक्तश्च हेतुरित्यर्थः । ननु युगपद्विशेष्यविशेषणादिसन्निकर्षे सत्यपि दंडो रक्तो
न वेति संशयानंतरमजायमाने रक्तो दंड इति निश्चयानंतरं जायमाने रक्तदंडवानिति विलक्षणबोधेऽन्वय
व्यतिरेकाभ्यामवश्यं विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वं कल्पनीयमत आह । अन्यथेति । विशेष
णत्वस्यैकस्याभावात् दंडमानिति बुद्धौ दंडत्वेन पत्त्वेऽपि दंडप्रकारकधीत्वेनैव हेतुत्वात् रक्तदंडप्रकार
कज्ञानाभावेपि न क्षतिरिति भावः । तत्र हस्यलक्षणेनोक्तसंशयदशायां तच्चाक्षुषाभावादुक्तकार्यकारण २२८

८ ३९

भावकल्पनं इत्याशयेन प्रत्यक्षइत्युक्तं। कार्यतावच्छेदकं विशिष्टवैशिष्ट्यबोधत्वमेवेति ध्येयं। तेन रक्तो दंडी
न वेति संशयोत्तरं रक्तो दंडइत्यवांतरवाक्यार्थबोधं विनैव रक्तदंडवानिति विशिष्टवैशिष्ट्यशाब्दबोधापत्तिरि
ति निरस्तं। विशेष्यज्ञानादीत्यादिना संबंधज्ञानपरिग्रहः। एतेन मानाभावेन। ननु घटत्वसामान्यलक्षणा
जन्यज्ञाने ऽतीतानागतघटादेरपि विशेष्यत्वात्तत्तद्ज्ञानसंयोगासंभवाद्विशेष्यज्ञानं व्यभिचारीत्यत आह
।जन्यतांचेति। निर्विकल्पकेति। अज्ञाते सामान्याश्रये तत्सामान्यवैशिष्ट्यानवगाहि। नन्वेवं प्रमेयत्वसामान्य
लक्षणया विश्वगोचरनिर्विकल्पकजननेन सर्वज्ञः स्यादत आह। सार्वज्ञेति। यद्यप्येतादृशसार्वज्ञस्वी
कारे क्षतिविरहः। नच संशयानुपपत्तिः इदंत्वावच्छेदेन घटत्वादिनिर्विकल्पेऽपि घटो न वेत्यादिसंशयविरोधित्व
स्य तत्संशयजनकदोषवशेन प्रतिबंधात्। तथापि तितिलजातीयं प्रमाप्रकारकनिर्विकल्पज्ञानादिप्रका
रकज्ञानापत्तिः सामग्रीसत्वात्। नचैतदनुभवसिद्धमिति भावः। यत्तु घटत्वस्यैव घटत्ववृत्तिधर्मितामपि
निर्विकल्पके न विषयीकरणात्। यदा घटे घटत्वावगाहि तदा घटत्वेऽपि तद्वृत्तिधर्मावगाहनमतो घट

गा त्वांशेऽन्याप्रकारकघटत्वप्रकारकज्ञानासंभवइ विरुद्धसार्वत्रापादनमितिचेन्नायं घटत्वांशेऽन्याप्र
कारकघटत्वज्ञानेप्रति घटत्वांशेऽन्याप्रकारकघटत्वज्ञानस्य हेतोरसंभवेन तादृशज्ञानोत्पत्तौ विलक्षणा
२२८ पिदुर्वारत्वात् अन्यथा जातिमान् घट इति प्रत्यक्षं न स्यात् न स्याच्च योगिनामपि सार्वज्ञमिति दिक् तस्याः सा
मान्यलक्षणायाः तदजनकत्वे निर्विकल्पकाजनकत्वे तत एव स्वरूपैक्ये व्यभिचारादेव तद्विशेष्यज्ञानं न
मुडी तु अप्रसिद्धधर्मेऽपि संशयो नानुपपन्नः धर्मिज्ञानस्य संशयहेतुत्वाभावादत आह धर्मिज्ञानस्येति संशय
एवेति विशेष्येन्द्रियसन्निकर्षस्य प्रत्यक्षहेतुत्वादिति भावः धर्मिभानार्थं धर्मिविषयतार्थं वा सामा
न्यलक्षणा ननु सामान्यलक्षणां विनापि धर्मितावच्छेदकत्वप्रकारकज्ञानादेव तत्तद्धर्मिणां संशय
विषयतास्यात्तथा च ज्ञानलक्षणयैवोपपत्तिरत आह अविवादादिति ऽपि इदं दूषयति तदसदिति यद्य गा
पि घटत्वप्रकारकज्ञानत्वेन प्रत्यासत्तितायां विवादस्तथापि घटत्वप्रकारकज्ञानोत्तरं निखिलघटप्रत्य
क्षस्य फलस्यासंप्रतिपत्तौ तत्प्रत्यासत्तिताय घटत्वज्ञानत्वेन घटत्वप्रकारकज्ञानत्वेन वा स्यादित्यत्र नास्मा २२८

कमाग्रह इतिभावः। अथ कश्चित्। स्वरूपसत्त्वरीश्वरज्ञानमेव विषयतया सर्वत्र प्रत्यासत्तिरस्तु घटत्वपटत्वा
दीनां बहूनां तथात्वे गौरवात्। तस्याश्च सप्रकारकत्वाश्रयप्रत्यक्षत्वे स्वाश्रयविशेष्यकप्रत्यक्षत्वं वा उपनीतभा
नलौकिकप्रत्यक्षसाधारणमेव कार्यतावच्छेदकमतो न निर्विकल्पकोत्पादेन सार्वज्ञापत्तिः न वा उपनी
तभानादिव्यावृत्तिकतदन्यत्वादिप्रवेशो कार्यकारणभावस्यानन्त्ये लाघवान्नवकाश इति। इत्थं च घटत्वांशे
न्यायप्रकारकघटत्वोपनीतभानस्थले घटत्वस्याविशेष्यत्वात् तत्प्रत्यक्षोपपत्त्यर्थं ज्ञानलक्षणापि स्वीकार्येति
पदाच यदिंद्रियजन्ययद्धर्मप्रकारकज्ञानसामग्री तदा तदिंद्रियजन्यतद्धर्मप्रकारकस्वाश्रयविशेष्यकं प्रतीतिं
जनयति अतो न घटत्वादिप्रकारकप्रत्यक्षकाले पटादीनां साक्षात्कारापत्तिः। न वा सौरभत्वगंधत्वाद्युपस्थितौ र
तो गंध इति चाक्षुषज्ञानापत्तिः। न च घट इत्याकारकप्रत्यक्षकाले घटत्वरूपेणैव विश्वविशेष्यकप्रत्यक्षापत्तिः
सति दोषे इष्टत्वात्। असति तु तस्यैव कारणस्याभावात्। अन्यथा प्रमेयत्वादिना ज्ञानकाले विश्वविशेष्यकघ
टत्वादिप्रकारकप्रत्यक्षस्य तवापि दुर्वारत्वादिति। तन्न साधीयः॥ विनिगमनाविरहेण मिथेयत्वादीनां चास

ऽ [illegible] १

सा॰मा॰

प्तितायादुर्वारित्वात्। स्वपटत्वज्ञानेनापि समं विनिगमनाविरहात् तस्यान्वयव्यतिरेकानुविधायितया हेतु-
मा त्वस्यावश्यकत्वादिति। धर्मत्वेनाधर्मत्वावच्छेदेनात् धर्मत्वेनाधर्मत्वसामानाधिकरण्येन" असिद्ध इति। धर्-
मत्वावच्छेदेन तदभावनिर्णयस्य सामानाधिकरण्येन संशयेऽप्यविरोधित्वादिति भावः। द्वितीय इति। धर्म-
२५० त्वसामानाधिकरण्येन व्याप्तिनिश्चये धर्मत्वसामानाधिकरण्येन व्यभिचारसंशये बाधकाभावादिति भाव-
२५० ग्रहस्यैवैतेन प्रकारेण धर्मत्वसामानाधिकरण्येन व्याप्तिग्रहव्यवच्छेदः। तद्विरोधितया। धर्मत्वसामानाधि-
करण्येन व्याप्तिसंशयविरोधितयाप्यसः। धर्मत्वसामानाधिकरण्येन व्याप्तिसंशयः। तथाच शसिद्धधर्मएव
धर्मत्वेन व्याप्तिसंशय इति भावः। अन्यथा समानविषयकत्वमात्रेण प्रतिबंधकत्वे। पृथिव्यादाविति। पृथिवी-
रूपं वायुत्वाभावव्याप्यं जलरूपं वायुत्वाभावव्याप्यं तेजोरूपं वायुत्वाभावव्याप्यमित्याकारेणेत्यर्थः। तत्र व्याप्ति-
ग्रहविषयातिरिक्तस्य धर्मांतरस्यासत्वात्संदेहोपपादनेऽप्यत्र व्याप्तिग्रहविषयेऽपि पृथिवीजलतेजोरूपेभ्योऽन्य-
द्रूपांतरं नास्तीति ज्ञानं संदेहः स्यादिति भवतु पक्षे मः इति। समानविषयकत्वेन विरोधित्वमभ्युपेत्याह। अथ २५

नैवा

तिरिक्तसंभावनया। प्रसिद्धरूपातिरिक्तं रूपं न वेति संभावनया। तथा गृहीतव्याप्तिके ऽप्येवंरूपे पुरूपे वा पुरुषत्वाभावव्या
प्यं न वेति संशयः। तन्न्वेवं गृहीतव्याप्तिके ऽप्येवं धूमे पुरुषत्वावदतिरिक्तो धूमो न वेति संभावनया। धूमो वह्निव्यभि
चारी न वेति संशयः स्यात्। तथा च बहुसामान्यलक्षणावैनाऽस्य इत्यत आह। विशेषतरेति। विशेषतो घटत्वपटत्वा
दिना। विशेषदर्शनं रूपत्वाभावनिर्णयः। अतिरिक्तान्तरेति। अनुपस्थितातिरिक्तेत्यर्थः। सामान्यलक्षणा
रूपेण स्थिति। रूपं पार्थिवाप्यतैजसभिन्नं न वेत्येवंरूपेत्यर्थः। विशेषदर्शनात्। पार्थिवाप्यतैजसभिन्नत्वाभावदर्श
नात्। नापीति। पार्थिवाप्यतैजसभिन्नं रूपं न वेत्याकारेत्यर्थः। विशेषतो निर्णयः। मानाद्रूपादय इति। रूपकर्मसा
मान्यविशेषसमवायाभावा इत्यर्थः। ननु संशयस्य धर्मितावच्छेदकतद्घटितरूपेण तद्धर्मिनिर्णयः संशयविरो
धी। अत एव धूमो वह्निव्याप्यो न वेति संशये तद्रूपत्वेन निर्णयो विरुद्ध इत्यत आह। तत्संभावनाया धर्मितावच्छेदकं
प्रसिद्धरूपभिन्नत्वं तद्घटितरूपेणैतद्धर्मिणो निर्णयात् संभावना स्यादेवेत्यत तत्तदनुपेत्योपपादयति। प्रसिद्धे
ति। प्रसिद्धेतररूपभिन्नं न रूपं परन्तिग्रहे संशयायोगादाह। रूपभिन्नमिति तद्घटितधर्मावच्छेदनविशिष्टापि निर्णी

त्वतेतस्मात पार्थिवाप्यतैजसभिन्नं रूपं न वेत्यादि

भा.
२४१
२५१

यन्माह । रूपवं रसादि वेत्तीति तथा च प्रसिद्धरूपभिन्नं द्रव्यं रसादिवान्न रूपमित्यर्थः । तादात्म्येन रूपकोटिकसंभाव
नायां रूपभेदनिर्णयं बाधकमुक्त्वा रूपत्वकोटिकसंभावनायां तदित्यंतताभावनिर्णयं बाधकमाह । रूपत्वेति । तस्या
रू ः संभावनायाः । ननु तदानीं संशयो न भवत्येवेत्यत आह । तदानीमिति । तादृशविशेषदर्शनकाले इत्यर्थः । उत्कटेति ।
रूपत्वायुत्वाभावव्याप्यं न वेत्याकारेत्यर्थः । ननु संशयस्य वेदनुभूयते तदा तज्ज्ञानकदोषप्रतिबंधात् संशयविष
यीभूतधर्मास्वीकृतविशेषदर्शनानाम विषयद्रव्येव फलबलात्कल्प्यत इत्यत आह । अतिरिक्तेति । गौरवेणेति
रूपत्वावच्छिन्नव्याप्तिनिर्णयाभावमपेक्ष्य प्रसिद्धरूपातिरिक्तं न वेत्याद्यतिरिक्तसंभावनाविरहस्य लघुत्वात्तन्न
रूपधर्मिकव्याप्तिनिर्णयाभावकारणतायां गौरवेणेत्यर्थः । प्राचां मतमाशंकयति । यत्विति । सामान्य
लक्षणा । तत्प्रतियोगीति । सामान्याभावप्रतियोगीत्यर्थः । सामान्याभावभाने तत्कारणीभूतस्य तत्प्रतियो
गिसन्निकर्षार्थं वा सामान्यलक्षणा न्याय्यस्माह । नहीति । तत्र नैयायिकस्य मते । सामान्यलक्षणया ज्ञेयत्वा
तानार्थं सामान्यलक्षणं तद्विषयीभूततत्प्रतियोगि १

२४१

दिनाननुगतलौकिकप्रत्यक्षे तत्कारणमत आह इदंत्वादिनेति। ननु अभावत्वप्रकारकलौकिकप्रत्यक्षे तत्का
रणमत आह मानाभावादिति। ननु तत्प्रतियोगिकाभावत्वमेवेदंत्वं तथा च तत्प्रतियोगिकाभावभाने कथं प्र
तियोगिधियो व्यभिचार इत्यत आह रूपतएवेति। यतः एवं तेऽभावत्वं नेदंत्वं किंतु स्वरूपेण तत्तदभावव्यक्तिः भा
न विशेषो वा। तएवेत्यर्थः। तमोभिन्नेदंत्वेन भानेऽपि वादान्तमसीतिपर्यंतं। तदयोग्यत्वे अभावत्वसंशयाद्ये
 ग्रानानुभूतत्वे घटवत्त्वभ्रमकाले नास्तीति बुद्ध्यनुपपत्त्यापत्तिघटत्वस्यावच्छेदकत्वानवगाहिनः घटप्रतियो
गिकोऽभाव इत्याकारकस्य नेत्याकारकस्य वाभावानुभवस्यापत्तेः अतः इंद्रियसंबद्धविशेषणतायाः कार्यतावच्छे
दकं तत्तत्प्रतियोगित्वावच्छेदकावच्छिन्नप्रतियोगिकत्वावगाह्यभावप्रत्यक्षत्वं इदंत्वप्रकारकाभावप्रत्यक्षत्वं च।
नानेवं तथा च घटत्वावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षत्वावच्छिन्नं प्रति घटत्वरूपेण घटज्ञानं कारणमित्ये
वपर्यवसितं। न चात्र व्यभिचार इत्यत आह प्रतियोगीति। तज्ज्ञानं अभावभानं विशिष्टवैशिष्ट्येति। घटत्ववि
शिष्टवैशिष्ट्यबोधे घटत्वप्रकारकज्ञानं कारणं तेन निर्विकल्पकानंतरं विशिष्टवैशिष्ट्यबोधनिरासः। न

भा. २५२

तु तत्र घटविषयत्वमपेक्षितं कुतो यावद्घटविषयत्वमिति भावः। द्वितीये त्वाह। सकलेति। तस्या सामान्याभावभा
नेत्याह सर्वेषां कारणतावच्छेदके घटविषयत्वस्यानिवेशमभ्युपेत्याह। प्रतियोगिज्ञानस्येति। ननु तद्घटस्य विशिष्टा
भावविरहित्वावच्छिन्नाभावादिसाधारणतद्घटप्रतियोगिकाभावत्वसत्वावच्छिन्नं प्रति तद्घटज्ञानत्वेन हेतुताया
टसामान्याभावस्तत्तद्घटानामभाव इति तत्तस्य तत्तद्घटानां ज्ञानं कारणमतो यावत्प्रतियोगिज्ञानमपर्याप्तं तस्मा श्रं
कतेत्येनचेति। तदभावेति। तत्प्रतियोगिकाभावेत्यर्थः। नन्वायं सिद्धान्तेऽपात्याह। ध्वंसेति। घटध्वंसो घटतत्प्रागभाव
तदत्यन्ताभावानामभावः घटध्वंसकाले घटो नास्ति घटप्रागभावो नास्ति घटात्यन्ताभावो नास्तीति बुद्धीनां घटध्वंसे
नैवोपपादनात् एवं घटप्रागभावो घटतत्ध्वंसतदत्यन्ताभावानामभावः एवं घटात्यन्ताभावो घटतत्प्रागभावघ
टध्वंसानामभावः। एकैकप्रतियोगिज्ञानादेव गृह्यत इत्यर्थः। ननु तन्मते ध्वंसप्रागभावयोरत्यन्ताभावेन सह वि
रोधाभावात् कथमेतदत आह। अभ्युपगमाद्वेति प्राचीनैरिति शेषः। ननु स्वपरप्रकाशकया वत्तेजःसंसर्गाभा
वो धकारो यावत्तेजो ता नैव न सामान्यलक्षणं विनेति तदर्थसांगत्य कार्यत्वात आह। अंधकारत्वेति। तेजो विशे
षेति। स्वपरप्रकाशकत्वार्थः। सामान्याभाव इति। ध्वंसप्रागभावाधिकरणे किन्तु सामान्याभावस्य प्राग्भवत्स्या वि २५२

२ यावत्तेजोज्ञानादेव गृह्यते

तत्वादिति भावः॥ यावत्वं=अभावविशेषणमात्रं व्यनिराकृतं ता। नाभावेति। व्यधिकरणतेजसां प्रागभावध्वंसव्य
तिरेकासंभवादिति भावः॥ ननु यत्र यावत्तेजोभाववत्तमो व्यवहारस्तावंत एव तत्रांधकारपदार्थ इति किंच
का वत्वं प्रतियोगिविशेषणमेव तथाच यथा वत्रेजसां तत्र यत्किंचित्वेनाभाव एवांधकार इत्यत आह। अननुगमादिति।
ननु अनुगतसत्वप्रतियोगिनिरूप एवेत्यत आह। गौरवादिति। एकस्य सामान्याभावस्यांधकारप्रतीतिविषयत्वकल्पना
पेक्षया यावदभावे तत्कल्पने गौरवादित्यर्थः॥ ननु यावदभावग्रहे कथं तमोग्रहः सत्वे यावदभावोपि न तत्प्रतीतिविष
यत्वमावश्यकमत आह। तेजोविशेषत्वेति॥ अयं नाभावग्रहे व्यधिकरणतेजसां ध्वंसप्रागभावग्रहे वा तदधिक
रणवृत्तनेन तेजोव्यक्तीनां तत्र घटितत्वेन ग्रहस्यावश्यकत्वादिति। नचैवं तत्वेनाभावग्रहे तदधिकरणवृत्तितेज
स्त्वादिना ग्रहः संभवति प्रागभावध्वंसग्रहे च तेजस्त्वेन तत्कालावच्छेदेन तदधिकरणवृत्तितेजस्त्वेन वा प्रतियोगि
ज्ञानं संभवति न चेन्द्रियसंबद्धविशेषणतायाः तत्र प्रतियोगितावच्छेदकावच्छिन्नाभावप्रत्यक्षत्वमेव कार्यता
वच्छेदकं अतः कथं तेजस्त्वादिप्रकारकतोन्नात्प्रागभावादिप्रत्यक्षमिति वाच्यं=अयं नाभावे इंद्रियसंबद्धविशेष

भा.

२४२

णतायाएवतत्प्रागभावात्। अतएवइहेदानींघटध्वंसइत्यादिप्रसक्तघटत्वावच्छेदेनैवतद्घटध्वंसप्रत्यक्षंसंसर्गतुभवति
द्रुमतः। आहातेजःसामग्र्याइति। तेजःप्रागभावस्यतेजःसामग्रीघटकत्वादंधकारप्रत्यक्षकालेचतदधिकरणेतेज
उत्पन्नेरनावश्यकत्वादितिभावः। ननुमास्तुयावत्प्रतियोगिज्ञानंप्रभावप्रत्यक्षेकारणंतथापिप्रागभावप्र
त्यक्षेतुरोधात्सामान्यलक्षणायास्त्यतितत्रानागतघटस्यैवप्रतियोगित्वेनतज्ज्ञानस्यापिसंभवादित्याशंक्याह नव्या
विशिष्टवैशिष्ट्यमर्यादांनातिशेतेइतिक्रमेणसमाधत्ते। प्रागभावेति। घटत्वादीति। इदंचातिप्रसक्तघटत्वावच्
छेदेनापिप्रागभावस्यप्रत्यक्षमितिमदुक्तदिशावगंतव्यं। तच्चानागतघटगोचरप्रागभावप्रत्यक्षमनागतघट
सन्निकर्षंविनानस्यादतस्तत्रज्ञानरूपसन्निकर्षार्थमेवसामान्यलक्षणेत्याशंकतेअथेति। घटोभविष्यतीतिप्र
घटत्वस्यविशेषक घ्रणीदप्रत्यक्षंनबहिरिंद्रियेणउपनीतमुख्यविशेष्यकज्ञानजननेतेषामसामर्थ्यात्। नमनसातत्सामग्र्या
व्यंजकत्वोपवर्णनविरोधात्। तथापिघटविशेषणकप्रागभावमुख्यविशेष्यकलौकिकप्रत्यक्षमेवानेनो
क्तमित्याशयः। प्राचीनाः तत्प्रत्यक्षकालीनध्वंसप्रतियोगिकालवर्तिनःतत्प्रतियोगिनः। तादृशप्रत्यक्षविषयप्राग २४२

नवेत्यादिना२

लौकिकप्रत्यक्ष... ४४

भावप्रतियोगिनः॥ ननु प्राचीनादेव ध्वंसप्रतियोगित्वेन भावत्वं तन्मत इत्यत आह। तत्प्रतियोगित्वेति। स्वतन्त्रेति। विशिष्टबु-
द्धिं प्रति विशेषणधियो हेतुत्वाभिप्रायेण। तथा तु सामान्यलक्षणया ध्वंसप्रागभावप्रत्यक्षेऽनागतघटस्य भान-
संभवादिति ध्येयं। तन्त्वनागतन्तत्। प्रागभावप्रत्यक्षं। प्रागभावस्य प्रत्यक्षमेव नास्तीति आशंकते। न चेत्या-
दिना। कालादिघटितसामग्र्या व्यंजकत्वे मानाभावादाह। चरमेति। अन्यदा चरमकारणभावदशायां
स्वरूपेण सामग्रीत्वेनाव्याप्यत्वेन प्रागभावव्याप्यत्वेन गृहीतायाः इति। कपालादाविति शेषः। अन्यथा हेत-
नीकपाले घटप्रागभाव इति नियताधिकरणप्रत्यक्षानुदयात्तत्प्रागभावप्रसंगधर्मिताज्ञानमपि संपादितं तद्ग्राह्यत्वं। व्यं-
जकत्वं। तद्धेतुका। व्याप्यत्वज्ञानहेतुका। कपालादौ प्रागभावव्याप्यत्वेन सामग्र्याग्रहात्तदनुमितिरेव स्यात्। अनुमितिसा-
मग्र्याः सत्त्वादिति भावः। ननु समानविषये लौकिकसामग्र्या बलवत्त्वात् प्रत्यक्षमेव स्यात्। अतः प्रत्यक्षसामग्र्यभाव-
माह। तावत्कालमिति। तावत्कालीनव्याप्यत्वग्रहकालपर्यन्तं। असत्त्वेनेति। लौकिकप्रत्यक्षे विषयस्यापि हेतुत्वाद-
लौकिकप्रत्यक्षसामग्र्याः सर्वापेक्षया दुर्बलत्वादिति भावः। तदुद्धरेवेत्येव कारणकारणकपालघटितप्राग-

इति प्रत्यक्षमाहात्म्यते नाग्रहे विधिप्रागभावप्रत्यक्षसंज्ञादिसर्वः॥१६

भा०

भावव्याप्यत्वमुक्तं व्यवच्छेदः । न च वृक्षकपालद्वयसंयोगादिरूपतत्कारणीभूतकपालद्वयसंयोगत्वादिना ज्ञानस्य का
रणत्वे प्रतिबन्धसंग इति वाच्यं । कार्यप्रधानव्याप्यत्वेन ज्ञानस्यैव व्यंजकत्वादित्याह । कार्येत्यादि दोष इति । तत्र कार्योत्पा
नव्याप्तिरित्यत्रेतु: लक्षणेऽन्तर्भावेन व्याप्तौ तत्प्रागभावस्य सत्त्वमादाय प्रसिद्धिर्भवतीति न विषयाभावात्तस्य ज्ञानासं
२४४ भव इति । ननु विनिगमनाविरहात्प्रागभावव्याप्यत्वज्ञानमेव किं न व्यंजकं स्यात् । एवं च प्रागभावस्य सत्त्वस्याप्युप
मितिविषयीभूतप्रागभावस्य तत्त्वं निर्वचनीयम् अकारणत्वकल्पनायां गौरवादनुमितिरेव प्रागभावस्येत्याशंक्य
सत्त्वस्य ज्ञानमन्तरेणानुमितिरेव न संभवतीत्याह प्रागभावत्वरूपसाध्यतावच्छेदकरूपेण साध्यस्याप्रसिद्धेरित्याह । अनु
नुयोगितेति । अनुयोगिताविशेषाभावस्वरूपसंबंधविशेषाग आदिना मतभेदेनाखंडोपाधित्वरूपप्रागभावत्वपरि नव्य
ग्रहः । घटादिनाघटविशेष्यकानुमाने प्रागभावप्रतियोगित्वस्यानुमेयत्वात् प्रतियोगिताविशेषपरिग्रहः
प्रागभावत्वादेरित्यादिना प्रागभावप्रतियोगित्वस्य परिग्रहः । नाप्रसिद्ध्या प्रागभावत्वादिनानुमानं न तु घटो भविष्य
तीति शब्देनाभिलप्यमानो योऽर्थस्तज्ज्ञानमेव प्रागभावप्रत्यक्षं [illegible] किंवा कार्यानुत्पाददशायां इह कपाले घटो २४४
नास्तीत्याकारकं इहेदानीं घटप्रागभाव इत्याकारकं वा प्रागभावप्रत्यक्षं घटो भविष्यतीति शब्देन कथ्यत इति तत्र

नायइत्याहा। भविष्यत्त्वं हीति। ध्वंसो भावीति ध्वंसो भावि घटप्रागभावस्यापि वर्त्तमानत्वादिति भावः। उत्पत्त्येत्याद्य घटलक्ष
णं ध्वंसरूपायाक्रियाया ध्वंसकतया तत्प्रागभावो विद्यमानत्विः ऽप्रागभावमात्रस्योत्पत्तिकत्वादाह। वर्त्तमानकालोत्पन्नेति
। इदं भविष्यत्त्वं नन्वयेतनरूपो यो वर्त्तमानकालस्तद्वृत्तिप्रागभावप्रतियोगुत्पत्तिकत्वं तदुत्तरकालोत्पत्तिकत्वं वा
ति ध्वंसो भाविन्यपी ऽध्वंसो भविष्यतीति प्रतीत्यापत्तिरत आह ध्वंसे इति। ताहृशेति। वर्त्तमानप्रागभावप्रतियोगीत्यर्थः। त
थाच हि घटो भविष्यतीत्यादौ तद्देशवृत्तिर्यत्किञ्चित्कालावर्त्तमानप्रागभावप्रतियोगिनी या उत्पत्तिस्तदाश्र
यो घट इत्यन्वयबोधः। अत एवेति। यत एव प्रागभावस्याधिकरणत्वेन न देशादि प्रतीयते किं तूत्पत्तेरेव यत एव
वेत्यर्थः। तत्प्रागभावेति। घटनाशप्रागभावेत्यर्थः। तत्र घटनाशजनकनाशप्रतियोगिनि कपाले इह घटध्वंसो भ
विष्यतीति न बुद्धिरित्यर्थः। कालविशेषस्य प्रागभावेन्वये ध्वंसो भाविन्यपि ध्वंसो भविष्यतीत्येनेन दत्तदोषत्वान्नो कालदे
शविशेषस्य कालविशेषस्य च उत्पत्तिमत्त्वान्वये बाधकमाह। नन्वेति। ऽत्रम वनदेशोत्पन्नेध्वंसः कालोत्पन्नेव च
सांगत्यरूपदेशाधिकरणकत्वस्य परध्वंसोरूपकालविशेषाधिकरणकत्वस्यवाबाधितत्वात् तत्प्रायोगापत्तिरि

तिभावः॥ गमिष्यतीन तु गच्छतीति गते वा तदा वर्त्तमानप्रागभावप्रतियोगित्वाभावादिति॥ ननु धातुनाउत्पत्तिप्रत्या
भा॰ ययनात् प्रत्ययेन तादृशोत्पत्तिकत्वमुपस्थाप्यते तत्पाचान्वयः॥ उत्पत्तेरप्युत्पत्तिमत्त्वस्वीकृतस्तु मंजज्ञिजकृशादावभि
हितत्वादन्वयसंभवेपि इष्यतु भवविरोधः॥ भविष्यतीत्यनेन वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वबोधस्यैवानुभव
२४५ सिद्धत्वान्ननु तादृशोत्पत्तिकोत्पत्तिमत्त्वबोधस्यात्रापादकत्वाच्चेति॥ तादृशेति॥ वर्त्तमानप्रागभावप्रतियोगित्वमित्य
र्थः॥ प्रागभावानंगीकारेत्वाह॥ तादृशेति॥ वर्त्तमानकालीनोत्तरकालीनत्वमित्यर्थः॥ नन्वेवं नंक्ष्यतीत्यादौ धात्वर्थेन
245 संमकालविरोधादरन्वये ध्वंसो भाविविनाशप्रतियोगिनि परध्वंसो नंक्ष्यतीति स्यादतआह नंक्ष्यतीति॥ नंक्ष्यतीत्यत्रानागता
नश्यतीत्यत्र वर्त्तमानानष्टस्यातीता चोत्पत्तिः प्रत्ययार्थः॥ अत्र धातुनोत्पत्तेरप्रत्यायनात्॥ न चात्र नश्यतेरिव ना
शोत्पत्तौ लक्षणाऽस्त्विति वाच्यम् तथा सति प्रत्ययार्थप्रतियोगित्वान्वयापातादिति॥ तस्यामेव प्रत्ययार्थोत्पत्तावेव न तु धात्व
र्थः॥ एतेन नंक्ष्यतीत्यादौ तादृशोत्पत्तेः प्रत्ययार्थत्वव्यवस्थापनेन ध्वंसो भावीति॥ ध्वंसो भाविनाशो यस्य तस्यार्थः॥ उत्पत्तेरला २४५
भे धात्वर्थनाशस्य कालविरोधादरन्वयो वाच्यः तथा च ध्वंसो भाविनाशप्रतियोगिनि तन्नाशस्य परध्वंसः कालवृत्ति

त्वात्परश्वो नंक्ष्यतीति व्यवहारः स्यात् एवं वर्त्तमानत्वस्य नाशेऽन्वयेन नष्टे नश्यतीति स्यात् । अतीतत्वस्य कार्यस्य नाशेऽभा
वान्नष्ट इति न स्यादित्यर्थः । आदिना नश्यति नष्टवान् इत्यादेर्ग्रहः । नष्ट इत्यत्रानुपपत्तिमाशंक्य निराचष्टे । नचेति । तत्र नष्ट इ
त्यादिस्थले लाघवादाह । वर्त्तमानत्वं चेति । विरतेति । निष्ठार्थकालविशेषेणासह इति पदिकार्थकालविशेषस्याभेदान्वये
पिताद्दृशकालस्य नाशेऽन्वयेन चिरनष्टेपि श्वो घटः पातीतकालवृत्तित्वस्य नाशे सत्त्वात् श्वो घटो नष्ट इति व्यवहारः स्यात् ए
वं वर्त्तमानत्वस्य निष्ठार्थत्वेऽधुनातनरूपवर्त्तमानकालवृत्तित्वान्नाशस्य चिरनष्टेपि अधुना विनष्ट इति व्यवहारः स्यादि
त्यर्थः । ननु भविष्यतीत्यादौ च वर्त्तमानप्रागभावप्रतियोगित्वात् उत्पत्तेर्वर्त्तमानप्रागभावप्रतियोग्युत्पत्तित्वस्य च नाश
स्य धात्वर्थत्वाभ्युपगमे तत्र प्रातिपदिकार्थे न समन्वयासंभवः । धात्वर्थप्रातिपदिकार्थयोर्भेदेन साक्षादन्वयस्याव्यु
त्पन्नत्वात् आह । वर्त्तेरिति । यथायथमिति । भविष्यतीत्यादौ उत्पत्तेराश्रयत्वं नंक्ष्यतीत्यादौ नाशप्रतियोगित्वं भविष्यन्नष्ट
इत्यादिरूपप्रत्ययस्थलेऽभेदान्वयानुरोधादुत्पत्तेराश्रयः नष्ट इत्यादौ च नाशप्रतियोगीत्यर्थः । कृतिरूपकर्त्तृत्वस्योभय
त्रानभिहितत्वात् तृतीयास्यादित्याशंकामपनेतुं कर्त्तृत्वं कर्त्तृत्वमभयमुक्तं मुख्यमात्रसाधारणकर्त्तृत्वस्यानभिधानएव तृ
तीयायाः साधुत्वात् प्रकृते च मात्र कर्त्तृत्वस्याश्रयत्वादेरनभिहितत्वादिति । केचित्तु धातोः स्वरूपसत्त्वे वार्थः भ

नंक्ष्यतीत्यादौ

अथ यत्रान्वयसंभव इत्यत्र ॥२॥ अथ यत्रान्वयो नैव तादृशप्रयोगसंभवादित्यर्थः॥

सत्तायामित्यनुशासनात् । नन्वेवमाकाशं भवतीति प्रयोगः स्यादाकाशमस्तीतिवदिष्टत्वात् । उत्पत्त्यर्थकत्वे तु वर्त्त-
भा॰ मानप्रागभावप्रतियोगित्वं भाव्यत्वे लब्धं तस्य च सर्वसिद्धेर्वा इत्याह घटो भविष्यतीत्यादौ च देशविशेषस्य कालविशेष-
२४६ स्य च प्रागभावे प्रतियोगिनि चान्वय उभयत्रान्वयसंभवे एव प्रयोगात् न स्यतीत्यादावपि नाशतत्प्रतियोगिनोरुभयत्रा-
२४६ देरन्वय इत्याहुः । तन्न तथा सति दर्शाद्यसत्त्वे तत्स्यमानेनैव चैत्रो दर्शे भविष्यतीति व्यवहारो न स्यादिति दर्शस्य चैत्राधिक-
रणत्वेऽपि तत्प्रागभावानधिकरणत्वेन उभयत्रान्वयासंभवात् । तथा तोऽस्त्याकाशं भविष्यतीत्यादौ सत्तामात्रार्थकत्वे
ऽपि दोषे भविष्यतीत्यादौ चोत्पत्तिप्रकारकबोधस्यानुभवसिद्धत्वादुत्पत्तिरेवार्थः । अत्र च शक्तिलक्षणे वेत्यन्यदे- ते
तत् । एवं तवाहान्वयधातुनेति नतु सर्वत्रेत्याशयः । अन्ये तु दर्शे चैत्रो भविष्यतीत्यादौ समवायार्थ उत्पत्तिः । तस्माच्च धा-
त्वर्थे स्वरूपसत्तायां स्वरूपात्मिकायामन्वयः । शारदि पुष्यंति सप्तछदा इत्यादौ तु तत्रेऽपि समवायार्थस्यावश्यापितत्वा-
त् । एवं च इहाद्य घटो भविष्यतीत्यादौ एतद्देशोत्पत्तिका एतत्कालोत्पत्तिका वर्त्तमानप्रागभावप्रतियोगियत्स्वरूपस- ना२
त्तान्दाश्रय इत्यर्थः । एवं न स्यतीत्यादावप्यूह्यं । तथा चोभयत्रान्वयनियमोऽपि न कल्पनीयः । नश्यतीत्यादौ पुनरनो-
त्पत्तावर्त्तमानोत्पत्तिः प्रत्ययार्थः । नष्ट इत्यादौ वर्त्तमानत्वमेव निष्टादेरर्थः । अत एवैतेन सप्तस्का स्यान्नुत्पत्त्यर्थ २४६

४१

कत्वेनैव सर्वोत्कातिप्रसंगनिरासात्। अथोत्पत्स्यत इत्यादौ च स्वसमस्या — आधेयत्वमेवार्थः स्वस्य तत्रत्वावेव धात्वर्थेऽन्वेति
त्याहुः। ननु घटानुत्पाददशायामिह कपाले घटो नास्तीत्याकारकमेव प्रागभावप्रत्यक्षं घटो भविष्यतीति शब्दे ना
भिलप्यत इति मध्यमं पक्षमाशंक्य समाधत्ते कार्यानुत्पादेति। अत्यंताभावमिति। तत्प्रानात्यैव समसामान्यलक्षणे
ति सर्वमेवोक्तं इति भावः। ननु घटो नास्तीति प्रत्ययः स्यात्तत्रोत्पत्स्यमानघटस्य प्रागभावः तत्रोत्पन्नघटस्य ध्वंसो वा वि
षय इत्यत आह न हीति। अयं इह कपाले घटो नास्तीति प्रत्ययः यत्किंचिदिति यत्किंचिद्घटवत्यपि घटांतरात्यंताभावप्रा
गभावध्वंसानां घटप्रतियोगिकानां संभवादिति भावः। घटत्वावच्छिन्नप्रतियोगिताकं — अव गाहत इत्यन्वयः। तथा च घ
टत्वावच्छिन्नप्रतियोगिताको ननु ध्वंसप्रागभावाधिकरणे सामान्याभावानंगीकारमते तावपि सामान्यावच्छि
न्नप्रतियोगिताकौ स्तां कार्यौ — अनन्यगतिकत्वादत आह ध्वंसं भवत्वैतौ इति चरमघटध्वंसस्यैव घटत्वावच्छिन्नप्रति
योगिकस्य संभवादाह तत्र कपाले इति। इदानींतनकपाल इत्यर्थः। सर्वमिति ध्वंसप्रागभावयोः सामान्याभावत्वाक
त्वोपि यत्कपालावच्छेदेन सर्वेषां सामान्याक्रांतानां प्रागभाव एवं तत्र प्रागभावस्य एवं यत्कपालावच्छेदेन स क्त

एवंतत्र ध्वंसस्य

भा. वैशिं ध्वंससामान्याभाववतात्वोक्रियते। न चात्र प्रागभावस्य सामान्याभाववत्ता अतीतघटानां प्रागभावासंभवात् इत्या

२४७ वै हा ततः सर्वैव बहूनां घटानां नष्टत्वादिति। न चात्र ध्वंसस्य सामान्याभाववत्ता अनागतघटानां ध्वंसासंभवादित्याह ततः

परतो बहूनां घटानां उत्पत्स्यमानत्वे तत्पर्यः। सर्वोपि कालाभावात् प्रागभावस्य घटत्वावच्छिन्नप्रतियोगिकतान

संभवतीति ध्येयं। यत्तु नन्वेतत्कपालवृत्तिघटत्वावच्छिन्नप्रतियोगिताकौ ध्वंसप्रागभावौ अत्व नलंबनपत आह। त

२४७ भवेनोवेति। तत्र कपाले इत्यस्य तिष्ठंतेप्यतु घं ग। तत्र कपाले ततः सर्वे बहूनां घटानां नष्टत्वादित्यनेन अभावस्य ततः परतो ब

घटानां हूनामुत्पत्स्यमानत्वादित्यनेन ध्वंसस्य च तत्कपालवृत्ति घटत्वावच्छिन्नप्रतियोगिताकत्वं प्रत्युक्तं इति। तन्तुच्छं। तद्घटत्वाव

च्छिन्नप्रतियोगिताकस्यैव तत्कपालवृत्तित्वे घटत्वावच्छिन्नाभावस्य घटो नास्तीति प्रतीतिविषयतायाः अनुत्पत्तिसं

भवादिति। एवं प्रतियोगिसमनाधिकरणपि समयावच्छेदेनात्यंताभावस्वीकारे एकपदे निषेधाच्छभावप्रतियोगिकातिरि

क्ताभावानंगीकारादित्याशयः। घटध्वंसादात्म्यादिना पटप्रागभावपरिग्रहा अत्यंताभावस्यैतिभवन्मतइतिशे २४७

षः। भवन्मते परात्यंताभावस्यैवपटध्वंसादिविरोधितया तदभावत्वमिति भावः। तन्नदिति। कपालादौ पटध्वंसादिस

न्यताबुद्धिरितिप्रथमांते नान्वयः। यदितु निर्वात भंगजघंसंगादिभेषितदानायत्यैवतन्नदधिकरणेरेवतदभावबुद्धिरि
त्युच्यतामितिभावः। अथानतुगतानामधिकारणानांमनुगतपटद्ध्वंसात्यंताभावधीविषयत्वासंभवं भावेऽभा
वत्वबुद्धेर्भ्रमत्वापातं अनेकेषांताद्दशाभावधीविषयत्वे गौरवंच वा स्तातदालायवादतिरिक्ताभावोभ्युपेयतामि
त्यातातिरिक्तादेवेति। नन्विहेदानींघटप्रागभावइत्याकारकमेव प्रागभावप्रत्यक्षंतदेवचघटोभविष्यतीतिशब्दा
भिलप्यमितितन बलादेवसामान्यलक्षणास्त्वितिचरमंपक्षमाशंक्य निराचष्टे। इहेदानीमिति। शब्दप्रयोगश्चसंभ प्राक्कालीनाभावः
वद्विषयांतरतयाननताद्दशावत्वंतरसाधकोऽन्यथाशशृंगादिपदादनभिमतनानापदार्थसिद्धिःस्यादितिभावः। न
२५ नु प्रागभावसाध्यस्येस्यान्यथोपपादनसंभवेपिप्रत्यक्षबलादेवप्रागभावोस्त्वित्यतआह। एवमिति। एवं अत्यंताभा
वादिविलक्षणतयाप्रागभावस्यप्रत्यक्षानंगीकारेऽननुकार्यानुत्पादकालीनाभावप्रत्यक्षस्यसर्वथैवअत्यंता
भावविषयत्वेकार्योत्तरकालीनाभावप्रत्यक्षोपितथास्यात्तथाचध्वंसोपिनातिरिच्येतेत्यतआह। उत्पन्नोघटध्वंस
इतिनतथाचतत्राबाधितोत्पत्तिधीबलादेवातिरिक्ताभावविषयकतेत्यर्थः। नचोत्पन्नेरूपनीतभानंवाच्यंतत्र

न विषयत्वावच्छेदकस्यापकमिति वाच्यं। तथा सति घटोत्पत्तिरपि न सिध्येत्। अथ ध्वान्नं यथापिद्धमुपनीतभानमपि वक्तुं

भा साधकं न दा ध्वंसोत्पत्तावपि तुल्यमेतत् तथा सति वंदितव नायवैध्वंसोत्पत्तौ घटध्वंसवदिति तु तं। ननु महाप्रलयस्याप्र

२४८ सिद्धेः सामान्यतः सर्वत्वं प्रागभावाधिकरणकालवृत्तित्वं घटादिसर्वत्वं च घटादिप्रागभावाधिकरणकालवृत्तित्वं

248 तस्य प्रागभावं विना कथं निरुक्तिरत आह। सर्वत्वेति। सामान्यतः सर्वत्वं अतीतकालवृत्तित्वं अतीतत्वं ध्वंस

प्रतियोगित्वं तत्सर्वत्वं चाहानादुत्पत्तीति स्वाश्रयवृत्तित्वय क्षणवृत्तिध्वंसप्रतियोगिप्रथमक्षणवृत्तित्वात्सर्वस्यै

व स्वसर्वत्वापत्तिरतः स्वाधिकरणकालीनेत्य प्रत्ययतदुत्पत्तीति। कालोऽत्र क्षणः। तेन सर्वस्यैव स्वोत्पत्त्यधिकरणमहाका

लवृत्तिध्वंसप्रतियोगिकालवृत्तित्वेऽपि न स्वसर्वत्वापत्तिः। स्वोत्पत्तिक्षणवृत्त्यत्यंताभावप्रतियोगिद्वितीयादिक्षणवृ

त्तित्वात्सर्वस्यैव स्वसर्वत्वापत्तिरतो ध्वंसेति। घटादेरपि स्वोत्पत्तिक्षणवृत्तिध्वंसप्रतियोगिज्ञानादेर्विशेषणतासं

२ बंधेनैतित्वात्स्वसर्वत्वापत्तिरतः समयेति। कालिकसंबंधेन वृत्तित्वलाभायोक्तमिति। ननु प्रागभावानंगीकारे दु

खप्रागभावार्थितया प्रायश्चित्तादौ प्रवृत्तिरनुपपन्ना रत्नत आह। दुःखेति। अत्यंताभावस्यापि सदातनत्वे २४८

सता।

५९

नस्वतएवोत्तरकालीनुवृत्तेराह। स्वस्मिन्निति। नन्वुत्तरकालानुवृत्तिरुत्तरकालसंबंधः स चोत्तरकालस्वरूप
त्यंताभावस्वरूपं नप्रायश्चित्तादिजन्यो न तस्य कालस्य स्वकारणाधीनत्वात्। अत्यंताभावस्य च नित्यत्वादतो नवीन
मतमाह। दुःखसाधनध्वंसमिति। नवीनमते दुःखसाधनध्वंसस्यैव स्वतः पुरुषार्थत्वादिति भावः। ननु यद्यपायं च वृत्ति
सफलाजेष्टावत्स्ववृत्तित्वादित्यनुमानस्य दुःखसाधनध्वंसादिरूपफलजनकतया नायुपासिद्धिः न चापीयं स वृत्तिः प्रागभा
वफलप्रागभावोद्देश्यकस्ववृत्तित्वादित्यनुमानात् फलत्वे न प्रागभावस्य सिद्धेदत आह प्रमाणांतरेति। तस्य प्रागभा
भावे प्रमाणांतराभावात् साध्यसाधनयोरप्रसिद्ध्या नैतादृशानुमानमिति भावः। ननु तद्घटोपधायकत्वतत्कपालसंयो
योगादीनां तद्घटोत्पत्तिकालेपि सत्त्वात् नरविन तद्घटोत्पत्त्यापत्तिरत एव नापाद्याप्रसिद्धिः तद्घटद्वितीयक्षणोत्पादित्वाव्या
वहितप्राक्कालवृत्तितद्घटस्य प्रश्नोक्तः स्यात् तद्घटोत्पत्तिमानस्यादित्यापादनात् प्रागभावांगीकारे च तदभावादेव न
पुनस्तदुत्पत्तिरतस्तदन्यथोपपादयति। उत्पन्नेति। कार्यादित्यादिना कार्यकालोत्पत्तिकध्वंसपरिग्रहः। तेन निखिल कार्यकालोत्पत्तिकानां
कस्य चतुर्थक्षणे न पुनरुत्पादापत्तिः। न चैतत्कालीनानंतध्वंसाभावानां कारणत्वमपेक्ष्य लाघवादेकएव प्रा

का ३

(कार्यकालोत्पत्तिकालीनोत्पत्तिक)

गभावो हेतुः कल्पने इति वाच्यं प्रागभावकल्पनेपि तत्कालोत्पत्तिकानामनंतानां प्रागभावानां विनिगमनाविर
भा. हेण हेतुतायां दुर्वारत्वात् तथा च प्रागभावकल्पने गौरवं परमतिरिच्यते अत एवाह लाघवादिति प्रागभा
वकल्पने तु धर्मिकल्पना गौरवादिति भावः। एतेन धर्माधर्मौ प्रति मिथ्याज्ञानवासनायाः कारणत्वं तत्त्वज्ञानिनो
२४८ धर्माधर्मानुत्पत्तिवशात्कल्प्यते तेन तथा च मिथ्याज्ञानवासनायाः अनंतत्वादाद्यतत्त्वज्ञानप्रागभावस्यैव धर्माधर्महे
तुत्वं लाघवादिति परास्तं। आद्यतत्त्वज्ञानोत्पत्तिकानंततदात्मसंयोगद्वित्वादिप्रतियोगिकानामनंतानां प्राग
भावानां विनिगमनाविरहेण हेतुतायां दुर्वारत्वात् तथा चानंतानां कारणत्वकल्पनस्याविशेषे प्रागभावकल्पना
गौरवमधिकं। किं चाद्यतत्त्वज्ञानकालोत्पत्तिकनाशप्रतियोगी धर्माधर्महेतुः कश्चन अतिरिक्त एव पदार्थः स्यात् तस्य
चाभावत्वे मानाभावः नैव ध्वंसप्रतियोगित्वावच्छिन्नं प्रति द्रव्यस्य समवायिकारणत्वात् अनादित्वानुपपत्तिरत ए
वं नस्तत्राश्रयः स इति वाच्यं सत्ताजात्याश्रयत्वेपि सामान्यादितुल्यत्वसंभवात्। तथा च भावत्वेनाभावत्वेन वा निरूपि
तमतिरिक्तमेव पदार्थांतरं स्यादिति जितं वेदांतिभिः। अपि कारेणाप्रयोजकत्वं सामग्र्यव्यवहितोत्तरकालस्य २४८

कार्यवत्त्वेनैव नियमात्तु कार्योत्पत्तिनिमित्तत्वेनेति भावः। ननु तत्र वर्तमानलक्षणाप्रविष्टतदधिकरणक्षणवृत्तिप्रा
गभावप्रतियोगिक्षणसंबंधरूपास्त्वभिन्नं तदधिकरणयावत्कालप्रागभावाधिकरणक्षणसंबंधरूपा वा न तदुत्पत्तिर्विना गात्म
प्रागभावं कथं निर्वाच्येत्यत आह। तदुत्पत्तिरिति। तत्पदं घटादिपरं। स्वाधिकरणेति। त्वं च तत्त्वाश्रयत्वेनाभिमतं घटादि
सर्वस्यैव समयस्य विवक्षितया घटाधिकरणतानधिकरणत्वादसंभवः स्यादतः प्रथमसमयपदं कालिकसंबंधे
नाधिकरणत्वज्ञापकं। तद्घटाधिकरणसमयध्वंसानधिकरणस्य भावि तद्घटगोचरज्ञानस्य विषयतासंबंधेऽतिव्याप्ति वत घटादिविशेषणं तत्पर दिकालीन स्वोत्पत्ति
वारणाय द्वितीयसमयपदं कालिकसंबंधज्ञापकं। तदुक्तमिति। अधुनातः क्षणयोर्ध्वस्य घटादेर्दित्यर्थः। अत्र तस्याधिकर
णस्थलतः स्वसमयमात्रीयध्वंसानधिकरणत्वस्य द्वितीयक्षणोत्पन्नध्वंसप्रतियोगिन्याद्यक्षणोत्स्थले विचसत्त्वात्तत्संबं
धस्यैव तदुत्पत्तित्वेन समयत्र क्षणपदव्यर्थमतत्राह। क्षणः समय इति। महाप्रलयस्वीकारे चरमध्वंसो क्षणा विदम
व्यापकं स्वाधिकरणसमयस्य ध्वंसरूपकालोपाधेर्महाकालस्य च ध्वंसाप्रसिद्धेरिति भावः। तदंगीकारे महाप्रलयांगी
कारे। यदी वेति। यस्यदं तदुत्पत्तिनिमित्तत्वेनाभिमतं घटादिपरमेव। घटायत्र तीयक्षणसंबंधे द्वितीयक्षणवृत्तिध्वंसप्र

तियोगित्वाभावस्यसत्वात्द्वितीयक्षणेऽतिव्याप्तिरतः क्वचिदप्राप्तियदीयसमयसंबंधत्वावच्छेदेनाभावसत्वाद्यी
भा॰ म॰ प्र॰ मुपात्तं। द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वस्य घटीयाद्यक्षणसंबंधे सत्वादाद्यक्षणवृत्तिध्वंसप्रतियोगित्वाभावत्वं
स्यचघटीयसमयसंबंधत्वा [illegible] वच्छेदेनसत्वान्नातिप्रसक्तम्पदसक्तो। भाविघटविषयकज्ञानरूपघटीयवि
षयितासंबंधेआद्यक्षणवृत्तिध्वंसप्रतियोगित्वस्यसत्वादसंभवइत्यतस्तद्यसमयपदं। यच्चघटोत्पत्तिक्षणेविन
२५० श्यदवस्थमाद्यक्षणात्मकंसर्वध्वंसाद्याकारकंज्ञानंतत्राद्यक्षणात्मकतज्ज्ञानसंबंधस्याप्युत्पत्तिमत्वान्नाव्याप्तिः वि
250 षयितयातत्ज्ञानवृत्तिध्वंसप्रतियोगित्वस्यघटीयसमयसंबंधसामान्यएवसत्वादतोमध्यसमयपदं। घटीयद्वितीया
दिक्षणसंबंधेव्याद्यक्षणवृत्तित्वंतदभावप्रतियोगित्वस्यसत्वादसंभवइत्यतोध्वंसेति। भाविघटविषयकज्ञा
नवृत्तिध्वंसप्रतियोगित्वाभावघटीयसमयसंबंधत्वावच्छेदेनसत्वात्तदायविषयितासंबंधेऽतिव्याप्तिरतस्त
तीयसमयपदं। महाप्रलयोत्पन्नावयविन्यव्याप्तिः चरमध्वंसीयसमयसंबंधस्यतत्समयवृत्तिध्वंसप्रतियो
योगित्वाभावादिति। ननुउक्तप्रामाण्यस्यमहाप्रलयानुरोधात्ध्वंसस्यचकालोपाधित्वांगीकारेयच्चघटोत्पत्ति २५०

५५

शेषक्षणानां भेदेपि [illegible]

क्षणमात्रस्य द्वित्रिक्षणमध्ये क्रियाया विनाशोन्नानन्तस्तेत्रतदुत्तरायद्वितीयतृतीयक्षणसंबंधे क्षणत्रयपा
त्मकस्थूलकालसंबंधे नातिव्याप्तिस्तद्वृत्तिध्वंसप्रतियोगित्वाभावस्य तत्तृतीयसमयसंबंधत्वावच्छेदेनैव
सत्वात्तदुत्तरोत्पाद द्वितीयादिक्षणविनष्टपदार्थस्य कालोपाधित्वाभावात्प्रतिक्षणं क्रियाया विनाश इत्यत्र न प्रमाण
मादतोगुर्वपि क्षणघटितं लक्षणमाहा तदधिकरणेति। यद्यपि स्ववृत्तिध्वंसप्रतियोगित्वाभावव्याप्यतदीय
समयसंबंधतावच्छेदकसमयसंबंधो निरुक्तलक्षणघटितः तु तदधिकरणक्षणेत्यादिनाव क्षणमात्रस्यापि वि षक्षणानां भेदेपि
+ विशेषणस्य तत्समयसंबंधस्यैक्यात्सवेतिनिर्देशोपपत्तिरिति भावः। तत्त्वं द्वघटादिपरं। यत्समयवृत्तिध्वंसप्रतियो
गितातदधिकरणक्षणवृत्तित्वव्याप्यतत्समयसंबंध इत्यर्थः। द्वितीयादिक्षणवृत्तिध्वंसप्रतियोगितात
त्तदधिकरणक्षणवृत्तित्वव्याप्या तदधिकरणक्षणघक्षणेवर्त्तमाने पितामहस्य ध्वंसप्रतियोगित्वस्यस
त्वादिति। +आद्यक्षणवृत्तिध्वंसप्रतियोगिनामपि तदधिकरणस्थूलकालादेर्वृत्तेरसंभव इति सूलेति
द्वितीयादिक्षणवृत्तिध्वंसप्रतियोगिनामपि चिरातीतानां तदुत्तराधिकरणक्षणवृत्तित्वात द्वितीयादिक्षणसं

न्यमहाकार

बंधेति व्याप्तिरतो व्याप्येति। स्ववृत्तिरीत्या सर्वे ध्वंसाः स्वाकारकं ज्ञानं यत्राद्यक्षणात्मकं तत्र विषयितया त
द्वृत्तिध्वंसप्रतियोगित्वस्य तद्घटाधिकरणक्षणवृत्तीनामपि सत्त्वादाद्यक्षणात्मकज्ञानसंबंधो व्याप्तिरत
भा. स्ववृत्तित्वं ध्वंसस्य कालिकसंबंधेन वाच्यं। भावि घटविषयकज्ञानस्य तद्घटविषयतासंबंधेति व्याप्तिरत प
स्तद्वारणायापि चरमसमयपदमिति। ननु तदधिकरणक्षणे यत्र क्षणत्वं स्वजन्यविभागप्रागभावोपहित
२५१ कर्मत्वे स्ववृत्तिप्रागभावाप्रतियोगिस्ववृत्तियावत्पदार्थविशिष्टसमयत्वं वा प्रागभावं विना कथं निर्वाच्यमि
त्यत आह। क्षणत्वं चेति। स्ववृत्तीति। क्षणत्वेनाभिमतं। अंत्यशब्दादिस्ववृत्तियो ध्वंसस्तत्प्रतियोग्यप्रमाधि
259 रत्वमित्यर्थः। अत्यंताभावप्रतियोगिनोरेकस्मिन् क्षणेऽसत्त्वात्। ध्वंसेति। एकस्मिन् क्षणे ध्वंसप्रतियोगिनो
ऽसत्त्वादिति भावः। अत्र ध्वंसत्वं निरूपकप्रतियोगिताश्रयेति भावः। क्षणिकपदार्थमात्रस्यानंगीकारे
त्वाह। स्ववृत्तीति। स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोगिप्रतियोगिकयावद्ध्वंसास्तद्विशिष्टसमयत्वमित्यर्थः। या
वद्ध्वंसविशिष्टसमयत्वे कृते महाप्रलयातिरिक्तक्षणे व्याप्तिरतः प्रतियोगिकांतं ध्वंसविशेषणं। स्ववृत्त्यभा २५१
वप्रतियोगिप्रतियोगिकयावदभावविशिष्टत्वे तादृशयावद्ध्वंसविशिष्टत्वे वा तथैव व्याप्तिरिदानीं न तत्क्रियादि

स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोगिप्रतियोगिको यावान्ध्वंसस्तद्विशिष्टसमयत्वमित्यर्थः। टीका २

५१

वृत्त्यंतताभावप्रतियोग्यनागतपदार्थप्रतियोगिध्वंसविशिष्ट~~…~~दानीं न तत्क्रियादावभावात्। न च वृत्ति-
ध्वंसप्रतियोगिप्रतियोगित्व यावदभाववविशिष्टत्वमेव सम्पन्नमिति वाच्यं। ध्वंसत्वस्याखंडोपाधितया वर्तत्राभाववत्त्व-
स्याप्रवेशेन वैयर्थ्याभावात्। अत्र च स्ववृत्तिध्वंसस्य तत्प्रतियोगिप्रतियोगित्व यावद्ध्वंसविशिष्टत्वं च कालि-
कसंबंधेन ग्राह्यमेतदर्थमेव सम्यक्पदं। तेन सर्वैर्ध्वंसाद्यन्यारकज्ञानस्यांतलक्षणावच्छिन्नस्य लक्षणत्वान्न द्विष यत्न
यातद्वृत्त्यनागतध्वंसविशिष्टत्वाभावेपि तत्र नाव्याप्तिर्नवा कालिकसंबंधेन तद्वृत्तिध्वंसप्रतियोगिप्रतियोगिक-
यावद्ध्वंसानां विवक्षितया विशिष्टस्य लक्षणत्वयावच्छेदेनैव वृत्तिनेसत्वादतिव्याप्तिरिति। अत्र परस्त्वस्य स्थिरलक्षणमे-
मंत्र. वक्रियादीनां लक्षणावच्छिन्नानामेव लक्षणत्वं अतः लक्षणत्वेन ध्वंसघटितताहृशयाव ध्वंसवैशिष्ट्यस्योपात्त-
दिलक्षणावच्छेदेनाभावादिति ध्येयं। ननु स्ववृत्तित्वविशिष्टध्वंसानेव यावत्त्वेन विशिष्यतद्वैशिष्ट्यस्यैव लक्षणत्वे
गुरुतरारंभोऽनुचित इत्यत आह। स्ववृत्तियावद्ध्वंसेति। स्ववृत्तिध्वंसविशिष्टत्वस्य स्थिरलक्षणांश एवदेव सत्वादिति भावः
वृत्तिरतो यावदिति। अत्रापि वृत्तित्वं वैशिष्ट्यं च कालिकसंबंधेन बोध्यं। तस्य योजनं च स्ववृत्तीनामिति। ननु ध्वंस

त्वस्याखण्डोपाधित्वानंगीकारेणाभावत्वं किंचित्कालावृत्त्यभावत्वं वा ध्वंसत्वं वाच्यं। तत्र च जन्यत्वं किंचित्कालावृ
भा. त्तित्वं वा विशेषणं व्यर्थं प्रागभावानंगीकारेण स्ववृत्तियावदभाववैशिष्ट्यस्यैव सम्यक्त्वादित्याहुः। स्ववृत्तीति। स्व
वृत्तियावत्पदार्थवैशिष्ट्यं न कस्यापि स्थिरस्य प्रतिक्षणं कस्यचिदुत्पन्नत्वात् कस्यचिद्विनाशादत उक्तं अभावेति। यावद
२५२ भाववैशिष्ट्यं महाप्रलयान्यलं क्षणव्यापकं चरमध्वंसवैशिष्ट्यस्येदानीमभावादतः स्ववृत्तीति। समयपदव्यावृत्ति
त स्तत्स्वं वदंतः क्षणावच्छिन्नानां स्थिराणां क्षणमुक्त्वा आद्यक्षणावच्छिन्नानां तदाहुः। स्वस्वरूपेति। अतिरिक्ताभा
२५८ वानंगीकारेण क्षणमाह। स्वस्वरूपेति तु न स्थितं। तन्न स्वरूपत्वं च स्वाधिकरणयावत्कालवृत्तिध्वंसप्रतियोगित्व
मिति ग्रंथविरोधात्। स्वलक्ष्यत्वेनाभिमते क्रियादिके स्ववृत्तियावत्पदार्थवैशिष्ट्यं न कस्यापि स्थिरस्य प्रतिक्ष
णे कस्यचिदुत्पन्नत्वात् कस्यचिद्विनाशात्। एवं स्वरूपवृत्तियावत्पदार्थवैशिष्ट्यं न कस्यापि चिरातीतानां तत्राभावा
दत उभयमुपात्तं स्ववृत्तिसमस्वरूपवृत्तियावानं तद्वैशिष्ट्यं स्थिराणामाद्यक्षणावच्छेदेन द्वितीयादिक्षणे प्रथ
मादिक्षणे वृत्तिपदार्थानां नाशादिति ध्येयं। अत्र स्वरूपवृत्तित्वं स्ववृत्तित्वं वैशिष्ट्यं च कालिकसंबंधेन तद्व्या २५२

एकक्षणावच्छिन्नाकाशाद्युत्पत्तिक्षणोत्पन्नघटपटक्षणानाम्पूर्वत्वव्यवहारो न स्यात्पोक्षणमते

भाग्यैव समव्यपदं । तेन स्वद्वितीयक्षणोत्पन्नस्य कालिकतया स्ववृत्तेः अवच्छिन्नज्ञानादौ विषयतया वृत्ते स्वाद्यक्षणे तद्वैशिष्ट्याभावेपि न क्षतिः । न वा तत्पूर्वकालीना एतत्कालीनाश्च सर्वे पदार्थास्तत्प्रकारकज्ञानस्याप्याद्यक्षणे सत्त्वाच्चिरातीतानामेतत्पूर्ववृत्तिनां विषयतया स्ववृत्तित्वात् वैशिष्ट्यस्याद्यक्षणेऽसत्त्वेपि स्वत्वपूर्ववर्त्तिनो विषयतया वैशिष्ट्यस्य क्षणद्वयान्तर्भावेन सत्त्वेपि चाव्याप्तिरिति वाच्यं तथापि नानु स्वपूर्ववर्त्तित्वं स्वोत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वं तथा चा । न्योन्याश्रयः उत्पत्तिलक्षणप्रविष्टक्षणलक्षणस्योत्पत्तिघटितत्वादत आहास्वपूर्वत्वं वेति स्वानन्तरोत्पन्नस्य स्वाधिकरणत्वं तु यादिक्षणवृत्तिध्वंसप्रतियोगिद्वितीयादिक्षणवृत्तेराद्यक्षणे वैशिष्ट्याभावाद्विक्षणस्याधिज्ञानादित्वस्थलेपि स्वाधिकरणमहाकालवृत्तिध्वंसप्रतियोगि स्वपूर्वत्वनिरुक्तौ यावदिति । ननु क्रियामात्रस्य कालोपाधित्वेन तत्पूर्वलक्षणमारभ्य समलोपेचलक्षणमनुपपन्नानीति तथाहि । प्रतिक्षणं क्रियाया विनाशस्यानभ्युपगमात् यत्र घटोत्पत्तिपूर्वतनीयक्षणे क्रियाया विनष्टो जातो न घटोत्पत्तिक्षणे तत्राद्यक्षणेनातत्र घटोत्पत्तिप्राक्क्षणोत्पन्नेतनः पूर्वद्वितीयक्षणोत्पन्नेवापूर्वत्वव्यवहारो न स्यात् । ए

द्वितीयक्षणोत्पन्नानां वैशिष्ट्यस्याद्यक्षणेऽभावात्महाकालव्यतिरिक्तक्षणेऽव्याप्तिरतः स्व ४

भा.
२५३
253

वंधत्वघटोभयत्रिमात्रस्य लक्षणद्वयांतर्भावेन क्रियाध्वंसोनजातस्तत्र द्वितीयलक्षणसंबंधेत्वाधिकरणेत्यादिकं यदी
यसमस्तसंबंध इत्यादिकं चोत्पत्तिलक्षणमपि व्याप्तं। एवं यत्र लक्षणद्वयमध्ये क्रियायान विनाशसामग्रीन चोत्पत्ति
स्तत्कालोत्पन्नज्ञानाद्यन्यतमेतदधिकरणलक्षणार्द्धित्वघटितलक्षणमव्याप्तं तत्र सामानाधिकरणलक्षणस्याप्रवृत्ति
त्तेः। एवं यत्र यदादेशाद्यलक्षणे क्रियायानोत्पत्तिर्विनाशसामग्री वा किंतु न द्वितीयलक्षणे तत्र द्वितीयादिलक्षणसंबंधेऽति
व्याप्तं वा। एवं क्रियायायां (पदा) न विनाशसामग्री तदोत्पत्तिलक्षणवच्छिन्नलक्षणलक्षणं यदानोत्पत्तिस्तदाद्यलक्षणवच्छिन्नलक्षण
लक्षणमव्याप्तं। महाप्रलयोत्पत्तौ महाप्रलयलक्षणे च सर्वलक्षणानामेवाव्याप्तिरत आह जन्यमात्रस्यैवेति। मा
महाकालोपद्धाधिकरण तापाकृत्वाद त्रपदं स्वत्वार्थकं। नित्यस्य कालिकसंबंधेनाव्यावर्त्तकतया व्यावर्त्तकत्वाय जन्यानाम[नु]प्रवेशावश्यकत्वेन मा
मेव कालोपाधितायायुक्तत्वादिति भावः। तथा च उत्पत्तिलक्षणं क्वचिद्युक्तं। कस्य चिद्विनाशारंभसमुपगमात्
तत्र तत्र च तत्तत्प्रदार्थनामेवोत्पत्तिरूपावच्छिन्नानां लक्षणत्वान्न कोपि दोषः। महाप्रलयेपि चरमध्वंसस्यैव लक्षण
त्वान्नातिव्याप्तिरिति भावः। न तु लक्षणत्वव्यवहारविषयो महाकाल एव तथा चासंभवः। तत्र नित्यस्य स्वरूपेव २५३

ध्वंसप्रसिद्धेरत आह। जन्यमात्रस्यैवेति। मात्रपदेन नित्यव्यावृत्तिरिति तु न क्षति। स्पष्टगायदित मुख्यत्विलक्षणमा
हायेयत्कालेति। यत्पदं घटादिपरं। आद्यक्षणवृत्तिध्वंसप्रतियोगिनि समये घटादेरवृत्तेर्द्वितीयादिक्षणवृत्ति
ध्वंसप्रतियोगिनि। आद्यक्षणावृत्तेर्नाव्याप्तिरित्याशयः। अत्र सर्वेषां ध्वंसानां साकारकाद्यक्षणात्मकज्ञाने विषयितया
भाविध्वंसानामवृत्तेस्तत्प्रतियोगिकालवृत्तित्वाद्दृश्यताद्यज्ञानोत्पत्तिकाद्यक्षणसंबंधेऽव्याप्तिरतो यत्कालवृ
त्तिरित्यत्र कालिकतयावृत्तिर्विवक्षा। आद्यक्षणवृत्तिध्वंसप्रतियोगप्रतीतज्ञाने विषयितया घटादेर्वृत्तेरसंभ
वस्तत्प्रतियोगवृत्तीत्यत्रापि कालिकतयावृत्तिः। एवं चातीतज्ञानवृत्तिध्वंसप्रतियोगवृत्तेर्घटस्यातीत
तज्ज्ञाने विषयितया वृत्तित्वेऽपीति व्याप्तिरतस्तत्कालवृत्तित्वमित्यत्रापि कालिकतया वृत्तित्वमिति वाच्यं। अ
त्रापि क्रियमाणस्य कालोपाधित्वस्वीकारे यत्र क्षणद्वयमध्ये क्रियाया विनाशो न जातस्तत्र द्वितीयक्षणवृत्तिध्वंस
प्रतियोगिनि घटादेरवृत्तेर्द्वितीयादिक्षणसंबंधेति व्याप्तिरिति बोध्यं। नैवमिति। एवं प्रागभावानंगीकारे। स्वा
नधिकरणे विद्वान्। तेषामपि तंतुत्वेन तद्धारजनकत्वादिति भावः। न च तंतुत्वेन कार्यकारणभावे पटत्वाक्रां

पटत्वेनो

म०

तायायत्किंचिदवच्छेदकत्वसत्वात् कपंस्यानधिकरणेषु तत्पटापादनमितिवाच्यं यथाकार्यस्य कदाचित्कत्वं का
रणं कदाचित्कत्वाधीनं तथा कार्यकादाचित्कत्वस्यापि कारणकादाचित्कत्वाधीनत्वादन्यथा ज्ञानेच्छादीनां कार्य
२५४ कारणभावेपि सामानाधिकरणप्रत्यासत्यपेक्षा नस्यात् पटत्वप्रकारकधीशून्ये वात्मनि तत्प्रकारकेच्छापा
दनस्य तदुद्धरमेतेन खंडनसंभवादिति। तत्र तंतुत्वेति। न च तत्र तंतुत्वेन कारणत्वकल्पनेतिकपमनति
254 प्रसंगः। तत्पटत्वावच्छिन्नकारणतोमविशिष्टायाएव सामान्यसामग्र्यास्तत्पटव्याप्यत्वोपगमात् तत्पटानधि
करणतंतुषु तत्पटत्वावच्छिन्नं प्रतिहेतुतायाअभावात् तत्रेदमवधेयं। तंतुत्वेन पटत्वेन कार्यकारणभावे
पटस्य समवायेन व्याप्यता तंतूनां तादात्म्येन व्यापकता एवं यदा पटोत्पत्तिः तत्संबंधेन पटो वा तत्सर्वकाले
तंतुरित्येवंविधा कालिकव्यापकतापि व्यापकतारूपमेव तत्र निविशते न तु तंतुत्वेन तत्पटत्वेन कार्यकार
णभावे तु यदा तत्पटस्तत्सर्वं च तत्तंतुरित्येवंविधाकालिकव्यापकतैव निविष्टा न तु पटत्र तत्पटस्तत्र तत्तंतुरित्येवं
विधा देशिकी व्यापकतापि। न तत्र तंतुभिन्नेपि तत्पटस्य समवायेन वृत्तेर्व्यभिचारात्। तत्पटानधिकरणे त २५४

व्याप्यता सामानाधिकरण्येन क्रियाया व्यापकता एवं कालिकव्यापकताघटितसर्वत्रैव कारणता घटो ४

तैौ तंतुरूपसामान्यसामग्र्यां तंतुरूपविशेषसामग्रीवैशिष्ट्याभावात् तत्पटानुत्पादकत्वं विशेषसामग्र्या वैशिष्ट्यं
चतत्तंतुत्वनां तादात्म्यं तत्संयोगानां समवायेनेति क्रमेण स्वघटभूत्वावितिविशेषिततादात्म्येन तत्पटस्य व्याप्यता त्व
नुयोगित्वसमवायेन तत्तंतुनो व्यापकता यत्र तत्पटस्तत्र तत्तंतुरित्यत्र व्यभिचाराभावात् एवं संयोगादिकं प्रतिक्रिया
दीनां कारणत्वेपि तादात्म्येन संयोगस्य व्यापकता इयं निविशते त्याहुः स्वाश्रय एवेति सामानाधिकरण्यसंबंधस्यैव
दूषो तस्य हेतुतेति तत्र तदुभयोरेव तत्त्वोरेकस्या एव संयोगव्यक्तेर्वर्तिष्यत्तित्वेनानन्यथासिद्धत्वमात्रे कल्पने लाघव
स्यागभावकल्पने तु यत्किंचित्ज्ञानान्यथासिद्धत्वनियतसर्ववर्तित्वयोः स्वकल्पने गौरवादित्याशयः तदसिद्धिः प्रा
गभावसिद्धिः प्रागभावकल्पनेपि तत्तंतौ तंतुत्वेन हेतुत्वकल्पनस्यावश्यकत्वेन तत एवातिप्रसंगभंगो किं प्रागभा
वकल्पनयेत्याह त्रिचतुरेति समवायीकारणसत्वार्थमाह संयुक्तेषु चेति नवदशतंतुकपटोत्पत्तिकाले नवा
मं [illegible] तंतंतूनां तत्संयोगानां च सत्त्वान्नवतंतुकः पटः कथं न जायते इति वाच्यम् तत्र दशतंतुकपटध्वंसस्यापि
तत्त्वेन हेतुत्वात् इदं तत्त्वावयवे यं दशतंतुकपटोत्पत्तिप्राक्कालेपि नवतंतुकपटोत्पत्तिर्भवति हठतरात्मकवेम

इमाव ॥ इदं संच ३ लाघवेन चेतत्पर्यः ॥ नेतेति वहुधुनयनाधिकरणे धुलिभाव ॥ दितंतुके पटे पीति

मं॰

कतान

मियातेनतन्नाशेचतंत्वंतरयोगाद्दशातंतुकपटोत्पत्तिर्भवतिदृढतरात्मकत्वेनाप्रियातेनतन्ना
~~शेचतंत्वंतरायोगाद्दशातंतुकपटो~~त्पत्तिस्तत्कालेचनश्यत्वोत्पन्ननवतंतुकपटस्यपुनरुत्पत्तिस्तत्कालोत्पन्नध्वं
२५५ सविशेषस्यप्रतिबंधकत्वात्तन्नाशप्रतियोगिन्याःसंयोगव्यक्तेर्विशिष्यहेतुत्वाद्दशातंतुकस्यएकतंतुप
255 र्यणामंतरंयोनवतंतुकस्तत्रवदशातंतुकध्वंसस्यैवनत्वेनहेतुत्वान्नतस्यदशातंतुकोत्पादकालेउत्पादइतितत्र
द्वितंतुकस्यचतुस्तंतुकस्यनापटस्योत्पादात्पटस्यसामान्योत्पत्त्यापादनंनघटेतरत्वनात्तन्यटोत्पत्तीतिविनाकारण
विरहमितितंतूनांतत्संयोगानांचतंतुत्वेनविजातीयसंयोगत्वेनचहेतुतयातदवच्छिन्नव्यतिरेकस्यासंभ
वादितिभावः।कार्यानुत्पादेनत्तदुपगममुक्त्वाकार्योत्पादप्रसंगप्रयोजकमाहसामग्रीसत्त्वइति।प्रवेशेकार प्रवेशेति॰४
णतावच्छेदकत्वेनान्यथासिद्धिः।अप्रवेशेतुतत्तंतूनांसेवविशिष्यहेतुत्वावश्यकत्वेउक्तंप्रागभावस्यहे २५५
तुत्वेनेतिभावः।ननुच्यकारणत्वेप्यवच्छेदकतयैवप्रागभावःनिवेशेतु अवच्छे[illegible]वास्तवंतत्रान्वयव्य
तिरेकित्वात्कारणत्वंस्यादतआह।परस्परेति।कृतिपदेतिपदेनासमवायिकारणा[illegible]सत्वेपितत्रतत्पभावा।

५५

त्संयोगानामेव विशिष्य हेतुत्वं वक्तव्यं तथा सति तंतुत्वे नैव कारणत्वेपि न क्षतिरिति प्रागभावस्यावच्छेदकतापि ने
ति भावः । अनागतेत्यादि । तत्तंतु मात्रवृत्तिनामेव संयोगानां दैशिकतया तत्प्रागभावव्याप्यत्वादिति भावः । ननु त
त्पटप्रागभावानधिकरणीयः कालस्तद्वृत्तिः स न्यस्तत्पटप्रागभावाधिकरणकालवृत्तित्वादृशात्तत्पटप्रागभा
वव्याप्ययावत्संयोगत्वेन जनकत्वं न वैवं सत्यतीतानागतसंयोगमादाय दोषसंभवः तत्पटाव्यवहितपूर्वक्ष
णावृत्तितत्पटोत्पत्तिक्षणवृत्तितत्पटप्रागभावव्याप्ययावत्संयोगानामेवोक्तरूपावच्छिन्नत्वादत आह । तत
त्पटप्रागभावमिति । तथा च तत्पटाधिकरणकालध्वंसानधिकरणं तत्तु यत्पटानधिकरणं कालिकतया
तद्वृत्तिः सन्न्यः तत्पटवृत्तिः तादृशतत्पटव्याप्ययावत्संयोगत्वेन हेतुत्वे लाघवमिति भावः । अत्र च तत्पटोत्पत्ति
कालोत्पत्तिकध्वंसप्रतियोगिसंयोगव्यक्तिवारणाय कालिकतया तत्पटवृत्तित्वं पूर्वं च तत्पटप्रागभावानधिकर
णकालवृत्तित्वं संयोगविशेषणं तेन न तत्पटस्य न क्षणिकत्वमिति तु ध्येयं । केचित्तु । यत्रातीतानागतसंयोगाभाव
स्तत्रैव तावत्संयोगानुगमकत्वेन प्रागभावः सिध्येदतस्तत्पटप्रागभावमिति । न च यत्र क्वचित्तु रेषैव तंतुषु संयोगानु

म० त्पन्नस्यान्त्रैत्वं तरेसंयोगानुत्पादादशायां तत्पटोत्पादशासंगमयेनोक्तरूपेणयावत्संयोगानां हेतुत्वस्योक्तत्वात् ।
त्रिचतुरेषु वेतुषु वतत्रद्वित्रितंतुकादिपटस्योत्पादावश्यकत्वे संयोगनाशाधीननत्नाशानंतरमेव दशातंतुकप
टस्योत्पादेन ततनादशासंयोगस्यकस्यचिदव्यपमतीतत्वमितिवाच्यं यत्र त्रिचतुरेषु तंतुषु संयोगेत्पादे त्रितंतुकादि
२५६ पटोत्पत्त्यनंतरं अन्यैः समवैतंतुभिः संयोगाजाताः अथैव तंतुनाशात्त्रितंतुकस्य नाशेः स्थितसंयोगेभ्यो दशातंतु
कस्योत्पादस्तत्रातीतानागतसंयोगविरहस्य संभवादित्याहुः । ननु तत्पटस्येव न प्रागभावस्याप्यवच्छेदकत्वेनै
256 वप्रवेशोक्लाघवमत आह । यावत्त्वेति । संयोगे यावत्त्वमपेक्षाबुद्धिविशेषः न यावत्तत्प्रागभावव्याप्यसंयोग
त्वमात्रं विवक्षितं यापेक्षाबुद्धेर्वारणाय तत्संयोगव्यक्तीः प्रातिस्विकरूपेणादाय तन्नदवगाहित्वेन तादृशा
पेक्षाबुद्धिविशेषस्योपादानेन तन्नदवगाहित्वानां परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेणानारतंसंयोग
समसंख्याककार्यकारणभावावश्यकत्वेऽतिगौरवादिति भावः । आचार्यमतं दूषयति । एतेनेति । यावत्तिद्वित्वा
दिप्रागभावः तावत्त्वेव द्वित्वादि । अन्यथा घटपटयोः समवायिनो नानात्वस्य समवायिनो नानात्वावगाहि धियो २५६

५१

नावच्छेदेनात्यंताभावकत्वात्पुनरुक्तस्यापत्तिरतः प्रागभावच्छेदेनकालेयोग्यात्यंताभावोहेतुर्वाच्यः ॥ एवं संयोगानुत्पादकालेप्रागभावाप्रसक्तेः ६

विनिमित्तस्याविशेषान्नद्वित्वाद्युत्पत्तिनियमोनस्यादित्यावाच्यं ॥ तत्रापि द्वयोरुत्पादेपरस्यानुत्पाददशायांत्रि
त्वाद्युत्पादापत्त्यातत्तदाश्रयाणामेवविशिष्यत्रित्वादौहेतुत्वस्यावश्यकत्वात् द्वित्वस्यत्वेनाधिकरणद्वयस्यैव
विशिष्यानन्यथासिद्धत्वद्वयकल्पनेलाघवंप्रागभावकल्पनेचधर्मिणस्तत्रानन्यथासिद्धत्वनियतपूर्ववर्त्ति
त्वयोश्चकल्पनेगौरवमितिध्येयं ॥ साधारणं । शास्त्रीयपरिभाषाविज्ञानविज्ञसाधारणं ॥ वस्तुतोध्वंससर्वसाधा
रणप्रत्यक्षप्रागभावस्यतथात्वप्रसंगान्नित्यवेत्याशयेनाह । कल्पयेतरितीतद्बलेन । तादृशप्रागभावप्रत्यक्षबले
नवर्तनीयमाहाक्रमप्राप्तवत्रेरित्यादिना ॥ शाखावच्छेदेनजातस्यकपिसंयोगस्यमूलादिसत्वावच्छेदेनैवतद
त्यंताभावस्यसत्वात्सर्वावच्छेदेनैवसंयोगः स्यादतः संयोगस्याप्यदेशिकत्वोपपत्तये । वच्छेदकीभूतशाखादेरपि
वच्छेदकतासंबंधेनहेतुत्वंवाच्यं । मूलादौतादृशशाखादेरभावादेवनसंयोगोत्पादः । तदवच्छिन्ने । एवं च तदुभ
यहेतुत्वापेक्षयालाघवादेकस्यैवप्रागभावस्यहेतुत्वकल्पनेतस्यचस्वावच्छेदेनकार्यजनकत्वात्प्रादेशिकत्वंसंयो
गादीनामिति । प्रत्यक्षादिबलादसिद्धेश्चप्रागभावेप्रागभावस्यधर्मिणः तत्रानन्यथासिद्धत्वनियतपूर्ववर्त्ति

भ० त्वयोः कल्पनाद्वयमपेक्ष्य इतन्नियतपूर्ववृत्तित्वयोः शाखासंयोगात्यंताभावयोरन्यथासिद्धकल्पनैव लघी
२५७ यसी स्यादतः प्रथमं प्रागभावप्रत्यक्षमुपन्यस्तं। न च मूलाभिमुखक्रियातः शाखावच्छेदेन संयोगानुत्पादाच्छाखा
भिमुखक्रियायास्तदवच्छेदेन संयोगजननत्वं वाच्यं तथा चैतावतैव संयोग~~व्यक्तिं प्रति हेतुत्वस्य~~ प्रादेशिकत्वनिय
२५१ म इति वाच्यं तदभिमुखत्वस्यैव रूप्याभावेन तत्क्रियाव्यक्तेरेव तत्त्वेन तत्तत्संयोगव्यक्तिं प्रति हेतुतया मूलाभिमुखक्रि
याजन्यसंयोगव्यक्तेः शाखावच्छेदेन प्रागभावादेवानुत्पादात् शाखावच्छिन्नसंयोगव्यक्तिं प्रति मूलाभिमुखक्रिया गमा
व्यक्तेरहेतुत्वात्क्रियात्वस्यैव तत्त्वेन हेतुत्वादिति। लीलावतीकारमते संयोगादेरव्याप्यवृत्तित्वाभावादाह। धा
दे रावहनस्थले इति। आत्ममनःसंयोगव्यक्तेश्चक्षुर्विषयसंयोगव्यक्तेर्वा भेदे तस्या एवविशिष्टहेतुत्वकल्पनयैवान
तिप्रसंगः संभवतीत्यतो धारावहनपर्यंतानुधावनं। तथा च तस्यैवात्ममनःसंयोगादेश्चतुर्थक्षणपर्यंतं वर्त्तमान
त्वमित्यर्थः। पूर्वक्षणे स्वस्यैव प्रतिबंधकस्य सत्त्वात् द्वितीयक्षणे तु उत्पत्तिर्न घटते इति चतुर्थक्षण इत्युक्तं
सविकल्पे तु इष्टान्यन्नविशेषणज्ञानव्यक्तेस्तत्त्वेन हेतुत्वकल्पनयैव वारणसंभवत्यतो निर्विकल्पकपर्यंता २५१
केस्य।

५१

नुधावनं। स्मरणविशेषस्य विशिष्टहेतुताभ्युपगमे तु एककारणपरिशेषापत्तिरिति भावः। न च निर्विकल्पकस्या
तीन्द्रियतया तत्प्रागभावस्यापि तथात्वमिति वाच्यं प्रत्यक्षोपष्टम्भेन तस्य हेतुत्वमिति वाच्यं। निर्विकल्पकस्यायोग्य
भावा त्वेपि संबंधितावच्छेदकप्रकारकज्ञानाद्यभावप्रत्यक्षे तेनोपगमेन तत्प्रागभावस्य ज्ञानप्रागभावत्वादिरूपेण
प्रत्यक्षे तेषां गमादिति। तत्तरज्ञानाभावस्येति। न चैवं पञ्चमक्षणे घायमिति निर्विकल्पकापत्तिः। स्वाव्यवहितनिर्विक
ल्पकध्वंसावच्छिन्नज्ञानस्य तादृशध्वंसस्य वा प्रतिबंधकत्वे तात्पर्यात्। लाघवात्। कारणाद्यनकल्पनापेक्षया एक
स्य प्रागभावस्य कारणताकल्पने लाघवात्। अव्याप्यवृत्तिस्थले ऽवच्छेदकीभूतशाखादेः कारणत्वात्। कल्पने
लाघवं स्वयति स्वभावाधीनाश्चेति। अत्रेदमवधेयं। तेन रूपेण प्रागभावस्य प्रत्यक्षमेव नास्ति न चैवं संयो
गस्य निर्विकल्पकस्य जनतत्समानकालोत्पत्तिमत्तदवच्छेदकावच्छिन्नध्वंसविशेषादेर्वा प्रतिबंधकत्वे विनिगम
नाविरहादेवातिरिक्तप्रागभावकल्पनं एतावता ऽतिरिक्तपदार्थसिद्धावपि तस्याभावत्वे मानाभावइत्यादिक
मिति। सर्वत्रेति। बहुसमवायिकारणवद्यस्थलेरस्यर्थः। अयं भावः। दशातन्तुकपटादौ चरमतन्तुसंयोगसमे

५० नकालोत्पन्नस्यातत ईश्वरापेक्षाबुद्धिजन्यस्यैव दशत्वसंख्याविशेषस्य समानाधिकरणप्रत्यासत्यासत्यात त्वेन हेतुतातावतै
न्त्वानाधिकरणेषु तंतुषु पटस्यनोत्पादः। तंत्वंतांततुसंयोगानांच तं तुत्वेन विजातीयसंयोगत्वेनैव हेतुतानन्तुनत्त्र घ
२५४ टित्वेनापि। कतिपयसंयोगानुत्पाददशायां ताहशासंख्याव्यक्तिविरहादेव तत्पटानुत्पादसंभवादित्याशयेनापि हा॥ अ
२५८ भ्युपगमेनैवेति। एवकारेण तत्संयोगानां विशिष्यहेतुतानिरासः॥ नचैवं यत्र चरमतंतुसंयोगोत्पादात्पूर्वमेव ताहशा
संख्याविशेषोजातः तत्र तद्दशायां तत्पटोत्पत्त्यापत्त्यातत्र तत्संयोगानां विशिष्यहेतुत्वमावश्यकमिति वाच्यं। ईश्वरा
द्यपेक्षाबुद्धिजसंख्याविशेषस्यातींद्रियतयाफलबलेनैव कल्पनेचरमसंयोगकाल एव तदुत्पादकल्पना
त्। यत्रैव यत्र चरमतंतुत्पत्तिद्वितीयक्षणे एव संयोगोत्पादस्तत्र तृतीयक्षणे समवायीकारणाभावेन संख्याविशेषा
नुत्पत्तावपितृतीयक्षणे द्वित्वादिसंख्योत्पत्त्यनंतरमेव ताहशद्व्योत्पाद इत्येवं रूपेण द्व्योत्पाद नियमासंभव
त्यर्थः। युगपदिति। क्रमोत्पन्नेषु त्रिचितसमवायिनोनुत्पाददशायामपि समवाय्यसमवायिनिमित्तानां सा
गभावस्यैव सत्त्वात् जित्वाद्युत्पत्त्यापत्तिरतस्तत्र तत्समवायिनां तन्नेदकत्वानां वा तत्तद्घटितत्वेन हेतुतायाआव २५८

५८

श्यकत्वेन तत एवातिप्रसंगभंगेन तत्प्रागभावस्याकल्पनादिति भावः। केचित्तु क्रमोत्पन्नस्थले प्रथमोत्पन्नानंतरं द्वित्वादि
कं चरमोत्पन्नस्यैककत्वमनयोर्विशिष्य कारणत्वे नैवातिप्रसंगः संभवतीति युगपदुत्पन्नमिति व्याचक्षते। अत्र युग
पदुत्पन्नस्थले द्वित्वोत्पत्तौ द्वयोरेवाधिकरणयोस्तत्त्वेनानन्यथासिद्धत्वद्वयकल्पने लाघवं प्रागभावकल्पने च धर्मिन
न्यथासिद्धत्वनियतपूर्ववर्त्तित्वानां त्रयाणां कल्पने गौरवमतो द्वित्वमपेक्ष्य त्रित्वादीनामुक्तं। तत्र त्रित्वस्थले त्रयाणां सम
वायिनां तदेकत्वानां वा तत्त्वेनानन्यथासिद्धत्वत्रयकल्पने विनिगमनाविरहेण द्विपदश्यास्य चतुष्कादौ लाघवं त
त्र चतुर्णां समवायिनां तत्त्वेनानन्यथासिद्धत्वचतुष्टयकल्पनामपेक्ष्य प्रागभावकल्पनामात्रस्थले युक्तत्वादिति भावः।
न च तत्राप्यपेक्षाबुद्धेरेव तत्त्वेन हेतुत्वान्नातिप्रसंगः एकस्या एव ईश्वरापेक्षाबुद्धेर्द्वित्वादिपरार्द्धपर्यंतोत्पादकत्वात्।
न च तत्रापि अस्मदादेरेकत्वद्वयमात्रज्ञाने त्रित्वाद्युत्पादात्तदेकत्वत्रयज्ञानत्वेन तत्त्रित्वं प्रतिकारणत्वावश्यकत्व
मिति वाच्यं। एवमप्यस्मदादितादृशज्ञानाविषययुगपदुत्पन्नादिस्थले ईश्वरयोगिमात्रतादृशज्ञानविषयेऽपेक्षा
बुद्धेस्तथाकारणत्वकल्पनापेक्षया एकस्या एव प्रागभावस्यैकस्य कल्पनस्थले युक्तत्वात्। अत्रेदमरुचिबीजं। तादृश

[illegible] एकत्वद्वयमात्रज्ञाने [illegible] ज्ञाने त्रित्वाद्युत्पादात्तदेकत्व [illegible] ज्ञानत्वेनेति [illegible] ॥

म० त्रित्वादिकं प्रति त्रित्वादिकमेवोपलक्षणं गमनत्वसमवायिकारणतावच्छेदकं त्रित्वाद्याश्रयमात्रवृत्त्यन्यतमत्वेनैव तत्त्वा
गभावकल्पनेन तस्य तद्व्यक्तित्वेन हेतुत्वकल्पनानन्तानां भावभेदव्यक्तेरपि तत्त्वेनावच्छेदकत्वसंभवात् एवं च नित्यद्र
२५८ त्वेन त्रित्वादिव्यक्तिप्रतियोगिकानन्तप्रागभावकल्पनामपेक्ष्य लाघवान्नानन्यमात्रवृत्तेरेकस्यापि भेदव्यक्तेः कार
258 रणतावच्छेदकत्वकल्पनाकल्पनेऽत्र त्रित्वाद्युत्पादनियमस्तं भवतीति तदुपस्थितिरिच्छोपधायकज्ञानत्वस्य उपधाय
केच्छाव्यक्तयोरुपस्थितिर्न चेति इच्छाकाले ज्ञानस्य वृत्तिकाले चेच्छायाः साक्षात्कारवृत्त्यर्थं संस्कारायत्तादकाले
ज्ञानादेरुत्पादाभ्युपगमादाह योग्येति योगपद्यं युगपदुत्पत्तिः निषेधादिति तथा च तदन्यथानुपपत्त्या योग्यवि
शेषगुणानामस्वेतरतादृशगुणेन नाश्यत्वं कल्प्यत इति भावः ज्ञानाद्यंतरेति इच्छात्वस्य उपधायक
भिन्नज्ञानेच्छासाक्षात्कारवृत्त्यर्थं उपलोपधायकव्यक्तिज्ञाने विनाश्यत्वस्यत्वेन तदुत्तरक्षणे यत्नत्वमित्युत्पत्त्युपदल
स स्यकारणता[redacted]ग्राहकं च तत्र संभवात् तदूर्ध्वं सामान्यलक्षणे सत्क्षणेऽपि न संभवतीत्याशयेनाह पौर्वापर्ये २५८
ति कारणत्वग्रहसंभवादिति अवश्याभ्युपेयत्वादित्यर्थे हेतुरिच्छात्वस्य तुल्यादेति इच्छानुत्पादस्य लेश्या।
५२८

नस्य फलस्यानुत्पादस्थले चेच्छाया अभावात्सत्कारा इत्यर्थः। इदं च व्यतिरेकग्रहस्य परं हेतुः। एवं च सामान्यलक्षणए
या फलोपधायकत्वविशिष्टग्रहेपि पौर्वापर्यग्रहात्तस्मान्नेच्छाव्यतिरेके इच्छासति व्यतिरेकस्य इत्येवं रूपनियतव्यतिरे
कग्रहादनुमानादिना पौर्वापर्योपस्थितौ मनसा कार्यकारणग्रहस्यावश्यमभ्युपेयत्वेनेच्छारूपतः फलोपधाय
कत्वविशिष्टग्रहेणेत्यर्थः। अभ्युपेत्य फलोपधायकत्वेपि ज्ञानमन्यथोपपादयति। फलस्यानुत्पादेति। तथा चात्रज्ञा
नेच्छयोरन्वयग्रहोपि संभवतीति भावः। इच्छाफलयोरप्यन्वयग्रहमाह। फलस्यानंतरमिति। न चेच्छासतित्वनिर्विक ल
स्यैककालएवेच्छानाशे कथं तादृशेच्छात्वादिना अन्वयग्रह इति वाच्यं। निर्विकल्पात्मकोपनयसहकारेणे
च्छात्वविशिष्टोपनीतभानसत्तित्वविशिष्टलौकिकप्रत्यक्षात्मकज्ञानोत्पादाद्विशिष्टबुद्धौ विशेषणधियो हेतुत्वा
नभ्युपगमाच्च। अत एव सर्वं निर्विकल्पकमपि खंडितं। इत्थं च घटमिच्छामि करोमीत्येवमपीच्छायामनुव्यवसाय
इच्छात्वाद्यंशे निर्विशेष्यके विशेषणमित्येवंरूपं घटांशे च विशिष्टवैशिष्ट्यधीरूपमेवं विशेषणतावच्छेदकघट
त्वप्रकारकगुणत्वेच्छादेरन्वादितिध्येयं। यद्यपि यज्ज्ञानं कौत्वेष्टसाधनत्वादेरुपनीतभानात्मकमपेक्षा

तो। तरुति।

ऽलामाम्ले
द्वारावैपद्वे

गृहोऽपि हितार्ववतिपाठांतरं ग्र

५० बुद्धिरूपं चोपादानमप्यत्र संतत्र तत्वनंतरं त्रयाणामेव विशिष्टसाक्षात्कारः संभवति न चापेक्षाबुद्ध्यनंतं
रमिच्छादेरुत्पत्तौ नैनैवतस्य विनाशात् तृतीयक्षणे त्रयाणामप्यस्थायित्वमेव न स्यादतोऽपेक्षाबुद्ध्यनंतरमिच्छादि... तन्नाय
तरतिमतेनैव प्रकारः संभवतीति न तु पेक्ष्यज्ञाने वृत्तिकार्यकारणभावग्रहे प्रकारांतरेणान्वयग्रहमाहास्मर इतरप्रति भावः
२६० णेनेति। घटस्मरणं घटत्वविशिष्टधीजनकं घटत्वविशिष्टस्मृतित्वादित्येवं क्रमेणेत्यर्थः। ज्ञानयोरेव यौगपद्यं
२६० नेष्यत इत्याशयेनाह। विरोधीत्येति। तथा चेच्छाकाले ज्ञानस्य तृतीयकाले इच्छायाश्च सत्त्वात्क्रमोऽपि नानुपपन्न इत्यर्थः। न
नु सकलगोसमवेतत्वघटितस्य गोत्वत्वस्य विनाशामान्यलक्षणमज्ञानात्तेन रूपेण गोत्वलिंगकानुमितिर्न स्या
दिति प्रागल्भमतं निराचष्टे। गोत्वेनेति। विशेषितमिति। गोपदप्रवृत्तिनिमित्तत्वेना(ध्येत)दात्म्येन गोत्वस्य हेतुतायां
विशेषितं तत्र गोरूपादौ व्यभिचारवारणाय वृत्तियोगित्वांतमेयत्वादौ तद्वारणाय समवेतत्वं। सत्तादौ तद्वे
ध्वारणाय विशेष्यमिति। न च गोत्वस्यापि संयोगादिसंबंधावच्छिन्नगोनिष्ठात्यंताभावप्रतियोगित्वा २६०
त्समवायेन गोनिष्ठाभावप्रतियोगित्वं वाच्यं तथा च मेयत्वादेः समवायेन गोनिष्ठाभावप्रतियोगित्वात्
वा

६०

मर्थ
न नैवं वारणे समवेतत्वं मिति वाच्यं ॥ सर्वस्यैव विशिष्टाभावादिप्रतियोगित्वेन निरुक्तस्याप्रसिद्ध्या समवायेन प्रतियोगि
ता अयव्याधिकरणत्वस्याभावविशेषणत्वरूपकत्वे मेयत्वाद्यभावस्य समवायेन गोनिष्ठ त्वप्रतियोगित्वधि
करणाप्रसिद्ध्या प्रतियोगिव्यधिकरणत्वाभावेन तादृशप्रतियोगिव्यधिकरणघटत्वाद्यभावप्रतियोगित्वस्य
मेयत्वादौ सत्वेन व्यभिचारावरूपकत्वात् ॥ अविशेषितमिति समानाधिकरण्ये तत्र गवेतरासमवेतस्यापि गोत्व
स्य कालादौ वृत्त्या व्यभिचारात् समवायेन हेतुतायां अवरूपं वाच्यत्वे तादृशप्रतियोगित्वस्य समवेतत्वस्य चानु
पादानादिति भावः ॥ सामान्येति व्यासज्यवृत्तिधर्मस्य समानकल्पस्य गोत्वसामानाल्लक्षणायां तदनुमशक्यत्वादित
र्थः ॥ समानप्रकारतामात्रस्येति मात्रपदेन समानविषयत्वस्य व्यवच्छेदः ॥ जनकीभूतज्ञानाविषयस्यापि रजताविषय
त्वे रजतमात्रस्यैव सर्वविशेष्यकत्वं स्यादिति भावः ॥ ननु पवत्ररजतत्वप्रकारकेच्छातत्रतत्प्रकारता घटत्वसंबंधेन
त्वप्रकारीभूतरजतत्वाश्रयत्वसंबंधेन ज्ञानमिति चेन्मैवं कार्यकारणभावे विषयता नियामकः स्यादित्या
शंक्य निराचष्टे तादृशेति ॥ जनकज्ञानप्रकारीभूतरजतत्वाश्रयपदं वेत्यर्थः ॥ तदुत्पादाभ्युपगमे रजतत्वप्रकार
केच्छोत्पादाभ्युपगमे ॥ वृत्तय मरजतेति ॥ अनागतशुक्तिविषयकादिदं रजतमितिभ्रमायत्र रजतत्वप्रकारिकायाः

५० नौछात्तत्रव्यभिचारान्नमाहश कार्यकारणभाव इत्यर्थः । ननु रजतत्वासंसर्गाग्रह एव रजतत्वप्रकारकेच्छायां विष
यतानियामकोऽस्त्वित्यत आह । अनुपस्थिते चेति । असंसर्गाग्रहस्यानुपस्थिते रजते घटादौ च तु [illegible]
क्रियासे पे घटत्वांशे निर्विकल्पकाभावाद्ग्राहकानिर्णय [illegible] त्वपितिसमभिधानं [illegible] मिति [illegible]
२६१ [illegible] नं तथ्यं । वक्तिने तत्समानाधलक्षणाभावव्याप्य पक्षं जनितिसोपलसमन्वयमाशेपासमानाधिकरण्यविशिष्टसैवयं
२६१ त्वव्यवकारकेन [illegible] न [illegible] मेव तत्साहस्त्राज्ञानवत्त्वं [illegible] एणं व्यवस्था
[illegible] तु त्वव परकीयज्ञानविषयोघटोऽन सापरस्त्राहयायटत्वान [illegible] वृत्तितेशयोनत्पादिदोषदर्शनसत्त्वा
जतत्रव सर्वपत्ते परकीयज्ञानविषयरत्नं तत्र [illegible] समानाधिकरणाययटत्वप्रकारकज्ञानतां न चेति सत्त्वं
मे [illegible] प्रकारकत्वाहरात्तानातेमवान्नात्मत्वेनाह [illegible] प्रकारकसौन वत्व [illegible] व्याप्यत्वज्ञानमिति विशेषदूर्ष
[illegible] भावाता हशघटज्ञाने तंशयोनानुपपत्तिरिति तिवांतत्तात्पर्यमिति निवर्धश्रम ॥ ॥ मूलेव्यभिचारिज्ञानस ति
[illegible] विद्वित्तियोज्ञानायां कस्यताषौर [illegible] मातितिविषय विषयत्तस्पोतितेगत्वाद्योपाद्यानत्वासंभवादाह २६१
५२

५० स्यत्वात् रजतमात्रविषयकज्ञानात् घटादावपि रजतत्वप्रकारकेच्छा स्यादिति भावः। यद्यपि इमे युत्वादिनोपस्थि
तेपि असंसर्गाग्रहेन नियामकत्वमनुपस्थितस्य त्वनुपपन्नं तथाप्यन्यथाख्यात्यनंगीकर्तृमतेरिदं रजतमि
२ त्याकारकव्यवहारजनकोपस्थितिविशेषविषयेन तदसंसर्गाग्रहस्य तद्विषयकेच्छत्वनियामकत्वं संभवतीति त
थावर्न्नेनायानुपस्थितस्यक्तेः ननु रजतत्वप्रकारकेच्छायामगृहीतासंसर्गस्य निखिलस्यैव विषयत्वेऽपि
ज्ञप्तिविरहः उपादानप्रत्यक्षाभावादेतच्चेतन्न प्रवृत्त्यभावोपपत्तेरत आह। वस्तुतः इति। तद्विषयकर
जतत्वप्रकारकेच्छायां तदगृहीतासंसर्गकरजतत्वप्रकारकज्ञानत्वेन रजतत्वप्रकारकज्ञानत्वेन वा कार
णत्वकल्पनां असंसर्गाग्रहस्य सहकारित्वकल्पनां चापेक्ष्य तद्विषयकरजतत्वप्रकारकज्ञानत्वेनैव हे
तुत्वं लाघवात् कल्प्यत इति भावः। कथं नियामकत्वं तद्दर्शयति। सामान्यत इति। तत्प्रकारकत्वं रजतत्वप्र
कारकत्वं लाघवाद् असंसर्गाग्रहादेरवच्छेदकत्वं हेतुत्वं चापेक्ष्य लाघवात्। नन्वेवं रजतत्वप्रकारकत्वस्य
तद्विषयकत्वस्य च परस्परं विशेषणविशेष्यभावे विनिगमकाभावात्कारणताद्वयस्यावश्यकत्वे। संस

भ० र्गग्रहस्य हेतुत्वमपेक्ष्य कलाघवं। किंच रजतत्वप्रकारकज्ञानस्य सुखत्वप्रकारकज्ञानस्य च विशेष्यभे
देनैव कारणताभेदः स्यादत आह। अस्तु वेति। अतिप्रसंगेति। अतिप्रसंगः एकपुरुषस्य रजतत्वप्रकारक
ज्ञानात्पुरुषांतरस्य रजतत्वप्रकारकेच्छापत्तिः। एवं एकविषये रजतत्वप्रकारकज्ञानसत्त्वे विषयांतरे रज
२६२ तत्वप्रकारिकेच्छापत्तिरतस्तन्मार्गाय एकस्यामेव कारणतायामुभयं प्रत्यासत्तिः। तथा च यद्ज्ञानं यज्ज्ञात्म
नि समवेतं यत्र विषये रजतत्वप्रकारकं तदात्मसमवेतां विषयतासंबंधेन तत्र विषये रजतत्वप्रकारि
कामिच्छां जनयतीति भावः। ननु समानप्रकारकत्वमेव प्रत्यासत्तिरस्तु समानविषयत्वं तु कारणता
वच्छेदकं अस्त्विति वाच्यं। तथा सति सुखव्यक्तिभेदेन सुखप्रकारकस्य विशेष्यभेदेन च कार्यकारणभा
वस्यानंत्यं स्यात् किंच सुखस्य प्रमेयत्वादिना ज्ञानेच्छाविरहात्सुखदुःखाभावत्वादिप्रकारकधीत्वेन प्र
[illegible]च्छायां इच्छाविषयसाधनतावच्छेदकप्रकारकधीत्वेनोपायेच्छायां च हेतुत्वमावश्यकमतः समानप्रका
रकत्वस्य न प्रत्यासत्तित्वमिति। ननु विषयतासंबंधेन वृत्त्यनियामकत्वेन तदवच्छिन्नप्रतियोगिताया २६२

त्वभावात्तेन संबंधेन व्यापकत्वं तया च कृत्स्नपक्षत्वासत्त्विरतज्ञाता। असंसर्गाग्रहादेरिति। यत्तु रजतारजत
योरिमे रजतारजते इति समूहालंबनाद्रजतत्वप्रकारि कारकेच्छा सर्वत्रैव स्यात्समानविशेष्यकत्वप्रत्यासत्त्येत्य
स्यत्वादिति। न तारजतत्वप्रकारकतानिरूपितविशेष्यतासंबंधेन यत्र यज्ज्ञानं तत्र तत्प्रकारकेच्छा इत्येव मुक्तौ दो
षाभावादिति। यदपि तत्र चैत्रस्य रजतत्वप्रकारकज्ञाने रजते मैत्रस्य चक्षुःसंयुक्तौ चैत्रस्य शुक्तावपि रज तत्वप्रका
रकेच्छापत्तिः विषयतासंबंधेन मैत्रीयस्य रजतत्वप्रकारकज्ञानस्य तत्र सत्त्वात् चैत्रीयस्य समवायेन तदात्म
निसत्त्वादिति। तन्न उभयप्रत्यासत्त्यवच्छिन्नेच्छाकारणतायां तत्क्षतिप्रसंगस्य मुद्गरप्रहतत्वात्। न हि विष
यतया रजतत्वप्रकारकेच्छाया विषयतया यस्य कस्यापि तत्र रजतत्वप्रकारकं ज्ञानं सहकारि। येन नाहदास
हकारिवशाद्वह्निविद्धर्मिकस्वीयरजतत्वप्रकारकज्ञानेनात्र रजतप्रकारिकेच्छापत्तिः स्यात्। परं तु एकं र
जतत्वप्रकारकं ज्ञानं यत्र विषयतया प्रत्यासन्नं यच्चात्मनि समवायेन स्थितं तत्र विजये रजतत्वप्रकारिका

म०

मिश्रं तदात्मसमवेतां जनयतीति। अन्यथा परामर्शस्य सामानाधिकरण्यप्रत्यासत्त्यानुमितिजनकत्वेपु
ष्कातिप्रसंगः स्यात् व्यधिकरणपरामर्शस्य कालिकतयातीतस्वीयपरामर्शस्य समवायेन प्रत्यासत्त्या व्यधि
करणपरामर्शसत्वे प्यनुमित्यापादनसंभवादिति न किंचिदेतत्। समानविषयत्वस्येति। तथा च तद्विषयक
२६३ रंजनत्वप्रकारकेच्छां प्रति तद्विषयकरंजनत्वप्रकारकधीत्वेन कार्यकारणभावो विशेष्यभेदेन भिन्न
एव वाच्य इति भावः। समानप्रकारकत्वस्य घटकत्वात् कोटाविति निवेशो पीत्यपि नाजमासन्नित्वं समुचितं।
ननु समानविषयत्वस्य प्रत्यासन्नित्वे रंजनत्वप्रकारकज्ञानत्वस्य कारणतावच्छेदकस्याविशेषात्कथं यथा
र्थत्वायथार्थत्वरूपं कार्यवैलक्षण्यं। मन्मते तु दोषाभावभेदाग्रहस्यात्यक सहकारिवैलक्षण्य—दुपस्थि
तिः स्यादत आह। कारणेति। तथा विधः। यथार्थत्वायथार्थत्वरूपः। एतेन। कारणयथार्थत्वायथार्थत्वस्य
नियामकत्वेन। तत्प्रकारकं। रंजनत्वप्रकारकं। दोषाभावसहितमिति। तेन रंजनत्वप्रकारकज्ञानात् शुक्तौ न
संवादिनी इच्छा तत्र दोषस्यैव सत्त्वादिति भावः। उपस्थितेति। उपस्थिते यद् रंजनं तत्त्रयोरंजतभेदाग्रहस्तत्सहितमि २६३

त्वर्थः॥ त्वदिशेति। यथोपस्थितरजतत्वप्रकारकत्वविशिष्टभेदाग्रहाभावादनुपस्थितेऽपरजते रजते वा न विसंवादि
नीच्छा तथोपस्थितं यद्रजतं तत्त्वप्रकारकत्वविशिष्टभेदाग्रहस्य हेतुत्वकल्पनये वानुपस्थितेऽपरजते रजते वा संवादिनी
च्छाभावोपपत्तौ न दोषाभावस्य गुरोः कारणत्वं कल्पयितुमुचितमिति भावः॥ तथा चानागतरजतोपस्थितत्वर्थमपि
सामान्यलक्षणाऽऽवश्यकीति हृदयं भेदाग्रहस्येवेत्येवकारेण दोषाभावव्यवच्छेदः। दोषाभावापेक्षया लाघवं
दर्शयति। दोषाणामिति। रजतभेदग्रहेति। दोषाणामानन्त्यात्तत्त्वेन तत्त्वेन तदभावानां हेतुत्वकल्पनेऽनंतका
र्यकारणभावापत्तिरतो रजतभेदग्रहप्रतिबंधकाभावत्वेन हेतुता वाच्या। तथा च तदपेक्षया रजतभेदग्रहा
भावत्वेनैव हेतुत्वमुचितमिति भावः॥ न च भवतामपि रजतत्वाभावादिग्रहाभावस्यापि विनिगमनाविरहाद्धेतु
त्वं स्यादिति वाच्यं। रजतत्वांशेऽन्याप्रकारकरजतत्वप्रकारकेच्छां प्रति रजतत्वाभावग्रहस्यापि विरोधित्वा
त्तथात्वे चाभावद्वयकारणतामपेक्ष्यानंतदोषाभावस्य गुरुत्वादिति॥ इदमुपलक्षणं। दोषाभावस्यानंतनिष्ठ

लघुत्वास्ति १

म० तथा हेतुत्वे च (हेतुत्वे) रजतरंगयोर जतत्वभ्रमाद् जाते संवादिनाक्छानस्यात् विषयनिष्ठतया हेतुत्वे च रंगे रजतत्वभ्रम
कालेप्युपस्थितेऽनुपस्थिते वा घटादौ तादृशादोषाभावसत्त्वात्। संवादिनी रजतत्वप्रकारिके छास्यात्। एवं विसंवा
दिन्यामुपस्थितारजतभेदाग्रहस्य हेतुत्वेपि यत्र यं वित्त्वनुपस्थितारजतभेदाग्रहसत्त्वात्तादृशे छापत्तिः स्यात् दो
२६४ षस्य चोक्तभेदाग्रहत्वेनैं दोषस्यानुगमादनुगमस्तु तदवस्थ एवेत्यादिकमूह्यं। सिद्ध एवेत्येव कारेणानागतव्यवच्छे
२६५ दः। ननु सिद्धत्वस्येच्छाविरोधित्वात् कथं सिद्धेर् इच्छेत्यत आह। लाघवादिति। तत्प्रकारकावच्छेदेनेति। यत्किंचित्सु
खत्वसामानाधिकरण्येन सिद्धत्वग्रहेपि सुखत्वावच्छेदेन सिद्धत्वग्रहाभावो वर्त्तत एवेति भावः। ज्ञानमेवे
ति। ननु सिद्धत्वमपीत्येवकारार्थः। स्वरूपसत्सिद्धत्वस्येच्छाविरोधित्वेप्यनागते सिद्धत्वज्ञानकाले इच्छानुदयात्
सिद्धत्वज्ञानस्य विरोधित्वमावश्यकं। तथा च कल्पनालाघवात्तस्यैव तथात्वमस्तु न तु स्वरूपसत्सिद्धत्वस्ये
ति भावः। तत्सुखत्वावच्छेदेन सिद्धत्वज्ञाने। प्रसन्ने। सिद्धसुखे। सिद्धत्वं नेच्छाविरोधीत्यत्र युक्तिमाह। कथमन्य २६४

३

चेति। अन्यथा स्वरूपसत्सिद्धत्वस्य भिन्नरूपेण सिद्धत्वज्ञानस्य चेच्छाविरोधित्वे। जीवितस्येति कांतामरण
ज्ञानस्येच्छासामग्र्याः संयद्यनायः यद्यपि बाधितेपाच्छेदयान् ज्ञातकांतामरणनाम पीछामवत्येवतथापि बा
धनिश्चयस्य प्रतिबंधकत्वमभ्युपेत्याह। अज्ञातकांतामरणस्येति। च्पसिद्धेकांतां तर वलोकनेच्छानानुपपन्नेत्यत
तत्कांतेति। अतिरिक्तस्या। सिद्धत्वेनज्ञातातिरिक्तस्यानवनवतत्कांतावलोकनत्वेनानागतघटेच्छेवेच्छाविषयता
स्यादिति वाच्यं। तत्कांतावलोकनत्वेनघटादाविच्छोत्पादकदोषाभावात्। अनागतानंतपदार्थेतादृशेच्छा
विषयत्वकल्पना मपेक्ष्यतत्कांतावलोकनत्वेनज्ञातेकतिपयावलोकनएवेच्छाविषयत्वकल्पनेलाघवाच्चे
ति। लाघवादसिद्धत्वज्ञानमेवेति। यद्यपि भ्रमत्वेनाज्ञातसिद्धत्वनिश्चयाभावापेक्षया भ्रमत्वेना। निश्चायमा
नं च्यसिद्धज्ञानमेव गुरु तथापि यत्र विषयविशेषे भ्रमत्वेनाज्ञातेएव सिद्धत्वा सिद्धत्वज्ञानेनत्रोक्तलाघ
वस्योक्तत्वादिति। विशेषरूपावच्छेदेन। तत्र सुखत्वादिना। सामान्यरूपेण। सुखत्वादिना। तदा। सिद्धेसुखे।

नैयायिकमतरीत्या एकतानैव स्वरीत्यातान्न घया[तन] धारणापात्संसर्गाग्रहएव हेतुः प्रमान्यज्ञाने सर्वजैतन्मते भ्रमात्मकं भवज्ञानं भ्रम एक देश प्रमतहर्षे

५० सिद्धत्वप्रकारकज्ञाने। तान्न इयं वेति। तथा च तत्साध्याधारत्वायत्वंशोपाहिता सिद्धत्वासंसर्गग्रह एवान्य
थाख्यात्यनंगीकर्तृणां क्लृप्य इति भावः। ननु असंसर्गग्रहमात्रेणैव भ्रमसंभवे सप्रकारकप्रत्यक्षमात्रस्यै
व भ्रमत्वापातः तस्य तो दोषविशेषाणामपि तत्वेन हेतुत्वं वाच्यं। तथा च यत्र सिद्धेः सिद्धत्वभ्रमजनकदोषाभाव
२६५ स्तत्रैव छानस्याद तो सिद्धत्वप्रमोत्पादाय सामान्यलक्षणा वाच्येत्यत आह। सामान्यलक्षणेति। सुखत्वसामान्य
265 लक्षणया वर्त्तस्वर्गत्वात् असिद्धसुखस्य सुखत्वेन ज्ञाने भवतु न दसिद्धत्वस्य ज्ञानं तु कुत इति भावः। ननु सामान्य
लक्षणया सुखत्वेनोपस्थितेऽनागतसुखे सुखं वर्त्तमानप्रागभावप्रतियोगिवर्त्तमानकालावृत्तित्वे सत्यतीतका
लावृत्तित्वादित्यनुमानादसिद्धत्वं सुग्रहमेवेत्यत आह। वस्तुतस्त्विति। एतत्कालवृत्तिप्रागभावप्रतियोगि
त्वरूपस्यैतत्कालप्रतियोगिकध्वंसाधिकरणासत्त्वोत्पत्ति[ख]रूपस्य वा असिद्धत्वस्य पक्षधर्मताबलात्सि
द्धिसंपादनाय यदि ति। अतीतसुखादेरपि वर्त्तमानध्वंसादिरूपाभावप्रतियोगित्वादसिद्धत्वस्य स्वरू २६५

८

पाल्लाभायसाध्येप्रागभावपर्यंतं। प्रागभाववत्त्वमखंडोपाधिरतोनाननुगमः। प्रागभावेमानाभावेत्याह। सुखो
त्पादेति। सिद्धसुखेप्यापत्तिर्द्वितीयलक्षणवृत्तिध्वंसप्रतियोगिअप्रमज्ञ लक्षणवृत्तित्वादसिद्धत्वस्वरूपलाभो नस्या
त्। अतऽनुत्पादेति। अतीतसुखोत्पादाधिकरणस्थूलमहाकालवृत्तिध्वंसप्रतियोगित्वमादायोद्देश्यासि
द्धिवारणाय कालपदं लक्षणपरं न वोत्पत्तेः क्षणस्य च स्वत्वघटितत्वात्सिद्धसुखोत्पत्ति अपि सुखोत्पत्तिसाधा
रणस्योत्पत्तित्वस्य तदधिकरणलक्षणसाधारणस्य लक्षणत्वस्यैव तस्याभावात् पंचम्याश्रियहइति वाच्यं। सुखो
त्पत्तिलक्षणवृत्तित्वे संबंधेन कालिकतयास्वावच्छिन्नत्वसंबंधेन सुखविशिष्टो यो ध्वंसस्तत्प्रतियोगिकालवृ
त्तित्वस्याननुगतत्वादिति मलयाननुपगमे हेतुमाह। कालत्वादिति। तदनुपगमे त्वाह। एतनाहश्रेति। इदानी
तननस्यभावाधिकरणोत्पत्त्यर्थः। अंत्योपांत्यलक्षणयोर्व्यभिचारवारणाय इदानीं तनेति। नन्वनागतसुखप्रा
गभावस्य व्यापकत्वात् ज्ञानात्कथं तदनुमितिरत आह। निपुणतरमिति सुखप्रागभावत्वेन सिद्धसुखे +
प्रागभावसमव्यापकत्वज्ञानाऽरसिद्धसुखे।

५० प्रागभावस्यापि पक्षधर्मताबलादनुमितौ भानेन समानप्रकारकत्वस्य नियामकत्वाच्च नातिप्रसंग इति भावः। प्र
कृमणिदीधितावित्ति। अनागतपाकानुमानप्रस्ताव इति भावः। ननु प्रमेयत्वादिना घटत्वप्रकारकनिश्चयस
त्वात्कथं घटत्वप्रकारकः संशय इत्यत आह। संशयसमानाकारो हीति। न केवलं प्रकारस्य समानत्वं किंतु प्रका
रतायामपितदात्म्यमिति भावः। कोटितावच्छेदकं घटत्वेति। घटो न वेति संशये तादात्म्येन घटस्यैव कोटित्वा
२६६ द्घटत्वं कोटितावच्छेदकमिति भावः। तथा। कोटितावच्छेदकघटत्वांशे निष्प्रकारकः। तत्र प्रमेयत्वस्यैव घटत्वां
२८ शे प्रकारकत्वादिति भावः। अत एव। समानाकारेति। निश्चयस्यैव विरोधित्वादेव। नन्वेवं तदंशे घटत्वत्वप्र
कारकत्वाद् घटत्ववानिति निश्चयोपि न तादृशसंशयविरोधी स्यादत आह। घटत्ववानितीति। ब्रदान्यतासंदे
हमिति तत्कोटिकसंदेहं प्रति तदन्यावृत्तित्वविशिष्टस्य दर्शनस्य यथाविशेषदर्शनतया विरोधितयात
दन्यावृत्तित्वविशिष्टधर्मवत्ताज्ञानस्यापि विशेषदर्शनं व्यावर्तकधर्मदर्शनविधया विरोधित्वमनुम २६६
वबलादाश्रीयत इति भावः। यद्यपि तादात्म्येन घटकोटिकसंशयं प्रति घटेतरावृत्तित्वविशिष्टधर्मव

त्वाज्ञानंव्याप्यदर्शनमेवेतिस्यात्तथ्येणविरोधित्वप्रदर्शनमनुचितंतथापितादात्म्येनघटभेदेन
कोटिःकिंतुघटभेदभावोस्वरूपसंबंधेनकोटीतयापिघटेतरावृत्तित्वविशिष्टधर्मवत्त्वाज्ञान
स्यविरोधित्वमापर्यंतयोक्तेः।अतएवपक्षेकेनापिप्रकारेणव्याप्यदर्शनंविनासंभवतीतितदृष्टो
तयत्तिपुरुषारत्नीति।घटइतिनिश्चयंजनातीति।निश्चयपदंज्ञानसामान्यपरं।निश्चयत्वस्य
कार्यतानवच्छेदकत्वात्घटोनवेत्याकारकसंशयेतादृशज्ञानस्यजनकत्वाच्च।ननुप्रमेयसा
मान्यलक्षणेवयावत्प्रमेयगोचरंनिर्विकल्पकंजन्यतामतआह।सामान्येति।ननु
प्रमेयत्वप्रकारकप्रमेयत्वज्ञत्वापेक्षयाप्रमेयप्रत्यक्षत्वस्यलघुत्वात्तद
वजन्यतावच्छेदकंतत्रचनिर्विकल्पकसाधारण्यमतआह।विशिष्टज्ञानेति।प्रमेयत्व

ज्ञानस्यैव प्रत्यासत्तित्वाद्विशिष्टसामग्रीसत्वादर्थवशात्संपन्नमेव विशिष्टज्ञानमिति भावः
भा॰ यद्यपि घटो न वेति संशयानुरोधेन घटत्वांशे निर्विकल्पकज्ञानमावश्यकं न च तादृश
२६७ निर्विकल्पकसत्त्वेपि दोषादेव घटः स्यादिति न ज्ञानमिति वाच्यं ॥ घटत्वांशे निर्विकल्पकाभा
267 वात्तत्तादृशज्ञानमित्यस्यासंगतत्वापातात् तथापि यत्र प्रमेयवानिति सामान्यलक्षणाज
न्यनिर्णयोत्पत्तिकाले तादृशदोषाभावेनेतरक्षणे घटत्वांशे निर्विकल्पककोटिस्मरणं संश
यजनकदोषोत्पत्तिश्च ततो घटो न वेति संशयः। तत्र प्रमेयवानिति निर्णयस्य घट इत्याकारक
संशयो नानुपपन्न इति सिद्धांततात्पर्यमिति वयं ॥ मूले व्यभिचारिज्ञाने सति उपाधिज्ञानादिति २६६
योजनायां कल्पनागौरवान्न व्याप्तिनिश्चय इत्यस्यासंगतेर्न्नाशंकोपेक्षा तस्यासंभवादाह ॥

त्ताज्ञानंव्याप्यदर्शनमेवेतिस्वातंत्र्येणविरोधित्वप्रदर्शनमनुचितंतथापितादात्म्येनयत्रघटोनकोटिःकिं
तुघटभेदत्वभावोस्वरूपसंबंधेनकोटीतत्रापिघटेतरावृत्तित्वविशिष्टधर्मवत्ताज्ञानस्यविरोधित्वप्राप्त्यर्थं
तथोक्तं॥अतएवयत्रकेनापिप्रकारेणव्याप्यदर्शनत्वंनसंभवतितत्रदृष्टांतयति।पुरुषादृत्तीति॥घटइति
निश्चयंप्रतीति॥निश्चयपदंज्ञानसामान्यपरं॥निश्चयत्वस्यकार्यतानवच्छेदकत्वात्॥घटोनवेत्याका
रकसंशयेतादृशज्ञानस्यजनकत्वाच्च॥ननुप्रमेयसामान्यलक्षणेवयावत्प्रमेयगोचरंनिर्विकल्पकंज
न्यतामतआह॥सामान्येति॥ननुप्रमेयत्वप्रकारकप्रमेयप्रत्यक्षत्वापेक्षयाप्रमेयप्रत्यक्षत्वस्यलघु
त्वात्तदेवजन्यतावच्छेदकंतच्चनिर्विकल्पकसाधारणंमतआह॥विशिष्टज्ञानेति॥प्रमेयत्वज्ञानस्यै
वप्रत्यासत्तित्वाद्विशिष्टसामग्रीसत्वादर्थवशात्संपन्नमेवविशिष्टज्ञानमितिभावः॥यद्यपिघटो
नवेतिसंशयानुरोधेनघटत्वांशेनिर्विकल्पकज्ञानमावश्यकं॥नचतादृशनिर्विकल्पकसत्त्वेपिदो
षादेवघटोऽसइतिनज्ञानमितिवाच्यं॥घटत्वांशेनिर्विकल्पकाभावान्नतादृशंज्ञानमित्यस्यासं
गतत्वापातात् तथापियत्रप्रमेयवानितिसामान्यलक्षणाजन्यनिर्णयोत्पत्तिकालेतादृशदोषा

म०
२६७
267

भावोनंतरक्षणे घटत्वांशे निर्विकल्पकको टिस्मरणं संशयजनकदोषोत्पत्तिस्ततो घटो न वेति सं
शयः तत्र प्रमेयवानिति निर्णयस्य घट इत्याकारकत्वे संशयो न स्यादित्याक्षेपे घटत्वांशे निर्विकल्प
काभावात्तादृशनिर्णयस्य न घट इत्याकारकत्वमिति समाधानं सम्यगिति अभ्युपगंतव्यं ॥ वस्तुत
स्तु सामान्यलक्षणाव्यवस्थापकं प्रति सोपहासमयमाक्षेपः ॥ सामान्यलक्षणया विश्वस्यैव घटत्व
प्रकारकतादृशज्ञानसत्वादात्मत्वमेव तादृशज्ञानवत्वव्याप्यं गृहीतं तथा च सामान्यलक्षणं व्यव
स्थापयितुस्तव परकीयज्ञानविषयो घटो न वा परस्तादृशघटज्ञानवान्न वेति संशयो न स्याद्विशे
षदर्शनसत्वात् अत एव पूर्वपक्षे परकीयज्ञानविषय इत्युक्तं ॥ सर्वस्य सामान्यलक्षणया घ
टत्वप्रकारकज्ञानसंभवेपि घटत्वांशे अन्याप्रकारकतादृशज्ञानासंभवान्नात्मत्वे तादृशघट
त्वप्रकारकज्ञानवत्वव्याप्यत्वज्ञानमिति विशेषदर्शनाभावात्तादृशघटज्ञानसंशयोना
नुपपन्न इति सिद्धांततात्पर्यमिति ब्रूमः (सामान्यल) मूले व्यभिचारिज्ञाने सति उपाधिज्ञाना
समाप्ता दिति योजनायां कल्पनागौरवान्न व्याप्तिनिश्चय इत्यस्यासंगतत्वाच्चोपोद्घातसंभवादाह ॥ २६७

बपं २

प्रसंगादिति। अन्यतरस्यानुपेक्षणीयत्वं प्रसंगः। ततः सर्वग्रंथे येन क्रमेण स्मर्तव्यं तत्र दर्शितायोपाधितानादिस्यादिम
लंक्या व्याप्तिग्रहोपायेसात्वकविदुपाधिसंदेहादित्यत्र व्याप्तिनिश्चयाभावप्रयोजकीभूततव्यभिचारसंशयकारण
ज्ञानविषयत्वेनोपाधेः स्मारितत्वादिति भावः। इत्थं च मूलेन व्याप्तिनिश्चयरत्यनंतरेण क्रमतइति शेषः। साध्य
त्वसाधनत्वेऽध्यापात्वव्यापकत्वरूपे। अभिमानस्याविशेषणत्वेऽयज्ञनतदभिमानत्वजव्याप्तिसाधनावच्छेदका
दानां प्रवेशावश्यकत्वे वैयर्थ्यमेत्यत आह। योयइति। यदवच्छिन्नव्यापकत्वे सति यदवच्छिन्नाव्यापक इत्यर्थः। तेन गुण
कर्मान्यत्वे सति सत्तावान् द्रव्यात्वेतिमादौ संयोगात् गुणकर्मान्यत्वे सति सत्वादित्यादौ न द्रव्यत्वेऽव्याप्तिर्व्याप्तिस्वरूपे
लेति। एकप्रकारेणैकसंबंधेन चेत्यर्थः। तेन द्रव्यत्वत्वेन समवायसंबंधेन वह्निधर्मवान् प्रति व्यापकस्य द्रव्यत्वस्य वित्वादिना
संयोगादिसंबंधेन वाऽधर्मं वह्निं वा प्रत्यव्यापकत्वेऽपि वह्निमान् धर्मादित्यत्र धर्मवान् वह्नेरित्यत्र च द्रव्यत्वादौ नाति
व्याप्तिः। तदुक्तिरेव तेनाभावप्रतियोगित्वरूपव्यापकत्वस्य प्रवेशे अन्योन्याश्रयत्वापत्तेराह। साध्यनिष्ठव्याप्ति
धर्मवान्नैवेत्यत्र चाह हेतुधर्मरूपोपाधेः साध्यव्यापकत्वं साधननिष्ठव्याप्तिनिरूपकत्वं संबंधमनिष्ठादेधर्मव्याप्तिग्रहेत्वा

भ० ंधनव्यापकतत्सामग्र्यात्मकोपाध्यभावज्ञानं कारणं। आर्द्रेंधननिष्ठतत्सामग्र्या व्याप्तिग्रहे च द्रव्यत्वादिरूपोपाध्यभाव
ज्ञानं कारणमिति क्रमेण न व्याप्याद्यारस्तंभवात् अन्योन्याश्रयएवं न संभवतीत्यनस्तादुपपादयति। क्वचेति। सानुपा
२६८ धिनिरूपिता साध्यनिष्ठा व्याप्तिः। यावदुपाधिव्यापकव्यापकत्वरूपा निरुपाधित्वेति। यावत्स्वव्यभिचारिव्यभिचारिसाध्य
सामानाधिकरण्यरूपा नैरुपाधिकत्वज्ञाने हेतुत्वे व्याप्तेरप्रवेशेनान्योन्याश्रयासंभवादिति। अत एव ज्ञानादेवेति एवं
268 कारेणोक्तरूपसाध्यव्यापकत्वाद्यतिरिक्तनैरुपाधिकत्वांतरज्ञानव्यवच्छेदः। धूमनिष्ठार्द्रेंधनव्याप्तिग्रहे यावदार्द्रेंध
नव्यापकव्यापकत्वो धूम इति ज्ञानं कारणं वाच्यं। आर्द्रेंधनव्यापकं चार्द्रेंधनमपीति तत्रापि धूमनिष्ठव्याप्तेस्तन्नि
रूपकं ज्ञानमपेक्षितं तत्र चार्द्रेंधने धूमनिष्ठव्याप्तिनिरूपकत्वग्रहे सति धूमनिष्ठतद्व्याप्तिग्रहः। धूमनिष्ठतद्व्या
प्तिग्रहे च सति विशेषणज्ञानात् तद्व्याप्तिनिरूपकत्वमार्द्रेंधने ग्राह्यमित्यन्योन्याश्रयः। धूमनिष्ठव्याप्तेस्तन्निरूपकत्व
स्य च ग्राह्यस्य च भेदान्नान्योन्याश्रयः। अत एव यावदुपाधिव्यापकव्याप्यत्वमुपेक्ष्य तद्व्यापकत्वमित्यनेन मतांतरमाह।
व्यापकत्वमित्यादिना। अविशेषितव्यापकत्वकथनेऽपि तद्व्यापकत्वं निविष्टं तत्र तन्निष्ठव्याप्तिनिरूपकत्वमेव २६८

त्यनवस्था। अन्यथोपाधिव्यापकत्वस्यात्र न द्विनिष्ठात्वं तदभावावच्छिन्नप्रतियोगित्वरूपत्वेन व्यापकत्वस्य प्रवेशे। न च रक्षायान्त्रा
संभवात्। स्वमते तु उपाधिनिष्ठसाध्यव्यापकत्वमात्रं साध्यनिष्ठव्याप्तिनिरूपकत्वरूपं तु उपाधिव्यापकेत्यादौ अन्य
दृष्टाव्यापकत्वस्य प्रवेशेऽपि। अन्योन्याश्रयापरीलशत्। अत एवोपाधेः साध्यव्यापकत्वमिति विशेषितमेव स्वत्वयुक्तं
तत्र विष्टेति। अनौपाधिकत्वशरीरनिविष्टउपाधित्वप्रविष्टेत्यर्थः। संप्रदायरीति। अपदार्थव्याख्ये वा स्वरसः। ननु
तदधिकरणानधिकरणत्वमुपाधिताघटकसंबंधेन तदधिकरणवृत्तित्वं अन्यथासंबंधभेदमादायामानेत
याचद्रव्यसत्त्वादित्यादौ सत्त्वाधिकरणगुणनिष्ठसंयोगाद्यभावाधिकरणवृत्तित्वस्य संयोगे सत्त्वात् साधनाव्यापक
त्वसमर्थनेऽपि जातिमान् मेयत्वादित्यादौ सत्त्वादेः समवायेनोपाधित्वं न स्यात् मेयत्वाधिकरणसामान्यादिनिष्ठसत्ता
भावाधिकरणसामान्यादौ समवायेन वृत्तेरप्रसिद्धत्वात् तदधिकरणवृत्तित्वस्य सत्तायामसंभवात्। एवं द्रव्यं सत्त्वा
दित्यादौ विशिष्टसत्त्वस्योपाधिकरणाधिकरणत्वविरोधित्वं लब्धं। तत्प्रतियोगित्वविशेषणमिति दर्शयति। यत्प्र
तियोगित्वमिति। तदधिकरणे ज्ञायमानमधिकरणत्वं तदधिकरणाधिकरणत्वं सप्तम्याः ज्ञेयार्थकत्वेन ज्ञान

त्वं न स्याद्विशिष्टस्यानतिरेकेण गुणादावन्तर्भूतस्य सत्तासत्त्वात् तदाह तदधिकरणेति। विशेष्यार्थकेन ज्ञातदधि

भ०
विषयत्वलाभात्। विरोधित्वं च ग्रहप्रतिबंधकग्रहविषयत्वं यादृशप्रतियोगित्वज्ञाने यदधिकरणे प्रतियोग्यधिकरण
त्वग्रहप्रतिबंधकत्वादृशप्रतियोगित्वमिति फलितार्थः। कीदृशं तदित्यत आह-प्रतियोगीति प्रतियोगिपदस्यैव प्रतियोगिव्यधि
करणाभावप्रतियोगित्वार्थकत्वेन इन्निष्ठाभावे तादृशाभावत्वस्य नैयर्थ्यमत आह प्रतियोगिव्यधिकरणत्वेनेति।
२६४ न च कालः कालपरिमाणवान् मेयत्वादित्यत्र कालिकसंबंधेनोपाधौ घटादावव्याप्तिः। तेन संबंधेन काले प्रतियोगिव्य
अवस्थी धिकरणस्याप्रसिद्धेरिति वाच्यं प्रतियोगितावच्छेदकसंबंधेन निरुक्तप्रतियोग्यनधिकरणसाध्यवन्निष्ठाभावप्रति
२६५ योगितायां यद्धर्मावच्छिन्नत्वयत्संबंधावच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नस्यैव साध्यव्यापकत्वादि
ति भावः। स्वच यं वक्ष्यमाणस्य सरूपामोपि ज्ञातत्वनयत्वादित्यत्र साधनावच्छिन्नसाध्यव्यापकस्य शाकपाकजत्वस्य साध
नस्याविपक्षधर्मत्वात्पक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्यासंभवात्। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र बहि
र्द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वस्योद्भूतरूपस्य प्रत्यक्षस्पर्शाश्रयत्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वसंभवा
त्सांकर्यमत आह। अनयोरिति। अग्रे इति। पक्ष प क्षे हेतुमत्त्वसाध्याभिमित्यादिग्रंथे रत्यर्थः। पक्षादितर

२६४

53

इति पंचम्या तत्पुरुषे सर्वनामकार्ये प्रसक्ते नरस्मिन्निति स्यादतो बहुव्रीहिमाह। एतदितरेति। पक्षेतरस्याप्रमेयत्वादेः पक्षेवि
सत्वात्साध्याव्यापकत्वमत आह। भावप्रधाने त्विति। न च भावप्रधाननिर्देशादेव सर्वनामकार्याभावे बहुव्रीह्या[illegible]श्रयणमसं
गतं। सर्वशक्तिमूलकल्पलग्नया अर्थांतरोपस्थापनेपि सर्वनामकार्यस्यासंभवान्न बहुव्रीहेरनयात्वेपि निषेधानुपपत्तेन
बलादेव सर्वनामकार्याभावादिति। पक्षेतरपदस्य पक्षावृत्तिधर्मपरत्वे अग्रे पर्वतेतरान्यत्वादित्यत्र पर्वतावृत्तिधर्मान्यत्वात
दित्यर्थे असंगतिः। तत्र धर्मिलक्षकत्वे पदमत एव धर्मिलक्षकत्वं स्यादित्यस्वरसः। केचिदित्यनेन सूचितः। भावप्रधानं वि
नैवोपपत्तिमाह। तादात्म्येनेति। बहुव्रीह्यावश्यकत्व इति भावः। अत एव तादात्म्येन व्यापकत्वस्य तात्पर्यविषयत्वा
देव। पर्वतेतरस्य तादात्म्येन साध्यव्यापकत्वे तादात्म्यावच्छिन्नपर्वतेतराभावः। पर्वतेतरान्यत्वरूपो व्यापकाभावव
त्वावश्यभाववसाधने हेतुरूपपद्यत इति भावः। इतरथा। भावप्रधाननिर्देशेन अव्यक्ततद्घटस्य पर्वतेतरत्वाद्युपाधि
परत्वे। व्यापकवदिति। पर्वतेतरत्वरूपतत्स्यापात्यर्थः। गमकत्वं व्याप्याभावसाधकत्वं तत्संगमनार्थं। पर्वतेतरान्यत्वा
दित्यनुपज्यते। यद्यपीति। व्याप्यविशेषणत्वं हि तद्विशेषणतावच्छेदकान्वयव्याप्तिघटितविरोधितया अनुमाने दोष

रूपव्यापकवतो पर्वतेतरस्यातादात्म्याभावः पर्वतेतरान्यत्वं॰२

म॰ अत्र तु व्यतिरेकव्याप्तिरेवगमकतोपयिकीति व्यर्थविशेषणत्वमकिंचित्करत्वमिति भावः। तथा वैयर्थ्यं पर्वतेतरव्य
तिरेकस्यवह्न्यभावव्याप्यत्वे पर्वतांशस्य वैयर्थ्यात् तथापि—अनुमानद्वयकविशेषणत्वस्याभावे ऽपि वास्त्वेति यद्य
तिरेकत्वं साध्याभावव्याप्यतानवच्छेदकविशेषणघटितत्वे सति साध्यव्यापकत्वादिशालित्वं विवक्षितं। अग
२९० त्या पतमाहायथोरिति। व्याप्यवृत्तिव्यतिरेकित्वं व्याप्यकोटावन्वयव्याप्तौ साध्यसाधनयोर्विशेषणं न तु व्यापकको
२७० टौ व्यतिरेकव्याप्ताविति दर्शयितुं व्यापकव्यतिरेकव्याप्तिमेवबषयमनुपन्यस्यव्याप्तिं दर्शिता—अन्यथा व्याप्यवृ
त्तिव्यतिरेकिणोर्ययोरन्वये व्याप्तित्वयोरवश्यं व्यतिरेकव्याप्तिरित्यक्तौ तच्छेदेन सर्वोपस्थितिपरामर्शे व्याप्य
वृत्तिव्यतिरेकित्वं व्यापककोटावपि लब्धं स्यादिति। हेतुतावच्छेदकरूपेण हेतुतावच्छेदकसंबंधेन व्याप्यवृत्तिमप्रति
रेकप्रयोगित्वे सति यः साध्यतावच्छेदकसंबंधावच्छिन्नतादृशाभावप्रतियोगितावच्छेदकयद्धर्मावच्छिन्ननिरूपि
तव्याप्यत्ववान् स तत्संबंधावच्छिन्नतद्धर्मावच्छिन्नतत्प्रतियोगिताकाभावत्वावच्छिन्नव्याप्यतानिरूपितव्या
पकतावच्छेदकतद्रूपावच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रतियोगीति व्याप्त्यर्थः। संयोगि २९०

६४

व्यापककोटौ व्याप्यतावच्छेदक व्यापकतावच्छेदककोटौ [illegible]

प्रमेयं वाच्यत्वादित्यादौ व्यभिचारवारणाय साध्यदिशि व्याप्यवृत्तिव्यतिरेकप्रतियोगित्वमुक्तं संयोगस्या
पि समवेतसामान्याभावरूपव्याप्यवृत्तिव्यतिरेकप्रतियोगित्वात्साध्यतावच्छेदके तादृशप्रतियोगितावच्छेद
कत्वपर्य्यन्तानुधावनं प्रमेयत्वादेरपि कालिकसंबंधावच्छिन्नव्याप्यवृत्त्यभावप्रतियोगित्वात्साध्यतावच्छेदक
संबंधावच्छिन्नत्वं तादृशप्रतियोगितायां विशेषणं द्रव्यं संयोगादित्यादौ व्यभिचारवारणाय हेतुदिशि सत्यंतं संयो
गाभावस्य केवलान्वयितया तन्निरूपितव्याप्यतायां द्रव्यत्वाभाववत्त्वस्य द्रव्यत्वविशेषणेनैव पर्य्यवसानेनावच्छेदकत्वा
त् संयोगस्यापि समवेतत्वेन रूपेण व्याप्यवृत्तिव्यतिरेकप्रतियोगित्वात् अधिकरणसंबंधेन संयोगाभावस्यापि
व्याप्यवृत्तित्वाच्च तथैव दोषः इत्यतो हेतुतावच्छेदकरूपेण हेतुतावच्छेदकसंबंधेनेति च पर्वतेतरत्वाभावस्य तद्व्य
क्तित्वादिनावच्छिन्नाभावव्याप्यत्वेऽपि विशेषणत्वाभावादुद्देश्यसिद्ध्यर्थं व्यापककोटौ तद्रूपावच्छिन्नाभाववत्त्वाव
च्छिन्नव्याप्यत्वस्य संबंधभेदस्य चानुधावनं अन्यथा प्रमेयत्वादीनामपि कालिकसंबंधावच्छिन्नाभावस्य संयो
गादीनामपि स्वसमानाधिकरणद्रव्यत्वादिरूपपरंपरासंबंधादिनाऽभावस्य व्याप्यत्वव्यापकत्वयोः सं

म० भवाद्व्याप्यवृत्तिव्यतिरेकित्वं व्यर्थमेव स्यात्। न च व्याप्यवृत्तित्वं व्यतिरेकित्वं च विशकलितमेव विशेषणमस्तु व्याप्य
वृत्तिर्व्यतिरेकस्तत्प्रतियोगित्वमित्यनुसरणं किमर्थमिति वाच्यं। आकाशाभाववान् द्रव्यत्वादित्यादौ व्यभि
चारात्। आकाशाभावस्याकाशमते आकाशरूपव्यतिरेकप्रतियोगित्वात् व्याप्यवृत्तित्वे सति वृत्तिमद्व्यतिरेकप्र
तन्ने प्रतियोगित्वस्य निवेशे च प्रयासगौरवात्। अत एव व्याप्यवृत्तिव्यतिरेकित्वं साध्ये विशेषणमस्तु हेतौ व्याप्यवृत्तित्व
२७१ मात्रं निवेश्यतां तावतैव द्रव्यं संयोगादित्यादौ व्यभिचारवारणसंभवादिति दूषणं ब्रस्तं। प्रयासानिवेशे
२७। नैयर्थ्याभावात्। केचित्तु स्वसमानाधिकरणतादृशधर्मान्तराघटितस्य लघुरूपसमनियतगुरोरपि व्याप्यतावच्छेद
कत्वमिति मते द्रव्यं कंबुग्रीवादिमत्त्वादित्यादौ कंबुग्रीवादिमत्त्वावच्छेदेन द्रव्यत्वव्याप्तिसत्त्वेपि कंबुग्रीवादिमत्त्वाव
च्छिन्नाभावस्याप्रसिद्ध्या व्यतिरेकव्याप्तेरसंभवाद्व्यभिचार इत्यतो व्याप्यवृत्तित्वस्य सत्त्वात् अन्यहेतौ विशेषणत्वे
पि हेतुतावच्छेदकरूपेण व्यतिरेकप्रतियोगित्वं विशेषणमावश्यकमित्याहुः। वस्तुतस्तु व्याप्यवृत्तिव्यति
रेकिणो हेतुसाध्ययोरिति यथाश्रुतमन्वयः। तथा च व्याप्यवृत्तित्वं हेतौ व्यतिरेकित्वं साध्ये विशेषणं। अन्वयमा
त्रस्य प्रतियोगिवैयधिकरण्याघटितत्वेनोपादेयाः इत्थं च संयोगी द्रव्यत्वादित्यादौ द्रव्यत्वे प्रतियोगिवैयधिक २७१

र एव घटितसंयोगव्याप्यभावसत्त्वादेव न व्यभिचारः। व्यतिरेकित्वं च वह्निमद्व्यतिरेके प्रतियोगित्वेनेनाका
शाभावस्साध्ये केन व्यभिचारः। इत्थं चात्र बोध्यं। पर्वतेतरत्वेन वह्नित्वावच्छिन्नव्याप्यतानिरूपितव्यापकताशालि
वह्न्यभावत्वावच्छिन्ननिरूपितव्याप्यतावच्छेदकीभूततामावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नत्वाभावात्। ता
दृशप्रतियोगितावच्छेदकं च वह्निसामग्रीत्वादिकमेव प्रसिद्धं। यदि च पर्वतेतरत्वेपि तन्न घटित्वरूपमेवावच्छेदकमा
व प्य हेत्वसिद्धिराशंक्यते तदा पर्वतेतरत्वेन तादृशव्यापकतावच्छेदकं वन्ह्यभावत्वावच्छिन्ननिरूपितव्याप्यताव
च्छेदकस्त्वावच्छिन्नाभावत्वकत्वाभावादिति प्रयोगः। तादृशं त्वं वह्निसामग्रीत्वादिकमेव प्रसिद्धमिति इदं च चिंत्यं। प
र्वतभेदत्वादिनोपाधित्वस्यैव वारणे। पितद्घटितत्वेन तत्त्वं दुर्वारमिति दिक्॥ साहेतुकत्वेति। इदं शरीरं साहेतुकं च साहे
तुकंत्वादित्यत्र व्यतिरेके शरीरविशेषणवैयर्थ्येन व्याप्यभावे ऽन्वयव्याप्तिसत्त्वादित्यर्थः। धर्माभाववान् वन्ह्य
भावादित्यादो धर्माभावाभावत्वादिना व्याप्तिविरहेपि न क्षतिः तत्र धर्मव्यापकवह्न्यभावादिनैव धर्माभाववान् मा प्रतियोग:
नत्वसंभवे धर्माभावत्वावच्छिन्नवह्न्यभावनिष्ठव्याप्तेरनभ्युपगमस्यापि संभवादिति तन्नोदाहृते। ननु व्यतिरेकपदं नस
त्तमपदार्थरूपोऽभावो वाच्यः। न चैवं प्रसक्तासंगतिः पर्वतेतरत्वाद्यभावस्यापि पर्वतत्वरूपत्वादिति व्या-अं पर्वतेनि

[illegible]

ष्टस्य भेदप्रतियोगिकाभावस्य पर्वतत्वसमनियतस्यापि प्राचां मते प्रतियोगिभेदेन भिन्नस्य सत्त्वमपदार्थस्वरूप
म०३ त्वादत आह। एवमपीति। स्वविशेषणघटितविशेष्यतावच्छेदकावच्छिन्नाधिकरणवृत्तिस्वविशिष्टतद्विशेष्य
२९२ तावच्छेदकावच्छिन्नाभावकं यद्विशेषणं तदवच्छिन्नतद्विशेष्याभावत्वभिन्नत्वे न साध्यतावच्छेदकं विशेषणीयं
२७२ अन्वयव्याप्त्यनभ्युपगमो वा अस्वरसस्तत्र प्राहुः। एवमपि तूक्ते व्याप्तिस्वीकारे पि केवलान्वयिनीति व्या
प्यवृत्तिव्यतिरेकित्वविशेषणेनैव तत्रोक्तव्याप्तेरव्याप्त्यनभ्युपगमात् तथा च पक्षेतरसामान्येदन्नाति व्याप्तिरनेन
प्रकारेण वारयितुमशक्येति भावः। तद्रहिते। साध्यरहिते पक्षे। उपाधिरेवेति। पक्षसाधनाव्यापकत्वसंभवत्त
त्रोपाधिरेवेत्यर्थः। सत्प्रतिपक्षोन्नायकत्वाभिप्रायेणैवेदं। नन्वस्तु तथेत्यादिना तत्रोपाधिज्ञानं स्यादित्युक्तं तच्च न
न लक्षणद्वयकं उपलक्ष्ये लक्षणगमनस्यैवातिव्याप्तिपदार्थत्वात्। अत आशयं स्फुटयति। यद्विषयतयेति
नान्यत्वाद्इतरभेदानुमापकं। अनुपयुक्तत्वात्। अनुमानरूपणप्रसंगेन तस्यानुपयोगात् न तत्प्रतिबंधकज्ञा
नविषयतया अवच्छेदकं उक्तं रूपं साध्यव्यापकत्वे सति साधनाव्यापकत्वं अनुमितिमात्रे इति। तथा चोक्तं रूपं न २९२
प्रतिबंधकतावच्छेदकमित्यभ्युपेयं तथा च न तदुपाधित्वस्वरूपमिति भावः। मूले नुपाधित्वेत्युपाधित्वघटकसाध्य

व्यापकत्वानिश्चये उपाधिमात्रं उपाधित्वनिश्चयः पक्षावृत्तित्वेन निश्चितस्यैवोपाधित्वनिश्चयसंभवात् उपाधिमा-
त्रमिति न संगच्छते अत आह। सत्त्वमिति पक्षेति। पक्षावृत्तित्वेन निश्चयेन तदभावस्य पक्षे। निश्चयेन सत्त्वमिति पक्षाभावादिति
भावः। इतरथा व्यभिचारोन्नायकतया दूषकत्वमते उच्छेदः विशेषदर्शिनां साध्यव्यापकत्वानिश्चयः। पक्षावृत्तेरित्यस्य वा
पक्षावृत्तित्वेन निश्चितस्येत्यर्थः। विपक्षव्यावर्त्तकधर्मवत्त्वस्योपेक्षायां बीजमाह। विपक्षेति। हृदान्यत्वविशिष्टपर्वते-
रत्वादेरित्यर्थः। विपक्षव्यावर्त्तकत्वं यत्किंचिद्विपक्षतावच्छेदकं यत्स्वविशेष्यतावच्छेदकं स्वविशिष्टतदवच्छिन्नाभा-
ववन्निष्ठविपक्षकत्वं तद्यथा आर्द्रेन्धनत्वादेरार्द्रत्वादितद्धर्मसाध्यकत्वे विपक्षायोगोलकवृत्तितावच्छेदकं यादृ-
न्धनत्वं तदवच्छिन्नस्वविशिष्टाभाववदयोगोलकात्मकतद्विपक्षकत्वं भवति तादृशविपक्षव्यावर्त्तकान्यत्वं पर्वतान्यत्वा-
दौ पर्वतादेरिति। द्रव्यं सत्त्वादित्यादौ गुणकर्मणोर्गुणत्वमप्येवं विपक्षव्यावर्त्तकं तद्विशेष्यतावच्छेदकाभावेन नि-
रुक्तव्यावर्त्तकत्वायोगात् अतो विपक्षव्यावर्त्तकविशेषणानवच्छिन्नेत्यत्र विशेषणपदं यत्किंचिद्धर्मितावच्छेदकाव-
च्छिन्नविशेषणं च तदर्थः। तेन गुणत्वादिनिरासः। वस्तुतस्तु यत्किंचिद्विपक्षभेदव्याप्यतावच्छेदकं तद्व्याप्यविशिष्टत्वं
विपक्षाव्यावर्त्तकत्वं आर्द्रेन्धनादौ सर्वमेव विशेषणं तदयोगोलकभेदव्याप्यतावच्छेदकं पर्वतेतरत्वादेप

म० र्वतादिविशेषणं तु न त्रिंविद्विपक्षभेदव्याप्यतावच्छेदकमिति॥ एतएवोपाधितावच्छेदकसंबंधेन विपक्षवृत्तित्व
स्य विवक्षायां द्रव्यं सत्वादित्यादौ संयोगादिसंबंधेनोपाधौ अव्याप्तिरित्यादि दूषणमनवकाशं॥ विशेषणानवच्छि
२९२ न्नेति॥ साध्यव्यापकत्व साधनाव्यापकत्वयोरन्यतरमात्रान्वयि॥ न चैवं पक्षेतरत्वादावपि वक्ष्यि विशिष्टत्वेन सा
ध्यव्यापकत्वस्य महानसत्वविशिष्टत्वेन साधनाव्यापकत्वस्य विपक्षाव्यावर्तकविशेषणानवच्छिन्नस्य सत्वा
२७३ न्न जातिव्याप्तिरिति वाच्यं॥ एकरूपावच्छिन्नसाध्यव्यापकत्वादिविवक्षणेनैव तन्निरासादिति भावः विवक्षितं तस्य
विशेषणदानं तु विवक्षितमित्याशंक्य इत्यभिप्रायवानाह त्यन्वयः॥ ननु तथापीत्यादिना पक्षेतरेव्याप्तेरभिधाने
न घटते स्वयमेव तज्जातिव्याप्तेरूद्भावनेन तस्याल्लक्षणत्वस्वीकाराद अत आशयं प्रकटयति॥ पक्षेतरत्वस्येति॥
वस्तुतो वस्तुगत्या दूषकताप्रयोजकरूपवत्त्वेन ज्ञायमानस्य इदं चोपाधेरीप्सितिपक्षवदनित्यदोषत्वाभ्युपगमेनस्य
दातत्र साध्यव्यापकत्वादिज्ञानं तदा स उपाधिरिति तत्तु अभिप्रायेण तल्लेखसर्वत्र साध्यव्यापकत्वादिपदं तत्त्वज्ञानप
रं तस्याः पक्षेतरत्वस्य वारणाय चेत्प्रज्ञापितस्वेत्यन्वयः॥ तथापीत्यादिना सत्व तिपक्षोत्थापकत्वस्यो पक्षमात्रत्र सा २९२
सत्वादिपदेऽपि रामभद्रीकृतमते धनाव्यापकत्वस्यानुपयोगात्तत्साधारण्याय तावन्मात्रस्येति पदं व्याप्तेः॥ साध्यव्यतिरेको न्वयनन्नसमेति॥ तथा च पक्षे

मात्रपदेनविपक्षामात्रवर्त्तकविशेषणेनावच्छिन्नस्यव्युदासः।साध्यव्यापकत्वमात्रेणतद्घटकंपक्षेसाध्यव्यापकाभावस्यस
धनेनसाध्यव्यापकव्यभिचारस्यसत्त्वेतिपक्षस्यव्यभिचारस्यनोन्नायकत्वादतआह।दोषेति।दोषस्यसत्त्वेतिपक्षस्यैवै
व्यभिचारस्यवा।उन्नयनोपयोगित्वात्।उन्नयनोपयुक्तत्वादितिभावः।पक्षेतरत्वस्यनजानातीत्यंद्घटनसमर्थेतिर
स्येवज्ञातत्वादतआह।तद्घटकस्येति।एवंचोपाधेर्व्यभिचारत्वंव्यभिचारानुमानद्वारा अनुमानमात्रस्योच्छेदेव्यभिचारानु
मानस्याप्युच्छेदात्पक्षेतरोन्नयनस्यघटनासमर्थनत्वेज्ञानकत्वरत्वमितितद्वारणायविपक्षाभाववर्त्तकेत्यादिविशेषणंना
नुचितमिति।अतएवेतिमूले।ग्रन्थः।मूलेघटनासमर्थत्वेनेति।अनुमानपरम्परायांकृतदोषस्याभावेतिनानुमानमात्रोच्छेद ह्यानर
रूपाश्रयः।एवंपक्षेण उपाधित्वस्यैवाभ्युपगमात् उपाधित्वाभावेपीतिनदुक्तिरतआह।उपाधित्वानङ्गीकारेपीति।
नवेतिशेषः।नसउपाधिरितीति।तथाचतद्वारकंविशेषणंनायुक्तमितिभावः।व्यभिचारोन्नायकत्वाभावमुपक्रम्य
यथाहेत्यादिना।व्याप्त्यभावोन्नायकत्वाभावेहेतुवचनमसङ्गतमतोन्यतमाङ्गायप्रथममेवदूषयति।व्यभिचारादिति
।आद्यादिनाव्याप्यत्वाभावपरिग्रहः।उभयस्योपक्रमेव्यभिचारोन्नायकत्वाभावेहेत्वप्रदर्शनादन्यतमत्वमतोहेतुं

प्र० का

त्वं स्फुरयति। अव्याप्यत्वादिनेति। साध्यं स्फुरयति। अव्याप्यत्वादीति। ननु पक्षेतिपक्ष बहुत्वरूपबलसंपन्नयोः सत्प्रतिपक्षे सत्प्र
तिपक्षोद्भावनं युक्तमेवेत्यत आह। व्याप्तीति। बहुत्वस्य। प्रतिपक्ष बहुत्वस्य। न सत्प्रतिपक्षतायामिति। सत्प्रत्यर्थः स्थोपयोजित्वं
२९४ तथा चानुमितिप्रतिबंधकतोपयुक्तेन बहुत्वं बलमित्यर्थः। स्वरूपेति। व्याप्तिपक्षधर्मतांगे इत्यर्थः। तर्कोत्थापकतया ब
हुत्वं बलमित्यर्थः। तथा च यत्रैतादृशबलकोत्थापकत्वं न स्वतंत्रं तत्र सत्प्रतिपक्षे सत्प्रतिपक्ष वदुपाध्युद्भावनेऽप्यर्थमेवस्यादि
३७५ ति मूलार्थः। किंचैवमित्यस्य एवमिति व्याचष्टे। एवमिति। व्यतिरेके साधारण्यादिनेत्यत्रापि हेतुरुद्दर्शयन्नन्वित्यादेस्ता
त्पर्यार्थं हेतुं स्फुरयति। बाधस्यानिश्चयेत्यादिना। असाधारण्यात्। व्यतिरेके साधारण्यात्। वैयर्थ्यात्। उपाध्युद्भावनवैयर्थ्या
त्। यद्वा व्यतिरेके इत्यनंतरं बाधस्यानिश्चय इति। असाधारण्यादित्यनंतरं च निश्चयेत्यादिकं स्फुरयन् फलाभावान्याप्
तोपि इत्यत्रापि हेतुं स्फुरयति। बाधस्यानिश्चयेत्यादिना। ननु वैयर्थ्येपि व्याप्तिबलोद्भावनतयोपाधिर्न विघ्यतीत्यत आह दृष्टो
व्याप्तिरपि नास्तीत्याह। मूले बाधेनोपाधिनियम इति। हेतुमतीति। हेतुमति पक्षे बाधे उपाधिनियम इत्येव व्याप्तिरूपा
धेश्चान्यस्यासत्वान्न परिशेषात्पक्षेतरत्वेनोपाधिर्न विघ्यतीत्याशयः। अत एव स्वादेरुपाधित्वसंभवादिति न्या
ने न परिशेषादवकाश इति भावः। तेनेमा च्वेति। अत्रैव परिशेषाद्युक्तो नियमबलेन पक्षेतरे उपाधित्वसंभ २९४

अत्रानिश्चिता वा घटेऽस्यास्य बाधस्यानिश्चये लंतपाधि नास्ति।

उपाधित्वं संभवतीति तत्रास्यादित्यर्थः
पक्षाऽसंभवादिति पाठः ॥

वद्‌इति भावः। बाधितेनैव चासंक्रामेति। व्यभिचाराद्यसंक्रामेत्यर्थः। जंघ प्रागभावावच्छिन्नो घटो गंधवान् इत्यपि वा त्व
दित्यादौ च सिद्धस्य महानसीयवह्नेर्महानसीयत्वेन लाघवमिति लाघवमित्तिलाघवस्य सहकारेण महानसीयवह्न्या
देर्बाधादसाधकेन वह्निमान् धूमादित्यादौ चेहेतुमति पक्षे बाधस्य त्वयापाधेर भावात्सभि चारइत्यर्थः। साध्या
भावस्यैवेति। साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यैवेत्यर्थः। प्रकृते। प्रकृतनियमो। उपाधिज्ञायसंकोचभ
यादाह। तदनभ्युपगमाद्वेति। असंक्रामेणबाधानभ्युपगमात्। पक्षतावच्छेदकसामानाधिकरण्यमात्रस्यैवानु
मितिविषयत्वेन पक्षतावच्छेदकस्यावच्छेदकतया नुमितिविषयत्वात्त्समानप्रकारकविरोधिनिश्चयस्यैव
विरोधितया महानसीयवह्नित्वेनाभावनिश्चयस्य वह्नित्वेन तदनुमितावविरोधात्। सल्लिंगपरामर्शस्य गुणतया
बाधितार्थलाघवप्रतिसंधानवशादपि तत्तद्यानुमित्यसंभवादिति भावः। तत्समशील्यमिति। असाधारणव्य
तिरेकप्रतियोगित्वेन तुल्यमित्यर्थः। शुद्धसाध्यव्यापकस्यैव। इत्यत्र चोपाधिनियम इति तत्समस्य शुद्धसाध्यव्यापको
पाधिनियम इत्यर्थः। एतद्व्यतिरेकः। अतेजस्त्वादिव्यतिरेकः। पक्षे। तेजोमात्रे। साध्यस्य। अनुष्णत्वव्यतिरेकस्य।

म०

२७५

275

क्षत्वस्याऽसिद्धेः। पक्षनिश्चये। सपक्षे निश्चितसाध्यवति जलादाविति। साध्यनिश्चयविषयत्वं सपक्षत्वं न तु
निश्चितसाध्यवत्त्वं तस्यैतेनाऽसिद्धिरिति भावः। ग्राह्योष्मणा इति। अनुद्भूतरूपवत्तैजसे तु उष्णत्वनिश्चये तेजस्त्वनि
श्चयस्यापि संभवादप्रतीतसाध्यसहचारत्वासंभवादनुद्भूतरूपानुधावनं। सपक्षसिद्धिमनुरुध्य ग्राह्योष्म
णा उष्णत्वनिश्चयानुसरणं। न चाप्रतीतसाध्यतदभावसहचारत्वमित्यत्र साध्यनिश्चयस्याघटकत्वात्तद
नुसरणं किमर्थमिति वाच्यं। निश्चितसाध्यतदभाववद्वृत्तित्वमसाधारण्यमित्यस्य निश्चितसाध्यतदभाव
वद्वृत्तितयाऽनिश्चितत्वमित्यर्थकरणाभिप्रायेण तदनुसरणादिति। यद्वा जलादावुष्णत्वभ्रमः। ग्राह्योष्म
णेति तेजस्त्वाग्रहश्च नास्ति तदा तन्नोक्तपक्षेऽन्वयव्यतिरेकस्योक्तरूपासाधारण्याभावादुपाधित्वमक्षतमिति।
किंचैवमितादिमूलस्यासंगतिरित्यस्वरसः। अन्ये परे इत्यनेन सूचितः। व्यतिरेकिणः सत्प्रतिपक्षसंभवाच्चेति
मूलमवधारयितुमाह। असाधारणो हीत्यादिना। व्याप्तिग्रहप्रतिबंधोऽस्य कल्पनाबीजमित्यग्रेतनेन संबंधः। नन्वन्व २७५
यव्याप्तिग्रहप्रतिबंधेऽपि व्यतिरेकसहचारबलाद्व्यतिरेकव्याप्तिग्रहादेवानुमितिः स्यादत आह। व्यतिरे

केति। तदविशेषात्। असाधारणहेतुव्यतिरेकव्याप्तिग्रहणविशेषात्। नचेहेति। इह पक्षेतरस्य व्यतिरेके अन्वय
व्याप्तिग्रहप्रतिबंधेन दूषकताबीजमित्यर्थः। व्यतिरेकित्वादिति। व्यतिरेकव्याप्तिग्रहणाधीनसत्प्रतिपक्षतायां
अन्वयव्याप्तिग्रहस्याकिंचित्करत्वादित्यर्थः। अतएव मूले व्यतिरेकिणि इत्युक्तं। नचासाधारण्ये तस्यापि सत्प्र
तिपक्षोत्थापकतया दोषत्वादिति मूलार्थं दर्शयितुमाह। नद्वितीय इति। इह सत्प्रतिपक्षो दूषकताबीजमिति
नेत्यर्थः। तदनवकाशात्। सत्प्रतिपक्षानवकाशात्। आगुक्तरीत्येति। यथा साध्यव्यापकव्यभिचारित्वेन
साध्यव्यभिचारित्वमुन्नेयं तथा साध्यव्याप्यव्यापकत्वेन साध्याव्यापकत्वमप्युपाधेरस्यादिति रीत्येत्यर्थः।
व्यभिचारित्वेन साध्यव्यभिचारोन्नायकस्येति। दूषकतायामबीजत्वे इत्यग्रिमेणान्वयः। उपाधेरन्यतो विशेषको
दयान्ययोगव्यवच्छेदासंभवात्प्रकृतानुपयोगाच्चाएवकारस्य भिन्नक्रमं दर्शयितुं तथैव मूलमनुवदति। उ
पाधेरित्यादि। भवतु वेत्यादिकं मूले कतिपयपदानि स्वरयित्वा व्याचिख्यासुर्मूलमनुवदति। भवतु वेत्यादि।
पक्षेतरे तु ति व्याप्तिवारणाय विपक्षाव्यावर्त्तकत्वादिविशेषणदानान्न द्विशेषातिव्याप्तिपरत्वं मूलस्य दर्शि

म० मतुं प्रेरयति। उपादीयमानमिति। तथापीति मूलमनन्वयीति व्याप्तिस्थलं दर्शयति। अत एवेति। विपक्षाव्यावर्त्तकत्वे त
थ्यदि विपक्षत्वं साध्याभाववत्त्वं तदाणुत्वावच्छेदेनापि पक्षतायां परमाणोर्विपक्षत्वमक्षतमित्याशयेनाएव
इति। यदि निश्चितसाध्याभाववत्त्वं तदाह। जन्यमात्रेवेति। नचाणुभिन्नत्वेऽणुकस्याप्यणुत्वे नविशेषणत्वान्न
स्यच विपक्षाव्यावर्त्तकत्वमक्षतमेवेति विंतिवाच्यं। न हि द्व्यणुकस्य तत्त्वेनोपाधौ जत्वेऽस्माकं नित्यत्वाणुत्वेन तेन रूपेण परमा
२७६ णुरूपविपक्षस्य व्यावर्त्तकत्वमस्त्येवेति भावः। प्रकृतलक्षणघटितसाध्यव्याप्यत्वस्य द्व्यणुकतायामनुपयोगि
त्वे विपक्षेतरातिव्याप्तिवारकतयैव सार्थकत्वान्नेत्यादि मूलमनुपपन्नमतस्तदवतारणिकामाह। नन्वित्यादि
ना। व्यभिचारादीति। आदिना सत्प्रतिपक्षपरिग्रहः। नन्वाप्यकत्वं। व्याप्यतया व्याप्तीमतव्यभिचारादिप्रति
योगित्व। याव। मात्रेणेति। मात्रपदेन साध्यव्याप्यत्वादिघटितलक्षणस्य व्यवच्छेदः। तुपाधित्वे। उपाधिपदवा
च्यत्वे। व्यापकव्यभिचारादाविति। आदिना सत्प्रतिपक्षोन्नायकव्यापकव्यतिरेकपरिग्रहः। तथेत्यस्य द्व्यणु
समुन्नायकसत्त्वे च कारवैयर्थ्यान्नदर्थमाह। तेन रूपेणेति। द्व्यणुकतायामित्यस्य व्याख्या व्यभिचारस्येत्यादि २७६
प्रतिप्रसंजनेति। व्यापकव्यभिचारित्वादाविति प्रसंजनेत्यर्थः। तथा च व्यापकव्यभिचारित्वादाविति प्रसं

गमजकस्य लक्षणतानियामकस्य स्वव्यभिचारेणेत्यादिदूषकत्वाबीजस्यापि विषमव्यापकसाधारण्ये वारणा
र्थं यत् साध्यव्याप्यत्वं विशेषणं भवदभिमतं तस्यैवैयर्थ्यादिति मूलार्थः। ननु लोके साध्यप्रयोजकत्वस्य सहेतावपि स
त्वेनातिव्याप्तेः स्फुरयति। साधनाव्यापकत्वधर्मेति। जनकजनकत्वादिरूपं प्रयोजकत्वं न विवक्षितमित्याह। साध्यान्वयेत्या
दि। उन्नायकत्वं व्याप्यत्वं। साध्यान्वयोन्नायकान्वयप्रतियोगित्वेन साध्यव्याप्यत्वं साध्यव्यतिरेकोन्नायकव्यतिरेक
प्रतियोगित्वेन साध्यव्यापकत्वं लभ्यते आद्यदले न पक्षेतरवारणमिति भावः। अन्यथा उक्तरूपप्रयोजकत्वस्य
नियामकत्वेऽतिप्रसंगात्। विषमव्यापके पक्षेतर~~राससस्यमितिभाव~~दौ विषमव्याप्ते तदिंधनादावतिप्रसंगात्।
मृद्धातोः कृत्यप्रत्ययार्थकत्वे नित्यसाध्यके विषमव्यापकादावतिप्रसंगादित्यतो व्याचष्टे। अभवतः प्रसञ्जनमिति मूले विवक्षि
विव०२ क्षितन्तु मन्तुः प्रयोजकत्वं। उपाधिपदवाच्यत्वं। दीधितौ न चैवमिति। एवं इष्टापत्तावौपाधिकस्य साध्यव्याप्यत्वस्योपेक्षणे
३ । तत्रापि। साध्यव्याप्यत्वस्य निवेशयितुरपि। साध्यवत्त्वोन्नीत्यादिना केवलान्वयिसाध्यकपक्षेतरादिसंग्रहः। अनुपा
। धित्वे। उपाधिरेदाप्रतिपद्यत्वे। ननु स्वनिष्ठधर्मान्तरसंक्रामकतयापि योगोपपत्तौ स्वनिष्ठव्याप्तिसंक्रामकत्वस्या

म० लाभात्कथं तद्लाभ्यत्वाप्यत्वस्य लाभ इत्यत आह यद्धर्मेति। यद्धर्मविषयकबोधजनकत्वं यत्पदसमभि
स व्याहारेण तद्धर्मः। यद्धर्मविषयत्वं विशेष्यतया विशेषणतया वा तदुपाधिपदार्थयोः स्फटिकलौहित्ये वेति। अत्र स्फटि
कविशेष्यकप्रतीतिप्रकारत्वरूपस्य चेद्विशिष्टे स्फटिकपदस्य लक्षणा। तत्सम्बन्धोपाधिपदार्थतावच्छेदकी
२११ भूतस्ववृत्तिधर्मान्वयाभेदः। उपाधिपदस्य स्ववृत्तिधर्मप्रकारकज्ञानजनकत्वं भेदश्चार्थः। भेदे च प्रतियोगितया ज
211 पाकुसुमादेरनुयोगितया च स्फटिकादेरन्वयः। इत्थं च तद्भिन्नस्फटिकविशेष्यकप्रतीतिप्रकारीभूतलौहित्याभि
न्नस्ववृत्तिधर्मप्रकारकज्ञानजनकं जपाकुसुममित्यन्वयबोधः। वस्तुतस्तु लौहित्ये स्फटिके जपाकुसुममुपाधि
रित्यादौ उपाधिपदस्य धर्मप्रकारकप्रतीतिजनक एवार्थः। जपाकुसुमादिपदोत्तरसुपो वृत्तित्वे भेदे च लक्ष
णा। वृत्तित्वस्योपाधिपदार्थैकदेशे धर्मे भेदस्य च स्फटिकादावन्वयो व्युत्पत्तिवैचित्र्यात्। अतो न स्ववृत्त्यानु
गमादनन्तशक्तिकल्पने स्फटिकपदोत्तरसप्तम्या विशेष्यकत्वं उपाधिपदार्थैकदेशप्रतीत्यन्वितमर्थः। ध
र्मश्चात्र तात्पर्यमर्यादया लौहित्यमेव धर्मत्वेन भासते। तथा च तद्भिन्नस्फटिकविशेष्यकस्ववृत्तिधर्मप्रकार
कप्रतीतिजनकं जपाकुसुममित्यन्वयबोधः। जपाकुसुमस्फटिकयोर्विप्रकृष्टत्वे तादृशप्रतीतिजनकत्वाभावादर्थे २११

पदार्थः स्व संगौण

तएवस्वसमीपवर्त्तित्वलाभः॥ अस्तुवा तत्रापि सुपोलक्षणा यदि च सुप्तिङन्तोलक्षणायांवयुतत्ति विरोधः॥ तदा स्फटिकप
दस्यैवजपाकुसुमादिभिन्नतन्नत्समीपवर्त्तिस्फटिकेलक्षणाधर्मत्वेनैवचस्ववर्त्तिलौहित्यादेर्भानं॥ नामार्थयोर्भेदान्व
यबोधस्य विभक्त्यर्थोपस्थितिंविना विप्रकृतेस्वीकारे भेदः सामीप्यंचोपाधिपदस्यैवार्थः॥ तत्र जपाकुसुमादेर्नामार्थ
स्यविशेषणतयास्फटिकादेर्विशेष्यतयान्वयः॥ एवमुपाधिपदार्थैकदेशेधर्मेपि जपाकुसुमादेरधिकरणत्वेना
न्वयः॥ स्फटिकलौहित्येजपाकुसुममुपाधिरित्यत्रोपाधिपदस्यभेदः सामीप्यंवर्त्तित्वंप्रतिजनकंचार्थस्तत्र भेदादेरन्वय स्फा
स्त्वर्वद्वर्त्तित्वेचजपाकुसुमस्यनिरूपकतयालौहित्यस्यचाधिकरणतयान्वयः स्फटिकपदस्य स्फटिकविशेष्यक
त्वमनन्यमाश्चप्रकारकत्वमर्थः॥ इत्थं स्वभिन्नस्वसमीपवर्त्तिस्फटिकविशेष्यकस्ववर्त्तिलौहित्यप्रकारकप्रतीतिजन
कंजपाकुसुममित्यन्वयबोधः॥ अथ मन्त्रसाधनेनोपाधिरित्यत्र प्रथमसत्तम्यविरोध्यत्वं द्वितीयसत्तम्यान्तादा
त्म्येनप्रकारत्वंसाधनपदस्य वाधर्मपरतया व्याप्यत्वमात्रपरत्वं उपाधिपदस्य वा सामानाधिकरण्यंसामीप्यंता रूप
दात्म्यंवर्त्तित्वंवाप्रतीतिजनकं चार्थः॥ पदानाममन्वयः प्रागिव॥ एवं च स्वसमानाधिकरणोतद्विशेष्यस्वतादात्म्यव

म० व्याप्यप्रकारकप्रतीतिजनकः सोयमित्याकारः। स्वसमानाधिकरणैतद्विशेष्यकस्ववृत्तित्वाद्यत्वप्रकारकप्रतीति
१ जनकोयमित्याकारकोन्वयबोध इति। सोपाधिनियतस्योपाधेरभावप्रतियोगितावच्छेदकीभूतस्यप्रसिद्धसंबंध
२७८ स्याभावात्संयोगादिनासंबंधेनोपाध्यभावस्यव्यभिचारविरोधित्वाभावाद्दिहोपाधिरिति व्यवहारविषयस्याभावः प्रसक्ते
278 यदभावशब्दार्थेवाच्यः तत्रान्वयव्यतिरेकाभ्यां तद्विषयं द्रढयितुमाह। अस्तितावदित्यादिना। इहोपाधिरित्यत्रोपाधेः
सामानाधिकरण्यादेर्विषयत्वं निराकर्तुं व्यतिरेकमाह। नेहोपाधिरिति। तथा सति सद्धेतावपि तादृशोपाधिसामाना
धिकरण्यसत्त्वान्नेहोपाधिरितिप्रतीतिर्नस्यादिति भावः। प्रतीतिविषयतामात्रेण न शब्दार्थता शब्दस्य वृत्त्या त्रिबला
देव बोधकत्वादतो वृत्त्यन्तिं द्रढयितुं व्यवहारमप्याह। व्यवहारश्चेति। प्रतीतिव्यवहारौ। आलंब्येति। उपाधिव्यभि
चाराभावादेर्यदभावशब्दार्थतायां लक्ष्यलक्षणत्रिवल्लक्षणव्यवहाराधीनत्वात् व्यवहारस्य च व्यवहर्तव्यज्ञानवि
धयाव्यभिचारादेः संबंधत्वेन लक्षणयावप्रतीतिरप्युपयुक्तत्वादिति भावः। उक्तप्रतीत्योर्यथाक्रमं विषयमाह। २७८
यदीतिप्रमेयत्वव्यभिचाराप्रसिद्धाः तात्पर्याद्ग्रिमग्रंथासंगतेरित्यत आह। तदव्याप्यत्वेति। उभयत्रोपाधिपद

स्योपाधेर्व्यभिचारेऽव्याप्यत्वेवाल्लाघाणिकत्वात्संमुखतोव्यवधानोपपादनेनघटतेरत्यतोलक्षणं विना प्रक्रा

न्तरमाहयद्वेति। तेन। व्यभिचारेणाव्याप्यत्वेनवा। तद्रूपवत्त्वे। साधनं रूपवत्त्वे। सन्नप्यपर्यस्याभावान्वय

मभिप्रेत्यारन्नित्वमुक्तं। इतरथा तु तेन संबंधेनोपाध्यभावः साधननिष्ठोनेहोपाधिरित्यस्यार्थो बोध्यः। अव्याप्यत्वा

दिति। नेहोपाधिरित्यस्योपाधिव्यभिचाराद्यभावाद्यर्थकत्वे यत्तादृय व्यभिचारादौ लक्षणे तेन संबंधेनोपाध्य

भावार्थकत्वे चात्रापि तेन संबंधेन यदभावपरत्वमिति भावः। यथाश्रुत व्यभिचारविरोधित्वे साध्यव्याप्यत्व

स्यैव लाभात्साध्यसमव्याप्यत्वमुपाधेर्न लभ्यतेरिति तल्लाभाय व्यभिचारविरोधित्वं निर्वक्ति। तदभावस्येत्या

दिना। तदभावस्येत्यव्यभिचाराद्यभावस्य। तत्सत्त्वरूपादौ तत्तद्रूपता दृशायदभावपरं। विषमव्यापकाभावस्य साध्या

दौ व्यभिचारविरहेऽसत्त्वादव्यापकमिति। अव्याप्यत्वस्य घटत्वादौ [illegible] विरहि [illegible] त्वे साध्यसमव्याप्तव्यापकत्वात्म

यदभावविरहत्वि प्रमानादौ व्यभिचारासत्त्वादसंभव इत्यतो धर्म इति। तद्विरहस्य व्यभिचारव्याप्यत्वेत व्यभिचार

विरोधित्वं स्वरूपतो न घटतेऽत्यतस्तदभावनिष्ठमेव दलांतरं निवेक्तुं एवं दलमनुवदति। तत्सत्त्वरूपादिना। यद्वा।

साध्यसमाधिकरणत्वादव्यापकमिति। तद्विरहिति। तदभावविरहिति। विषमव्याप्याभावविरहिति प्रमेयत्वादौ व्यभिचारविरहेऽसत्त्वं। २

पा॰ व्याप्यव्यापकभावे कृताद्रि

म० व्यभिचाराभावान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकशालित्वरूपं व्यभिचारविरोधित्वमुक्त्वाव्यभिचाराभावसम
नियतत्वरूपं तदाह। तत्समत्वेइत्यादिना। [illegible]प्यत्वस्य घटकत्वे व्यभिचारे विरहि[illegible]गगनादौ उपाधिव्याप्यत्व
२१८ रूपतदभावाभावादसंभवइत्यतो धर्मेति। ईदृशाव्यभिचारविरोधित्वे आद्यदलाद्विषमव्यापकस्य द्वितीयदलाच्च वि
२१९ षमव्याप्यस्य वारणीयत्वं दर्शयति। ईदृशस्येत्यादिना। व्यापक एवेति। धर्मस्य विषमव्यापकमार्द्रेधनं तत्र स्वव्यभि
चाराद्यभावसत्वेपि धर्मव्यभिचारसत्वादित्यर्थः। विषमव्याप्यं धर्मस्य तन्महानसत्वं साध्यवद्धर्मादौ तद्विरहेपि
वविरह तन्महानसत्वव्यभिचाराद्यभावत्वेपि धर्मव्यभिचारित्वाभावादिति भावः। एतावता समव्याप्तत्वं लक्षणं न तु साधना
व्या व्यापकत्वमतस्तल्लाभाय तादृशधर्मेति। उक्तसंबंधेनेति। संबंधेन स्वव्यभिचारित्वेन स्वव्याप्यत्वेन चासंबंधेन उक्तस्य
संबंधस्य वृत्तिनियामकत्वे मानाभावादाह। उक्तसंबंधस्यैवेति। उक्तस्योपाधित्वेपि पारिभाषिकानौपाधिकत्वेऽप्र २१८
तियोगितया तत्त्ववेशाला[illegible]मात्रयत्र समव्याप्तोपाधेरसंभवस्तत्रानौपाधिकत्वस्याप्रसक्तो व्यभिचारेवांत
लेड्ठ नइत्यादिग्रंथस्यानुत्थानादाह। स एवेति। तथा च एवकारेण लक्ष्यैतद्भिन्नस्य निरुपाधित्वे तादृशव्यभिचा

विरोधिनिरुपाधित्वप्रसक्तौ तदुद्भावनतार इति भावः। अत एवेति। यत एवोक्तरीत्योपाधिर्निरुक्तोऽत एवेत्यर्थः। साधनव्यापकं समव्याप्तिविषयक
साध्यव्यापकत्वाघटितप्रकारान्तरेण तस्य निरुक्तौ तु अपनोपाधिकत्वं पारिभाषिकं स्यादिति भावः। यत्साध्यके व्यभि-
चारः अनिर्धारितसाध्यक एव सद्धेतावनौपाधिकत्वं केवलान्वयिसाध्यके व्यभिचाराप्रसिद्ध्यात इति निरुक्तोपाधिर
प्रसिद्ध्या न तत्रानौपाधिकत्वमिति हृदयं। केवलान्वय्यनुमित्यनुपगन्तॄणां मीमांसकानां मतेन वायं ग्रंथ इति। ननु
विषमव्यापकस्यापि दूषकताबीजसत्त्वात्तद्वारकविशेषणवल्लक्षणकरणमनुचितमित्याशङ्क्यापे जागरूके विनाप्र
योजनमुक्तिवैचित्र्यमात्रेणासमव्याप्तत्वघटितलक्षणकरणमनुचितमतः प्रयोजनमाह। विरोधेति। एकैकस्या व्या-
द्वितीयदलस्य प्रथमदलस्य पकतापादकदलमात्रस्य व्याप्यतापादकदलमात्रस्य। व्याप्तिशरीरघटकतानस्यात्। व्याप्यतानस्यात्तदूषकता
दोषो न यतो नोपयोगितानस्यात् दिति। उभयस्य। व्याप्यत्वव्यापकत्वप्रापकदलद्वयस्य उपादानं। लक्षणप्रवेशः। स- क्रमेणान्वयः व्याप्ति व्यापकत्वापादकस्येत्यादिना
मव्याप्ताकाशेति। आकाशपदमुपाधिना घटसंबंधेनातिप्रसंगं अतिरिक्तवृत्तित्वे निरुक्तलक्षणासंभवात्तमा- आकाशातिरिक्तं
श्रेति। धूमवान्वह्नेरित्यादावार्द्रेन्धनजन्याकाशान्यतरत्वादिनेत्यर्थः। तेन रूपेणाकाशादेरुपाधित्वेऽपीति विरहः।
आकाशत्वादिना तुल्यलक्षणगमनमसंभावितमित्यरुचेराहाऽथ यदि वेति। अपानित्यत्व विषमव्यापकस्य प्रमेयत्वस्य व्या-

म० सिद्धौराधंसिद्ध्यातदभावाप्रसिद्धेरुक्तरग्रंथासंगतिमाशंक्याह।।अत्रेति।व्यतिरेकीति।गगनानात्मत्वादिरेवतादृशो
६ धर्मइति।व्याप्तिलक्षणत्वेइति।केवलान्वयिनिसंदेहाभावानुमानाभावेनव्याप्तेरभावइतिभावः।यत्रेति।अ
यमेतन्मात्रवृत्तियावद्धर्मवान्प्रमेयत्वादित्यादौसाध्यातिरिक्तस्योपाधेरभावादित्यर्थः।।अस्तिव्याप्तिरिति।स्व
व्यभिचारविरोधिसाधनाव्यापकव्यभिचारित्वाभावकूटवत्तत्त्वाभाववत्त्वमकृत्स्नसाध्यकत्वं।।अनौपा
२८० धिकत्वमित्यभिप्रायेण।यदिचनिरुक्तोपाध्यभावएवानौपाधिकत्वंतदातिव्याप्तेरभावादव्याप्तिमाह।तस्ये
२४० त्यादिनातस्यनिरुक्तसाध्यव्यभिचारविरोध्यभावप्रतियोगिनः।।अभावानिरूपणेइति।अभावानिरूपणे
इति।तस्याभावाभावोनिरूप्यप्रतिन्यायादिति भावः।तत्रत्यसंदेहेतौ।।अयमेतद्वृत्तियावद्धर्मवानेतत्त्वादित्यादौम
स्थे नोऽलरमाह।वस्येत्यादिना।यस्येत्यस्यविवरणंयद्व्यभिचारमादि।।अग्रिमग्रंथानुरोधादाह।यदव्याप्यत्वस्येति।
स्ट साध्यव्यापकत्वलाभायइरयतिसाध्यव्यापकइति।यद्व्यभिचारित्वाभावस्यसाध्यव्यापकनिष्ठत्वायतत्पदार्थ २८०
स्यसाध्यव्यापकत्वलक्षणंसाध्यव्यापकव्यापकस्यसुतरांव्यापकत्वादितिभावः।साध्यव्यापकेसाध्यव्यभिचार
विरोधित्वंचयत्रयत्रसाध्यव्यापकेयद्व्यभिचाराभावस्तत्रावश्यंसाध्यव्यभिचाराभावइत्येवंरूपं।निरूप्यव्याप ।

५४

काभावस्यैवैतादृशविरोधित्वमितिमतेप्येवसुव्यक्तं।न तु साध्यव्यापकत्वं तन्नियदभावःसाध्यव्यभिचारविरोधी
इत्यर्थो ग्राह्यः।तथासतिसाध्यत्वन्निर्यदभाव इत्यादेरेवसम्यक्त्वेव्यापकपदवैयर्थ्यापत्तेः।एवमपिसाधनाव्याप
कत्वालाभात्तदर्थंदर्शयति।साधनाव्यापकइति।विरोधस्वरूपनिर्वचनेनोपाधिरितिप्रतीतिनियामकसंबंधे ने
नमतेनैवसमव्याप्यत्वस्यसाधनाव्यापकत्वस्यचलाभेपदांतरदानेगौरवमित्यत्रास्वरसःकश्चिदित्यनेनसू
चितः।व्यभिचारविरोधान्यस्यव्यभिचाराभावापादकःइत्यर्थानुसारेणमतांतरमाह।यदित्यादिना।साधने।प
कृतसाधने।व्यभिचाराभावापादकत्वंचतद्घोपपत्त्याभावापादकस्यपक्षेऽसिद्धेरित्याह।यत्तेत्यानरूपणद्धर्मत्वं।व्या
पाद्यापादकयोर्व्याप्तिरापाद्यव्यतिरेकस्यचपक्षवृत्तित्वमिष्टापत्तिशंकावारकमित्येवंरूपा।तेनयथाक्र
मंसाधनाव्यापकत्वस्यसाध्यव्याप्यत्वस्यसाधनेसाध्यव्यभिचारित्वस्यलाभः।साध्यव्यापकत्वस्यलाभायदर्श
यति।साध्यव्यापकइति।अत्रापिसाध्यव्यापकपददानेनगौरवंसाधनस्यसाध्यव्यभिचारित्वेलब्धेसाध्यवि
साधने षमव्याप्यस्यापितत्रविद्धर्मावच्छिन्नसाध्यव्यापकत्वेनाव्यभिचारोन्नायकत्वेदृष्टांतत्वसंभवात्।संग्राह्यत्वे
नतत्पददानेप्रयोजनाभावश्चेत्यस्वरसः।कश्चिदित्यनेनसूचितः।यस्मिन्सतिसाध्यात्वंपरयानानुमिति

प्रतिबंधो भवतीत्यर्थकतया त्रानुमितिः

५० पदस्य पर्याप्तकत्वार्थत्वमागेपि ज्ञप्ति विरहः। यदभावे व्यभिचारि विरोधित्वोत्सर्गाव्यभिचाराभावरूपत्वाभिमतत्वाव
शयकत्वं स्यात्तन्माभावात्तत्र मूलेऽसत्वणाभिधानमनुक्तोपालंभरूपमतस्तत्वतो करवानुमितिपदमनुमितिप्रयोज
क परतया व्याचष्टे न त्वित्यादिना। प्रयोजकं च जनकत्वात्तदंतर्गतज्ञानविषयतावच्छेदकं तच्च व्याप्यत्वपक्षधर्मत्वे अ
२८१ बाधितत्वादि च लक्षणया अनुमितिपदार्थः। उक्तिसंभवार्थं दृष्टांतमाह। यथेति। असिद्धिव्यतिरेकरूपेति। व्या
(२८१) प्यभावरूपाया व्याप्यत्वासिद्धेः पक्षधर्मत्वरूपाया वा स्वरूपासिद्धेर्व्यतिरेके अनुमितिप्रयोजकस्य व्याप्यत्व
स्य पक्षधर्मत्वस्य वा यथासिद्धिरित्यर्थः। विरुद्धत्वादेरिति मूलं आदिपदोपग्रहात व्यभिचारमेव भविष्याच क
ष्टे। विपक्षमात्रगामित्वेत्यादिना। साध्यासमानाधिकरणत्वरूपविरोधस्य व्यतिरेकसाध्यसामानाधिकरण्यस्ये
वानुमितिप्रयोजकस्य सत्वात्तदपेक्ष्यार्थं विरोधपदार्थमाह। विपक्षमात्रगामित्वरूपेति। तथा च तदभावस्य ग
गनादौ व्यभिचारो लिङ्गसत्वात्तत्सत्वेऽनुमितिप्रयोजकस्य साध्यसामानाधिकरण्यस्याव्यभिचारस्य वान २८१
सत्वनियम इति भावः। विपक्षवृत्तित्वरूपव्यभिचाराभावसत्वेऽनुमितिप्रयोजकस्याव्यभिचारस्य स

लोके प्यनुमितिभवनात्तथा प्रकेवल

त्वनियमात्तत्रप्रकृतिनियमव्यभिचारो विघटत इत्यतः सपक्षवृत्तित्वपर्यन्तं व्यभिचारे निवेशितं तथा चोक्तरूपस्य
व्यभिचाराभावस्य विपक्षमात्रगामिनि विरुद्धेपि सत्त्वात्तत्सत्त्वे व्यभिचारस्य नसत्त्वनियम इति। व्याप्यादेरिवप
क्षसाध्यादिभेदेनोपाधेरपि भिन्नत्वात्तन्यस्यैकतत्साध्यकतत्साधनकयावदुपाधिसाधारणस्यैकस्यलक्ष
णस्यतत्पक्षकोपाधिद्वयस्यासंकीर्णत्वेनाव्याप्तिर्विघटत इत्यभिप्रेत्यैकपक्षसाध्यसाधनेष्वेवासंकीर्णमुदा
हरणद्वयं प्रदर्शयितुमाह। यत्रेत्यादिना। पक्षेसाध्यासत्त्वेसाधनावच्छिन्नसाध्यव्यापकस्यापि पक्षसाधन
वदन्यतरत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वेन संकर एवं स्यादत। हेतुमति साध्यसत्त्वे स्वसाधनाव
च्छिन्नसाध्याप्रसिद्ध्याव्यापकत्वासंभवः हेतोः पक्षवृत्तित्वेतदवच्छिन्नसाध्यव्यापकस्य पक्षधर्मावच्छिन्नसा
ध्यव्यापकतापि स्यादतयमुक्तो एकं साधनावच्छिन्नसाध्यव्यापकरूपोपाधेः पक्षवृत्तित्वे पक्षसाधनवदन्यतर
त्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकतापि स्यादतः पक्षावृत्तिरिति। साधनावच्छिन्नसाध्यव्यापकोपपादना
याह। हेत्विति। इदं च पक्षावृत्तिहेतुसमानाधिकरणोपाधेः पक्षनिष्ठाहेत्वसमानाधिकरणाच्चोपाधेर्भे

स्त त: ३

५० दाःसुदूरपराहतइत्यस्यांकर्यस्फुटतरत्वाद्यर्थमुक्तं।नतुनियमपरत्वेन।तेनविभुत्वसमानाधिकरणस्यगगनत्वादेः
साधनावच्छिन्नसाध्यव्यापकत्वाभावेपिनक्षतिः।पक्षधर्मावच्छिन्नसाध्यव्यापकमाह।अपरइति।पक्षावृत्तेः
पक्षनिष्ठतयाभेदंदर्शयित्वाहेतुसमानाधिकरणात्भेदंदर्शयितुमाह।साध्यवतीति।हेतुसमानाधिकरण
त्वादत आह नव्यातिरिच्यत इति। स्वमते नेति। एकविशेषणावच्छेदेन व्याप्यतावच्छेदकप्रकारेणैव वि

भ० ४

शेषां तदानुमानं ननु विशिष्टव्याप्तिस्वमतं उद्भूतरूपस्यात्मन्यवृत्तित्वेन नद्रव्यप्रत्यक्षत्वव्यापकत्वम
तः कथं तदपि न्यायेणोद्व्यभिचारानुमानमत आह। प्रत्यक्षसंख्येति। प्रयोजकमेवेति। द्रव्यप्रत्यक्षत्व
व्यापकेति पदं प्रयोजकतमेवलाघित्वपर्यः। नन्वात्मैकत्वपरिमाणयोरप्रत्यक्षत्वनयेतयोरपि नद्रव्यप्र
त्यक्षत्वव्यापकत्वमत आह। आत्मैकत्वादेरप्रतीतिरिदं मुपलक्षणं। अद्दनिरवातवंशादौ द्वित्वभ्रमज
नकदोषस्थले च परिमाणस्यैकत्वस्य च ग्रह एव न तदंतरे वैजात्यस्य च परं न ग्रहः। प्रत्यक्षत्वरूपयो
ग्यस्वत्वादिमत्वं वोपाधिरिति भावः। अग्रे उद्भूतरूपस्यैवोपाधित्वप्रदर्शनात्तदनुसारेणाह उ
द्भूतरूपेति। साध्ये हेतौ चेति। साध्ये प्रत्यक्षपदस्य सामान्यपरत्वे आत्मादौ व्यभिचारः हेतौ च सामान्यप ला
रत्वे उद्भूतरूपस्य द्रव्यप्रत्यक्षत्वाव्यापकत्वादसिद्धिरिति भावः। तत्त्वकस्यैव वायुर्बहिरिन्द्रियप्रत्यक्ष इति
स्थापनानुमानं बोध्यं। अनेकत्वसंकोच कल्पना भयादाह विभावयन्नाह अपदे वेति। अत्रापि व्यात्म
त्वादौ व्यभिचारशंकावारणाय प्रथमस्योद्भूतरूपे द्रव्यप्रत्यक्षत्वाव्यापकादसिद्धिवारणाय द्विती

म० यस्य द्रव्यपदस्य बहिर्द्रव्यपरत्वं बहिष्ट्वं आत्मभिन्नत्वं तन्नत्र वृत्ये महत्वसामान्यस्यापि न दृष्टांतत्वं सं
भवति तस्यात्मभिन्नद्रव्यव्यभिचारित्वाभावादत आह। महत्वपदं चेति। जन्यमहत्वे त्विति यद्यपि जन्यमह
३०५ त्वसामान्यस्यापि न दृष्टांतत्वं संभवति तस्यात्मभिन्नघटादिमहत्त्वे अभूतरूपव्यभिचाराभावे न हेतुत्वसंभवात्त
३०५ थापि सादिविशिष्टमहत्वपरत्वेन महत्वपदस्यैवाहत्य तत्परत्वं महत्त्व...मंतर्गडु नाजन्यमहत्वोपवर्णनेन तथा
पि व्याप्यपदे अव्यभिचारित्वपदे वा अन्वयितावच्छेदकावच्छेदेन वस्त्वायान्वये बोधयति ध्वनोरस्याव्य
भिचारीतिवत् द्रव्यवृत्त्यव्यभिचारीत्यत्र योग्यतावलात् महत्वत्वेन दृष्टांतप्रयोगे महत्वत्वावच्छेदेन
बहिर्द्रव्यत्वाव्यभिचारित्वाभावेनानन्वय एवं स्यादतो जन्यमहत्वपदमुक्तं जन्यमहत्वत्वावच्छेदेन बहिर्द्र
व्यत्वाव्यभिचारस्य तत्सामानाधिकरण्येनोद्भूतरूपव्यभिचारस्य च संभवात्तेन रूपेण दृष्टांतोपन्यासे
नानन्वय इत्यभिप्रायेण तथा व्याख्यातमिति भावः। अनुव्यापकेत्यादि। व्यभिचारित्वं यदि व्यापकत्वप्रतियो
गिकाभाववद्वृत्तित्वं तदा वृत्त्यवच्छिन्नाभावमादाय तद्रूपत्वादौ व्यभिचारः। यदि व्यापकत्वावच्छिन्ना

भाववद्वृत्तित्वं तदा। सिद्धिः सत्त्वादेरपि तद्व्यापकत्वात् इत्यत आह। व्यापकेति। न हीदृशव्यापकतावच्छेदकमु
द्भूतरूपत्वं तदवच्छिन्नाभाववद्वृत्तित्वस्य प्रत्यक्षस्पर्शाश्रयत्वे सत्त्वान्नासिद्धिरिति भावः। न
नु द्रव्यपदेति। प्रत्यक्षत्वव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वस्यैव व्याप्यत्वसंभवे द्रव्य
पदस्य व्यभिचारवारकतया असिद्धिमात्रवारकत्वादिति भावः। विशिष्टाभावस्येति। प्रत्यक्षत्वसमाना
धिकरणत्वं ताभावप्रतियोगितावच्छेदकत्वाभावात्। द्रव्यप्रत्यक्षत्वसमानाधिकरणत्वं नाभाव
प्रतियोगितावच्छेदकत्वाभावस्यातिरिक्तत्वादित्यर्थः। प्रत्यक्षत्वव्यापकतावच्छेदकरूपावच्छिन्नाभा व
वात् बहिर्द्रव्यप्रत्यक्षत्वव्यापकतावच्छेदकोद्भूतरूपत्वावच्छिन्नाभावस्यातिरिक्तत्वादित्यर्थ इति त
त्कश्चित्। तत्तुच्छो द्रव्यपदार्थस्य प्रतियोगितावच्छेदककोटिप्रविष्टत्वाभावेन विशिष्टाभावस्येति ग्रं
थविरोधादिति। न हीदृशव्यापकतावच्छेदकत्वेनोद्भूतरूपत्वादेरज्ञाने पक्षेन हेतोरेव दुर्ज्ञेयत्वं तेन ता
नेव तथैव हेतुकरणमनुचितमित्याशयेनाह प्रत्यक्षत्वेति। व्यभिचारश्चेति। मलस्येतत्स्वरत्वप्रसंगनिरा

५०

रथितुं व्याघ्रात्ते द्रव्यत्वाव्यभिचार इति। तथा च न शोध्यवैयर्थ्यमिति भावः। ननु शाकपाकजत्वस्य सं
दिग्धोपाधिमध्येव सामान्यत्वाद्व्यभिचारानुमाने हेतोः स्वरूपासिद्धिसंदेह इत्यत आह। अनुमान
२०६ मिति। साधनविकलोयमिति। अत्रान्वयदृष्टांतत्वव्युदासाय साध्यवानिति रेकदृष्टांतत्वव्युदासाय। व्यति
३०b एवं मित्रातनयत्वव्यापकत्वस्य सत्त्वं तार्थत्वोऽप्रागभाववदिति। व्यभिचारित्वनिरुक्तावस्तद्विशे
षणं विना दुर्ग्रहत्वाद्व्यनिष्टेत्यादिन्यायेनन वैयर्थ्यमिति भावः। सामानाधिकरण्येन व्यापकत्वविशे विशेषितं
षितं रक्तिमत्वमिति व्यभिचारित्वे रक्तिमत्वस्य विशेष्यत्वादिति। फलत इति। यत्किंचिदधिकरण
निष्ठात्यंताभावाप्रतियोगित्वबुद्धेः सामानाधिकरण्यबुद्धेः फलत्वादिति भावः। नन्वेवं श्यामत्वे व्यभिचार
स्तस्यापि मित्रातनयत्वसमानाधिकरणस्य शाकपाकजत्वव्यभिचारिणः श्यामत्वव्यभिचाराभावादत
आह। तेनायमर्थ इति। पत्वतत्त्वयोरननुगमान्निष्कृष्याह। मित्रातनयेति। तेनेति। श्यामत्वस्य मित्रातनये ३
शाकपाकजत्वव्यभिचारित्वं नास्ति किंतु काकादाविति तद्व्युदासः। मतांतरमाह। अत्र व्यभिचारश्चेति। शे

५०६

बवैयर्थ्यादाह। बहुव्रीहिरिति। मित्रातनयत्वे अव्यभिचारिव्यापकं यस्येति बहुव्रीहिरित्यर्थः। मित्रातनयत्व
व्याप्यत्वं तु फलितार्थः। इदं च श्यामत्वादौ व्यभिचारवारणाय दृष्टान्तासिद्धिनिरासायाह। यदिति। इदं गुणत्व
अघटत्वादित्यत्राघटत्वे अघटत्वाव्यभिचारित्वे सति अघटत्वावच्छिन्नगुणवत्वव्यापकघटभिन्नद्रव्य
३ त्वव्यभिचारि अपच्चगुणत्वव्यभिचारि इत्यत्राघटत्वं दृष्टान्तरित्यर्थः। यथाश्रुताव्यभिचारित्वेनैव सा
मंजस्ये अव्यभिचारपदस्य व्यापकत्वमर्थं कल्पयित्वा पुनर्बहुव्रीहिणा व्याप्यत्वे पर्यवसानेन संदर्भविरु
द्धमित्यस्वरसः। आहुरित्यनेनमर वितः विशिष्टसाध्यव्यापकोपाधिस्थलीयव्यभिचारानुमाने हेतौ वि
षयाव्यभिचारित्वे सतीत्यस्य विशेषणत्वेनात्यर्थकरणस्य फलान्तरमाह। प्रमेयत्वादावपीति। वायुः
प्रत्यक्षः प्रमेयत्वादित्यत्र प्रमेयत्वस्य बहिर्द्रव्यत्वाव्यभिचारित्वाभावेऽपि प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि ब
हिर्द्रव्यत्वन्तरूपव्यभिचारित्वादित्यनेन व्यभिचारानुमानसुकरमिति भावः। एवं उक्तमेण उपाधिसंव
हारविषयत्वं साध्यात्यरंपरेति। विशिष्टसाध्यव्यापकव्यभिचारेण विशिष्टसाध्यव्यभिचारानुमानेन
उपाधित्वं २

यत्किंचिद्विशिष्टेनशुद्धसाध्यव्यभिचारःसाधनाभावइतिपरंपरयेत्यर्थः।तदुन्नायकतेति।शुद्धसाध्यव्यभिचा
रोन्नायकतेत्यर्थः।तथात्वं।उपाधिव्यवहारविषयत्वं।रूपवदिति।इदंतेजोद्रव्यत्वादित्यादौयाशुक्लरीत्याव्य
भिचारोन्नायकस्यशुभ्रभिन्नादिनारूपेणेत्यर्थः।व्यभिचारोन्नायकत्वंयदिसाधननिष्ठःसाध्यव्यभिचारोन्ना
यकव्यभिचारप्रतियोगित्वंतदसाधनव्यभिचारीत्यस्यैवेत्यर्थ।मितरतोभावएवव्यभिचारेति।यत्रकुत्र
चिदिति।साधननिष्ठत्वंनविवक्षितमितिभावः।एवंवासाधननिष्ठत्वस्याविवक्षणेवा।साधनव्यभिचारि
त्वस्यपर्याप्तस्यपृथिवीत्वव्यभिचारित्वरूपवत्त्वेसत्वादाहावकुत्राहिदिति।साधनंव्यभिचारियस्ये
त्यर्थः।एवमपि।वकुत्राहि।एतसाधनाव्यापकतार्थलब्धावपि।जलत्वभिन्नइति।जलत्वादौव्यभिचारवारणा
य।साधननिष्ठमिति।रसवत्त्वनिष्ठपृथिवीत्वव्यभिचारित्वंचनगुरुत्वव्यभिचारोन्नायकमितिभावः।उ
क्तिवैचित्र्यादिति।साधनविशेष्यकव्यभिचारोन्नयनयोःपंचव्यभिचारित्वमितिरूपवल्लक्षणार्थः।तत्रया
प्यतापदार्थमुद्ध्यासाधननिष्ठत्वंयद्व्यभिचारित्वेलब्धं।ऽपकनसाधननिष्ठंयद्व्यभिचारित्वमितिशब्दादे
वतस्यलाभः।उन्नायकत्वमर्यादयावसाध्यव्यभिचारित्वमाप्यत्वमात्रस्यलाभइत्युक्तिवैचित्र्यमितिभा

वः॥ नद्याप्येति। व्यभिचारव्याप्येत्यर्थः। कोटिद्वयविष्टेनेति उपाधिव्यभिचारित्वस्य साध्यव्यभिचारव्याप्यतया
नुपाधेस्तदवच्छेदककोटिद्वयविष्टत्वादिति भावः॥ मात्रेणेति न तु व्यभिचारोन्नायकव्यभिचारप्रतियोगि
त्वेनेत्यर्थः। स्वयं वोक्तव्यभिचारोन्नायकत्वस्य विवक्षणे च स्नेहव्यापकत्वात् स्नेहसमानाधिकरणान्योन्या
भावप्रतियोगितानवच्छेदकत्वे सति रश्मित्वात्। एतेन प्रमेयत्वादिना स्नेहव्यापकत्वस्य सर्वत्रैव सत्त्वा
द्व्यभिचार इति परास्तं। स्नेहस्य जलत्वं व्यभिचारित्वाय याकृतसाधनव्यभिचारित्वेनापि वारणसंभवा
द् बहुव्रीह्याश्रयणफलं दर्शयितुमुदाहरणान्तरमाह। घटेन वेति जन्यद्रव्यत्वादाविति। घटत्वव्यभिचारित्वं
हि घटत्वाभाववत्समवेतत्वं तच्च नित्यद्रव्ये तदभावात् तत्र व्यभिचारवारणाय जन्येति॥ घटरूपा
दौ व्यभिचारवारणाय द्रव्येति। द्रव्यत्वे घटव्यभिचारित्वस्य सत्त्वात् साधने व्यभिचारित्वस्येति बहुव्रीहि
राश्रयणीय इति भावः॥ व्यभिचारोन्नायकस्यात्तद्व्याप्यकोटिद्वयविष्टस्य साध्यसमानाधिकरणेति। तेनै
द्रव्यत्वादित्यत्र स्पर्शसामान्याभावस्य विरुद्धस्य तादृशव्यापककोटिद्वयविष्टत्वाभावेनैव वारणसंभवा

पीतस्पर्श [illegible]

तन्नोक्तं। साध्यसमानाधिकरणत्वं च साधनाव्यापकतानियामकसंबंधेन बोध्यं। तेन संबंधांतरेण सा
ध्यसमानाधिकरणत्वेपि शब्दादेर्न क्षतिः। एवं च सद्धेतौ साध्यसमानाधिकरणस्य साधनाव्यापकस्य प
रं व्यभिचारोन्नायकत्वमुक्तं तच्च प्रकृतसाधने साध्यव्यभिचारानुमितिजनकतावच्छेदकव्याप्यवच्छेदक
कोटिप्रविष्टत्वं। सद्धेतौ च साध्यव्यभिचारानुमितिप्रयोजकत्वासंभवान्नाहरा धर्मव्युदासः। इदं गुरुरूपा
दित्यत्र पृथिवीत्वाभावेति व्याप्तिग्रहसत्त्वं निराकरोति। एवं रूपेणेत्यादिना। पृथिवीत्वाभावस्य वारणो
यताप्रयोजकं रूपमादर्शयति। गुरुत्वव्यभिचारित्वे तैजसरूपं तन्निष्ठव्यभिचारप्रतियोगिनस्त्वपर्यः।
पृथिवीत्वाभावव्यभिचारित्वे पृथिवीरूपे गुरुत्वव्यभिचाराभावात् गुरुत्वव्यभिचारित्वे तेजोरूपे पृथिवी
त्वाभावव्यभिचाराभावात् व्यभिचारोन्नायकत्वाभावेन तस्योपलक्ष्यत्वमिति भावः। यत्रेति। यदधिकर
णावच्छेदेनेत्यर्थः। तत्र तदवच्छेदेन। पृथिवीत्वाभावस्य पृथिव्यवच्छेदेन साधनाव्यापकत्वं तदवच्छेदे
नैव गुरुत्वव्यभिचार इति तद्व्युदासः। नन्वेवं रूपवान् द्रव्यत्वादित्यत्रापि पृथिवीत्वाभावस्योन्नायकत्वज

अप्रवेशे केवला... जनकता
वच्छेदकव्याप्य...

अप्रकोमोलकत्वा
मावेदी।

लत्वमात्रविशेष्यकायाधीस्तद्विशेष्यत्वेसत्तात्यादिषुगुरुतरीत्याव्यभिचारोनत्वन्यतमस्यवारणमयुक्तमतज्ञा
तायय्यावत्पंचविदिति।यत्साधनवान्नेति।तत्रउव्यत्वस्येत्यादिहेतुरूपस्यसाधनस्यभेदादितिभावः।तदुक्ता
यकत्वं।व्यभिचारोन्नायकत्वं।अत्राभावमात्रस्यानुपाधितापत्तिः वैयर्थ्येनतस्यव्याप्यतावच्छेदककोण
टावच्छेदेशादित्यस्वरसः।हेत्विदित्यनेनसूचितः।मूले।अर्थांतरस्येत्यादि।तथाचार्थांतरेणपुरुषस्यदु
ष्टत्वेपिपरंपरयाव्यभिचारोन्नायकतयाप्युपाधेरनुमानदूषकत्वंनानुपपन्नमित्यर्थः।अर्थांतिरमपिना
स्तीत्याह।आभासांतरस्येति।सोपाधौव्यभिचारादेरावश्यकत्वादादाभासांतरस्यतत्राभावादि
त्यसंगतमित्यतःस्वरयतिदीधितौतदानीमिति।तथाचव्यभिचारस्यास्फुरणेपितुउपाधिमात्रोद्भावने
नवादिनिग्रहात्तस्यावश्यंदोषत्वमभ्युपेयमतस्तस्यापिदोषत्वेनाकांक्षितत्वात्तदुद्भावनेनार्थांतरमित्य
र्थः।मूलेभावत्वादिकंदोषइत्यस्यधूमोविनाशीजन्यत्वादित्यादिउपाधेर्दूषणत्वेहेत्वाभासविध
यानिग्रहस्थानांतरत्वेनवाआद्येतद्दोषस्यव्यभिचारादेरितिउपाधेरनुमितितत्कारणज्ञानंप्र

म०

तिसाक्षाद्विरोधित्वेन हेत्वाभासत्वाभावादिति भावः। तं। व्यभिचारादिकं। तत्साधकस्य व्यभिचारा
दिसाधकस्य। अप्राप्तकालत्वादिति। तदानीमनाकांक्षितत्वाभावादिति भावः। परंपरेति। दुष्टसाधक
३०९ व्यभिचारसाधकीभूतावच्छिन्नसाध्यव्यभिचारसिद्धिद्वारेत्यर्थः। अवच्छिन्नसाध्यव्यापकस्येति। उप
वनेति। एवं एतेनान्वीयते। ननु तस्या ज्ञानत्वं परासाधारणं। तत्साधकस्यैव तदानीमाकांक्षेत्यत आह। अ
न्यथेति। अन्यथा। तत्साधकपरंपरायाः। अपि तदानीमाकांक्षितत्वे। तथात्वं। अप्राप्तकालत्वं। द्वि
पाकांस तीयं [illegible] प्रकुरुते। नवेति। विशेष इति। तत्साधकपरंपराया निग्रहस्थानत्वाभावादुपाधेश्च निग्रहस्था
नत्वान्न तो विशेष इति भावः। तथात्वायोगात्। निग्रहस्थानत्वायोगात्। विभाजकेति। प्रतिज्ञाहानिः प्रतिज्ञा
न्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरं अर्थान्तरं निरर्थकं अविज्ञातार्थकमपार्थकमप्राप्तका
लत्वं न्यूनमधिकं पुनरुक्तमननुभाषणं अप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्या
नुयोगोपसिद्धान्तो हेत्वाभासश्च निग्रहस्थानानीति विभाजकसूत्रेण। एतेन ज्ञानरूपसिद्ध्यादीनां वि ज्ञानरूपसिद्धि

ग्रहस्थानत्वज्ञापये हेत्वाभासस्योपयोक्ता इतीति चरमसूत्रस्य चकारस्यैवानुक्तसमुच्चयपरतयाभिध्वा
दिव्यभिचारानमपास्तं। तत्रयपयोक्तत्वस्यैव विधेयतया निग्रहस्थानत्वस्याविधेयत्वादिति। व्यभिचारस्यैवे
ति उन्नायकस्योत्तरत्रोन्नयने ऽनन्वयि। तदुभयेति। व्यभिचारोन्नायकोपाधिरुन्नायकं च तदुभयं। तथा
त्वापातात्। निग्रहस्थानत्वापातात्। कथकसंप्रदायानुरोधादिति। कथकानां तादृशव्यवहारादित्यर्थः।
तदुद्भावकत्वं उपाध्युद्भावकत्वं। असामर्थ्यकालत्वेन निग्रहस्थाने न एता भवतः। शुद्धसाध्यव्यभिचार एवान
न्तरोपाधिः तत्र शुद्धसाध्यव्यभिचारोऽन्नयते तायां कुत इत्याकांक्षायां तद्धेतुत्वेन। शुद्धसाध्यव्यभिचार
हेतुत्वेन। विशिष्टसाध्यव्यापकोपाधिस्थले त्वाह। विशेषणेति। विशिष्टसाध्यव्यापकस्य परंपरया
व्यभिचारानुमानपक्षेत्वाह। विशिष्टेति। अत्रच विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यभिचार
हेतौ। विशेष्ये। विशिष्टसाध्यव्यभिचारे। अयममप्युपाधेरुपन्यासस्समर्थयितुमाह। वक्ष्यते चेति। सा
ध्यव्यभिचारिव्याप्यत्वेनोपाधिव्यभिचारस्योद्भावने ऽनुमितिप्रतिबंधकत्वरूपेणाप्रयममनुपासु

क्र१

म०
310

पन्यासः समर्थितो भवतीति भावः। व्यभिचारित्वादेः संबंधित्वे विवादादुपाधिमानित्यपेक्ष्योपाधिव्यभि
चारज्ञानित्युक्तं। यत्किंचिद्धर्मावच्छिन्नसाध्यव्यापक। निश्चयस्य पक्षेतरेपि सत्वादाह। उपाधित्वोपयिके
ति। स्वानधिकरणीभूतसाधनाधिकरणवृत्ति[illegible]धर्मावच्छिन्नसाध्यव्यापकत्वं उपाधित्वोपयिकं
तस्यानिश्चयादित्यर्थः। ननु यत्र कथंचित्साहचर्यव्यापकत्वनिश्चयो जातः तत्र स उपाधिः स्यादत इष्टा
पत्तिमाह। अनुकूलेति। तर्कादिनेति आदिपदात्स्वतःसिद्धव्यभिचारग्रहादिपरिग्रहः। निश्चितोपा
धिरिति। उपाधिनिश्चयो नुमानदूषकः संदिग्धोपाधित्वस्याप्याशंकनीयत्वान्निश्चितोपाध्यभि
प्रायकत्वमस्य स्फुटीकर्तुं निश्चितेत्युक्तं। स्वव्याघातकत्वेनानुपाधित्वमिति मूलोक्तयुक्तिं निराकरो
ति। न स्वव्याघातकत्वादिति। स्वमनुमानसामान्यं व्याघातकत्वं तद्दूषणोत्पादकत्वमित्यर्थाभि
प्रायेणाह। तथेति। स्वव्याघातकत्वेहीत्यर्थः। साधारण्यं दूषणोत्पादकत्वं तदभावात्। तत्र साध्य
व्यापकाव्यापकत्वेन संदिग्धाव्यापकत्वनिश्चयेन पक्षेतरस्य दूषकत्वाभावात्। स्वस्यायं स्वपयु

प्रु०

त्, व्यभिचारानुमाने तद्व्याघातकत्वं स्वसमानजातीयेन पक्षेतरांतरेण न दूषणोपादकत्वमित्यभिप्राये
ण । हानापीति । तद्व्यभिचारेण । पक्षेतरव्यभिचारेण । द्रव्यो वह्निव्यभिचारी पर्वतेतरत्वव्यभिचारित्वादि
त्यत्रापि पक्षेतरत्वोपाधित्वसंभवस्य पर्वतः । अवश्यंभावेना । अवश्यंभावनिश्चयेनातदयोगात् । साध्यव्या
प्याव्यापकत्वेनोपाधेः साध्याव्यापकत्वनिश्चयेनोपाधित्वायोगात् । व्यभिचारानुमापकव्यभिचारस्य तियो
गित्वमुपाधिलक्षणे पक्षेतरस्योपाधित्वेऽनुमात्रोच्छेदाद्व्यभिचारानुमानस्याप्युच्छेद इति स्वीयस्योपाधि
७ लक्षणस्य व्याघातकत्वान्नमनुपाधिरिति निश्चयाव्याख्यानमाक्षिपति । अत एवेति । अनुकूलतर्कादिना साध्यव्याप
कताग्रहे व्यापकव्यभिचारिणि व्याप्यव्यभिचारावश्यंभावेन व्यभिचारानुमानस्योच्छेदादेव । इष्टकताबीज भा०ग
सत्वे पक्षेतरस्यानुपाधित्वमेवादः किं मूलकस्तत्राह । कथं केति नोपाव्य इति । स्वार्थानुमाने दूषणं भवत्येवे
ति भावः । निर्युक्तिकमेवादो नव्यदेव इत्यस्वरसो वदंतीत्यनेन सूचितः । तत्र । पर्वतावयववृत्यन्यत्वं । तत्र
पर्वतावयववृत्पादेः । पक्षस्यैवेति । पक्षस्य व्यावर्त्तिः साधनाव्यापकत्वमुपयुज्यते पर्वतीयवह्न्युपादेव्या

म०३ रत्निक्तनञुत्रापुपयुज्यतेइतिभावः।तथाचोपाधित्वोपयिकपक्षमात्रीयव्यावृत्तिप्रयोजकविशेषणवत्त्वा
३११ दितिमूलार्थः।केचित्तु:विशेषणवत्त्वादितिनमतुप् किंतुतत्स्यार्थकोवतिप्रत्ययः।तथाचपक्षमात्रव्यावर्त्त
३११ कविशेषणंयस्यसतथापक्षेतरःसाध्यव्यापकताग्राहकानुकूलतर्काभावेननतुल्यत्वादित्याहुः इदंपक्षमा
त्रव्यावर्त्तकविशेषणवत्त्वं।तादृशेतिउपाधित्वोपयिकेत्यर्थः।व्यापकताग्राहकानुकूलतर्काभावस्यैवदूर्व
गंयेप्रक्रांतत्वात्तत्परामर्शकत्वात्संगेतिरनत्तत्वतियोगिपरामर्शकतयाव्याचष्टे।अतएवेति।अत्राध
र्मोस्वतंत्रेति।आर्द्रेंधनत्वेनवह्नित्वेनैवचकारणतातयोःसंयोगः प्रत्यासत्तिःपरस्परप्रत्यासन्नत्वमात्रमे
वकारणतोकार्योपधायकत्वादित्यर्थः।अतःआर्द्रेंधनप्रभववह्नित्वस्यकारणतावच्छेदकत्वसंभवेना
त्।आर्द्रेंधनप्रभववह्नित्वस्यकारणतावच्छेदकत्वाभावेकिंतेनरूपेणव्यापकत्वेननिर्वहतितद्रूपावच्छि
न्नव्यभिचारेणव्यभिचारानुमानंवाऽयाधेनहात्यादि।तत्वात्व्यापकतावच्छेदकत्वान्न।द्वितीयेतदवच्छिन्ने
ति।अतिरिक्ततयेति।आर्द्रेंधनत्ववह्नित्वावच्छिन्नाभ्यामतिरिक्ततयेत्यर्थः।वस्तुगतिमनुरुध्यवेदनेनस्व
ए रूपेणकारणत्वमपिव्यवस्थापयति।सत्यपीति।विशेषरूपेण।आर्द्रेंधनप्रभववह्नित्वेन।अवच्छेदेति।दा भावा
३५५

हप्रतिबंधकाभावानां दाहत्वकारणत्वस्य क्लृप्तत्वात् मंप्रतिकारणत्वस्याक्लृप्तत्वादिति भावः। प्रतिबंधका
भावानामिति। बहुवचनेन मंत्रौषधिभेदेन कार्यकारणभावानां बहुत्वं सूचितं। इंधनव्यक्तिभेदेन कार्यका
रणभावस्यानंत्यादिति गौरवं दर्शयति एकस्यामिति। तत्रैवातदिंधनव्यक्तावेवाव्यवंतरात्व। ज्याईंधनव्यक्त्यं
धर्मोत्पादितपेतेनसंबंधेन तरात्तु। एतेन संयोगसंबंधेन धर्मोत्पादप्रदर्शनेन प्रतिबंधकाभावानां कार्यस्य संयोगघटितसामानाधि
करणप्रत्यासत्त्या कार्यकारणभावकल्पनया विगौरवस्य समाधानेन संवतीति सूचितं। ननु मण्यादीनां प्रतिबं
धकत्वे संयोगः प्रत्यासत्तिर्मंत्रस्य च वेदमादहत्वित्यादौ दृष्टत्वं कार्यस्य च धर्मस्य न संयोगजन्यता घटकप्रत्यासत्तिव्य
भिचारात् किंतु प्रत्याकत्वं तथा चयत्रोपधायकता संबंधेन धर्मोत्पद्यते तत्र संयोगेन तादृशो देशपत्वेन वा मण्यादि
मंत्रयोरभावइत्येवंरूपसमानाधिकरणप्रत्यासत्त्या कार्यकारणभावस्य कल्पने तु प्रथमतिगौरवं। ज्ञानप्रयत्ने
धने मण्यादिसंबंधो ज्ञानतः देवादृष्टो न ज्ञानतः तत्रापि तु तत्संबंधेन समानाधिकरणसामानाधिकरण्येन धर्मसामानाधिकरण्यत्यापाद
नं चान्यथातदिंधनजन्यधर्मस्याप्रसिद्ध्या तु तत्र मेण प्रतिबंधकाभावस्य हेतुत्वाकल्पनात् सामान्यसामा

भ७३

312

ग्रीतोधर्मसामान्योत्पत्त्यापादनादिति चेन्न उपधायकत्वादीनां कार्यतावच्छेदकसंबंधत्वे मानाभावात् अ

मानुपधायकवह्निपुंजप्रतिरुद्धेंधनव्यक्तेः फलाभावेन विशिष्टहेतुत्वाकल्पनात् मोपधायकेंधनानां विशिष्ट

हेतुत्वकल्पनात् तादृशविशेषसामग्र्याविरहेणापि धर्मानुत्पादस्य समर्थनसंभवात्। एवमपि मणिमंत्रौषधा

दिभेदेन कार्यकारणभावाकल्पनानिष्कुरत्वाच्चेति। अत एव वह्नित्वेनेंधनत्वेन च धर्मं प्रति हेतुता तत्पोष्णी

प्रजनकभावः अन्यासत्तिः परस्परजन्यासत्तीनामेव कारणानां कार्योपधायकत्वादित्यपास्तं। परंतु धर्मज

नकतावच्छेदको जातिविशेष एव वह्निनिष्ठ इति तद्वृत्तार्णत्वादिना संकरप्रसंगेन तादृशजातेरसंभवात्।

नच तृणजन्यतावच्छेदकतया तार्णत्वादेर्नानात्वेप्यदोषात्तार्णत्वादिव्यापकं वैजात्यमिति वाच्यं। अनंतानां

वैजात्यानां तदवच्छिन्नं प्रत्यनंतानां कारणत्वानां प्रतिबंधकत्वानां च कल्पने गौरवात्। अपि इंधनज

न्यवह्नित्वेनैवोपाधिना कारणत्वकल्पनस्य लघुत्वादेवं विलक्षणेंधनजन्यवह्निना पाके रसविशेषो भवती

ति यथा हरिद्रानलेन पक्वे हरिद्राजलेन सिक्तं लाहिकं मांसं तंडपयोगात्मसोमारयति तत्र तुल्यन्यायतया रसा

दिविशेषजनकतावच्छेदकत्वेन हरिद्रानलादौ जात्या संकरप्रसंगाच्चेति। उत्तानातो रूपादिपरावृत्ति

उपधायकत्वादीनां संबंधत्वे मानाभावादेव।
उपधायकताया संबंधत्वा
भावादेव अन्यासंबंधेनाइंधनत्वविशिष्ट वह्नेर्हेतुत्वमेत न्मते तत्रैव उपधायकत्वा
वत् जन्यजनकभावसंबंधेनाभावात्
तपास्तः।

भक्तात

५१२

किल तृणदाहवत्किंचिद्धर्मजनकतावच्छेदको नोदनाभिघातत्वादिकिंतु इंधनसंयोगगतजातिविशेष एव कल्प्यते
दाहप्रतिबंधकत्वेनापि मतानां च मण्यादीनां तदवच्छिन्नं प्रत्येव प्रतिबंधकत्वं कल्प्यते तृणपरत्वादिभेदेन दाहस्य
नानात्वाद्दाहे वक्ष्यमाणो वनत्वप्रतिबंधकत्वकल्पने कार्यकारणभावबाहुल्यप्रसंगादित्याहुः। मूलानुसारेण पुनरंतर
माह। महतो ति। आद्यैंधनत्वेन वह्नित्वेन च धर्मं प्रति हेतुत्वे तदवच्छिन्नं प्रत्युक्तादेव प्रकृष्टधर्मोत्पत्तिर्विर्याप
त्तेनेतरत्वे ति। आद्यैंधनप्रभववप्रकृष्टवह्नित्वतुल्यादानत्वेन हेतुत्वमित्यस्य मुदायार्थः। दाहप्रतिबंधकाभाव
स्यापि सत्वे प्रदर्शयितु माह। तत्प्रभवे ति। वह्न्यंतरे। मुख्ये धनजन्यवह्नौ व दंतात्प्रत्यक्षतो भावनंत बाणे तु धर्म
स्य प्रकर्षो न जातिविशेषः किंतु महत्वातिशयः स च न कार्यतावच्छेदकः। धर्मस्य स्वकारणतावकृष्ट महत्वस्य चाव
यवगतबहुत्वातिशयादेवोत्पत्तेरित्यादिकमिति। मूलानुमपि ननु तामंगाय स्वरयति। आद्यैंधनप्रभवव
ह्नि सामान्यमिति। नाद्य इति। आद्यैंधनप्रभवेत्यर्थः। अर्थवशात्संपन्नमिति। वह्न्याद्यैंधनयोर्धर्मजनकयोर्नि
त्यजनकभावः प्रत्यासन्निरित्यभिप्रायः। फलत इति। आद्यैंधनप्रभववह्नित्वेन व्यापकस्योभयपरापि सि

म० 313

मवादिति भावः ॥ नन्वाह श्यान्वयेति ॥ उद्भूतरूपवत एव बहिरिन्द्रियस्य प्रत्यक्षं न तु तद्भिन्नस्येत्येवमाकारकेत्य

र्थः ॥ तत्त्वं पुनरिति ॥ बहिरिन्द्रियस्य मूर्त्तस्य वा प्रत्यक्षं प्रति लाघवादुद्भूतरूपत्वेनैव कारणत्वं तत्र प्रत्य

क्षस्य विषयतारूपस्य समवाय इत्येवं रूपसामानाधिकरण्यं प्रत्यासत्तिः विषयस्य सामान्यतो विषयत्वेन

विशेषणतया तद्व्यक्तित्वेन वा प्रत्यक्षे हेतुत्वं न तु यावानेव विषयनिष्ठो धर्मस्तेनेत्यादिर्ग्रन्थो वोक्तमि

त्यर्थः ॥ मूले वैयर्थ्यकादिति ॥ रूपाभावे हाकायहारपरिणामस्य प्रयोजकतया वैयर्थ्येन प्रतिपादिनादि

तिभावः ॥ घटोन्मज्जनेस्यष्टयति ॥ ध्वंसप्रागभावेति ॥ जन्यत्वेन विनाशित्वे साध्ये घटध्वंसस्य ध्वंसप्रस

ज्येत तथा च यदानीं घटध्वंसस्य तत्प्रागभावस्य चासत्त्वेन तत्काले ध्वंसस्य प्रसंग इत्यर्थः ॥ नन्वप्रा

गभावस्येति ॥ नन्वप्रागभावस्य ध्वंसप्रतियोगिनो ध्वंसकालेऽसत्त्वे प्रागभावोन्मज्जनं स्यादिति भावः ॥ प्र

तियोगिध्वंसो यथा प्रागभावस्य ध्वंसस्तथा ध्वंसध्वंसोऽपि प्रतियोगिध्वंसस्तथा च तत्काले प्रतियोगिध्वं ३१३

सानधिकरणत्वमेव नास्तीति न तदुत्पत्तिजनकत्वमिति भावः। अप्रामाणिकेति नवजन्यभावत्वापेक्षया लाघवाज्जन्य
त्वेनैव ध्वंसप्रतिकारणत्वकल्पने सामग्रीबलात् ध्वंसस्यापि ध्वंसः फलमुखगौरवस्यादोषत्वादिति वा
ध्येयं। तथापि प्रागभावप्रतियोगित्वरूपजन्यत्वाल्लाघवेन सत्वेनैव ध्वंसहेतुतायां उचितत्वान्नित्य
स्य च व्योमादेः समवायिकारणनाशाभावाद्गुणादेश्चाश्रयविनाशविरोधिगुणयोरभावेन
न विशेषसामग्र्या विरहेण विनाशोपपत्तेः पाकस्य पार्थिवरूपादिनाशकत्वादन्यथाजन्यत्वेन हे
तुत्वेऽपि पाकजलतेजोऽवयवरूपादीनां विनाशः स्यात् यदि च कालिकसंबंधेन तज्जनकत्वापेक्षया
सता
समवायेन तद्धेतुत्वेन लाघवं कालिकसंबंधेन तद्धेतुत्वं ध्वंससाधारणमिति तस्यापि विनाशः स्या
पाद्यते तदा विशेषसामग्रीनिरपेक्षस्य तन्मात्रस्य ध्वंसप्रतियोगिजनकत्वेन जन्यमात्रस्यैव क्षणिकता
ततकाले
पत्तिः विशेषसामग्र्यपेक्षणे च रूपादिष्विव ध्वंसे फलाभावेन विशेषसामग्र्यकल्पनान्न तस्य विनाश इति
रूपव·
अत एवाह। अप्रामाणिकध्वंसतत्कारणधारेति। ध्वंसानन्तत्वेति। ध्वंसस्याविनाशित्वमित्यर्थः॥

भ०
315

शाकपाकजत्वादेरकारणस्यापि व्यापकत्वोपदर्शनात्कार्यकारणयोरेवेत्यंशकनमनुचितमतो व्याचष्टे का
र्यकारणभावग्राहकेति। नन्वेवमस्तु तत्त्वं नियमतस्तत्त्वानुव्यवतीति विषयत्वं तत्र कार्यकारणयोस्तत्त्वयोस्त्वाक
त्वमितिभावः। मूलेतदुपजीव्येति। नच द्रव्यत्वेन गगनादेः परिमाणवत्त्वानुमाने कथं कार्यकारणभावानु
पजीव्य इति वाच्यं। घटादौ परिमाणद्रव्यत्वयोर्निरुपाधिसहचारग्रह एव तादृशव्याप्तौ मूलं घटादौ
परिमाणसमत्वे चावयवगतमहत्त्वबहुत्वादीनां तत्कारणत्वकल्पनमेव तादृशव्याप्तौ मूलमित्यादिरात्म
सर्वत्रैव तस्योपजीव्यत्वादिति तत्समसीलं निरुपाधिसहचारादिकमुपजीव्येत्यर्थः। नन्वभिहितमे
वमूलेस्व व्याघातकत्वमत आह स्वव्याघातकत्वेचेति। निराकृतमेवेति। नहि नेत्सर्वानुमानसाधा
रणमित्यादिनाशंकापिशाचित्वादिति। शंकानुमध्येसर्वत्र संभावितत्वेपिशाचीतुल्यत्वादित्यर्थः।
व्यभिचारशंकाधानप्रयोजनकशंकासत्वे तदाधानमावश्यकमित्याशयेनाह। तदाहितापत्तीति पक्षेत
सोपाधित्वशंकाहितापत्त्यर्थः। पक्षे व्यभिचारशंकेति पक्षे व्यभिचारशंकायायानत्पत्तिबाधिकात

३२४

यात् तदाहितापि शंका न प्रतिबंधिकेत्यर्थः॥ भंगप्रसंगमात्रेति॥ मात्रपदेन कार्यकारणादिव्युदासः॥ अनुमा
नानां॥ गगनेपरिमाणवत्त्वाद् द्रव्यत्वादित्यादीनां॥ विलयप्रसंगादिति॥ पूर्वत्रैव पक्षेतरोपाधित्वशंकाया
मपवेनिरुपाधित्वाप्रसिद्धेरिति भावः॥ अयमकल्पं दूषयति॥ संदिग्धोपाधाविति॥ साधनाव्यापकत्वसंदे
हे साध्यव्यापकव्यभिचारित्वस्य साध्यव्यभिचारव्याप्यत्वान् तत्संदेहेन व्यभिचारसंदेहः साध्यव्याप
कत्वसंदेहे च साधनाव्यापकव्याप्यत्वस्य साधनाव्यापकव्याप्यत्वात् तत्संदेहेन साध्ये साधनाव्यापकत्व
स्य संदेहात्तत्प्रयोजकरूपं साधननिष्ठसाध्यव्यभिचारव्याप्यसंदिग्धव्यभिचारं प्रतियोगित्वं साध्ये
साधनाव्यापकत्वव्याप्यसंदिग्धव्याप्यत्वं प्रतियोगित्वं पक्षेतरे व्यक्तीत्यर्थः॥ प्रयोजनत्वतोऽनुमानविल
यरूपाया॥ तदाहितापीत्यादि द्वितीयकल्पं दूषयति॥ व्यभिचारज्ञानत्वेनेति॥ कारणेति॥ पक्षेतरज्ञानाति
रिक्तकारणेत्यर्थः॥ जन्यत्वादिकं नित्यादिनापक्षीयव्यभिचारसंशयान्यत्वपरिग्रहः॥ ननु पक्षेतरोपाधि
त्वशंकादिना व्यभिचारशंकासत्त्वेपि व्याप्तिग्रहप्रतिबंधाभावान्न यान्वयव्यतिरेकानुविधानमेव मान

भ०

मत आहात्कं यमन्यथेति॥ अन्यथा पक्षेतरोपाधित्वशंकाद्युजन्यत्वस्य पक्षीयव्यभिचारसंदेहानयत्व
स्यवानिवेशात्॥ करवकिसंयोगमात्रस्य पक्षत्वे संयोगांतरे पक्षातिरिक्ते व्यभिचारसंदेहस्य संयोगाय त्वस्य
पक्षतावच्छेदकावच्छिन्नभिन्नत्वरूपपक्षेतरत्वाद्यन्यस्यधूमसाध्यव्यापकस्योपाधित्वसंभवादाह॥ सर्वः संयो
गो वेति॥ प्रत्यक्षोय॥ संयोगधर्मेतदतिरिक्तोयमौ दूधासंयोगारत्तिरप्रत्यक्ष॥ संयोगधर्मश्चैतत्राये वा
धात्यक्षधर्मतावलादप्रत्यक्षसंयोगधर्मसिद्धिरिता॥ चेत्तत्र व्याप्तिग्रहप्रतिबंधकांतस्याभावात्पक्षे
यव्यभिचारसंशयं पक्षेतरोपाधित्वशंकाहितव्यभिचारसंशयस्थानाप्रत्याप्रतिबंधकोप्युपपद्यतेभा
वः॥ निरुपाधित्वेपातित॥ तथा च तदनुरोधात्पक्षेतरोपाधित्वं न स्वीकार्यमिति भावः॥ अप्रयोजकत्वादिति
कार्यकारणभावादिव्याप्तिग्राहकतर्कस्यसत्वादित्यर्थः॥ इमं तरेवागगनंपरिमाणवद्भूमत्वादीनां तत्वा त्व दिका
दप्रयोजकत्वात्॥ अत्र चेति॥ पक्षातिरिक्तसाधनवृत्तिसर्वत्रसाध्यवत्वनिर्णयादितिभावः॥ तथा चाना
यत्पापक्षीयव्यभिचारसंदेहएवतत्रप्रतिबंधकइति॥ पक्षेतरस्यानुपाधित्वेपितदनुमानानांनिरुपा

धित्वं नास्तीत्याह । कस्मायमिति । इतरेति । निर्द्धूमत्वेत्यर्थः । अंतनरति । शुद्धसाध्यव्यापकास्फूर्त्तिदशायाम
पीति । पक्षेतिनद्धर्मावच्छिन्नसाधनाव्यापकत्वरूपार्थः । तद्धर्मावच्छिन्नसाध्यव्यापकत्वरूपेणायमपक्षै
कदेशेति । सपक्षैकदेशरूपत्रिधर्मस्यसपक्षांतरेऽभावात्प्यावत्सपक्षरूपत्रिधर्मावच्छिन्नसाध्यस्यवस्त
वैजात्यमपक्षेसत्वात्साध्याव्यापकत्वपरीक्षायाएकदेशेति । नाह शोपाधेः पक्षवृत्तित्वेसाधनव्यापक
त्वमेवस्मादतः पक्षावृत्तित्वलाभायसपक्षैकदेशेति । यथागगनंपरिमाणवद्द्रव्यत्वादित्यादौ वगग
नवृत्तित्वमन्यतरत्वावच्छिन्नसाध्यव्यापकंवृत्तिकात्वमुपाधिरित्यर्थः । अनुपक्षेतरस्यापि संदिग्धो
पाधित्वेपक्षीयमपि नात्र शंकायाः प्रतिबंधकत्वे पर्वतोवह्निमान्धूमादित्यादि बाधितानुमान
विलयप्रसंगइत्यत आह । इत्थंचेति । नाहशशंकायाः प्रतिबंधकत्वेचेत्यर्थः । वस्तामइति । अनुकू
लतर्कानवतारदशायांनप्रतिबंधकत्वमिष्टमेव तर्कोत्तरशंकानुदयाद्वेवानुमानप्रवृत्तिरिति हेत्वा
भासादौ वस्यतेइतिभावः । सर्वत्रैवानुकूलतर्कस्यव्याप्तिग्रहेहेतुत्वमित्यभिप्रायेण शंकते । मूलेन

उ.

भ०

316

नुयत्रोपाधिरित्यादिना। उपाधेरिति। उपाधेरुपाधित्वेन तज्ज्ञानस्यात्मलाभार्थं। स्वनिष्ठतया चैतदुपाधेरुपा
धित्वस्वरूपस्यात्मलाभार्थं उपाधित्वेन स्वज्ञानार्थमिति वार्थः। अनुकूलतर्काभावोपजीवकत्वेनेति। अ
नुकूलतर्कसत्त्वे साधने साध्यव्याप्यत्वग्रहात् साध्यव्याप्यव्यापकत्वेनोपाधेः साध्यव्यापकत्वनिर्णये साध्य
व्यापकत्वघटितोपाधित्वस्य ज्ञानमेव स्यादत उपाधित्वज्ञानेऽनुकूलतर्काभावोपजीव्य इत्यर्थः। अनुकू
लतर्काभावस्यापि फले उपाधिरुपजीव्यः साध्यसहचरिते हेतौ साध्याभावसामानाधिकरण्यज्ञानजन
नेन हि तस्य दोषत्वं तज्ज्ञाने च साध्यसंबंधितावच्छेदकज्ञानविधयोपाधिज्ञानमुपजीव्यं साध्याभा
वसंबंधिनि विरुद्धस्य साध्यसंबंधस्यावच्छेदकभेदं विना अज्ञानादित्युपाधेरात्मलाभार्थमनुकूलत
र्काभावस्यैव तस्य फले साध्याभावसंबंधबोधे उपाधेरुपजीव्यत्वादिति निगमनाविरहदुर्भयो दोषत्व
मिति सोपाधावित्यादिमूलस्यार्थः। तद्व्यवयितुमाह उपलक्षणमिति। एतदुपाधेरुपजीव्यत्वाभिधानं उ
पलक्षणं दर्शयति व्याप्तिमिवादिगणीति। उपलक्षणत्वाभिधाने बीजमाह। उपजीव्येति। असंभवादिति

३१६

उपाधिस्वरूपस्यानुकूलतर्काभावस्वरूपस्य च परस्परोपजीव्योपजीवकभावादनुकूलतर्केणाहेतौ साध्य
व्याप्यत्वग्रहे पि तद्व्यापकत्वाद्यनिर्धारणदशायामुपाधेः साध्यव्यापकत्वग्रहे तंत्र भवात्साध्याभावसंबंधि
नि साध्यसंबंधस्याविरुद्धत्वेनावच्छेदकग्रहानपेक्षणादनुकूलतर्काभावफलत्वेनोपाधेरुपजीव्यत्वात्सं
भवादित्यर्थः। व्याप्यव्यापकभाववन्नित्वेति पक्ष्यप्युपाधेरनुकूलतर्काभावव्याप्यत्वेप्यनुकूलतर्काभावस्य सद्धेता
वपि दृष्टित्वसंभवेन नोपाधिव्याप्यत्वं तथाप्यनुकूलतर्करूपदोषान्तर्विघटकत्वात्पाद्यव्यतिरेकरूपरंतदभावस्ता
न्नस्य दूषकतावितिभावः। व्याकिंचित्करइति। व्याप्यत्वेनैवोपजीव्यनेतस्य निर्वृत्तिकरत्वादितिभावः। न तु स्वरूपस
दूषकतायां व्यापकस्याधिकदेशाद्वृत्तेरन्यत्रादूषकत्वकल्पने नैवान्यथासिद्धत्वात्मन देशावृत्तेर्व्याप्यस्य न दू
षकत्वं कल्प्यतरस्यैव विनिगमकत्वमत आह। विशेषतस्त्विति। एकतरा ज्ञानकाले पि अन्यतरज्ञानाद्
व्याप्तिग्रहप्रतिबंधोदयान्न तद्बीजमिति भावः। अनुकूलतर्काभावस्यानुमानविधया व्यभिचारग्राहका
दूषकत्वाभिप्रायेणेदं। अनुकूलतर्कस्य व्याप्तिग्रहे कारणत्वात्तदभावः कारणाभावतया स्वरूपस

प्र०

317

न्ते वृक्ष्यमाणग्रहणयोजकत्वमात्राभिप्रायेण शंकते। नचानुकूलेति। व्यभिचारशंकाप्रतिबंधकत्वमात्रेणप्रयो
जकत्वं न तु तस्य कारणत्वमित्यभिप्रायेण परिहरति। विनापीति। तथाचानुकूलतर्कं विनापि व्याप्ति
ग्रहप्रसक्तौ तत्प्रतिबंधकीभूतव्यभिचारधीसंपादनद्वारा उपाधेर्दूषकत्वमक्षतमिति भावः। ननु पर्वतो
वह्निमान् धूमादित्यादौ महानसत्वादावतिव्याप्तिः कदाचिद्भाववान्तदमहानसान्यतरत्वे सति म
हानसत्वाभावादितिदिक्। मेण तद्व्यावृत्तेरेपि पक्षचित्साध्यव्यावर्त्तकत्वादत आह। अत्रपक्षेति। पक्षनिष्ठ
यासाध्यव्यावृत्युन्नायिका व्यावृत्तिस्तत्प्रतियोगित्वमित्यर्थः। उन्नायकत्वं तद्योग्यता। तेन नव्याप्तेर्लीनः। ननु
पर्वतो वह्निमान् धूमादित्यादौ तदतिव्याप्तिस्तेषां व्यभिचारानुन्नायकत्वादत आह। सत्वेति पक्षेति। तत्रते
वालस्यत्वमेवेतिभावः। तत्र सत्वेति पक्षो लक्ष्यते। नन्वेवं पक्षावृत्त्यासाध्यं निवर्त्तते इत्यतर एव सामंजस्ये
पस्य साधनस्येत्यर्थमत आह। साधनस्येति। पक्षसाध्यनीयसाध्यं निवर्त्तेते तत्साधनं सोपाधित्वरित्ये
वं परस्परासंबंधलाभायेत्यर्थः। केवलपदमवधारणे न तु लक्षणे विवक्षितमित्यवधारणयेत्यर्थः। लद्ध त्यभावनिवर्त्तकसाध्यपर्व
णेतद्वेशमप्युपपादयितुं कल्पांतरमाह। यद्वेति। नन्वेवं यदभावेन साधनवत्तिसाध्यं निवर्त्तेते इति
त्व

नि॰ महानस लोके

हत साधनस्य

हे

३१७

सर्वलक्षणार्थेनपौनरुक्त्यमत आह। तथा चेति। तथा च यद्यपि चादित्वेनेत्यस्य तदर्थपरतयाव्याप्त्वानंन
कर्त्तव्यमितिभावः। ननु पञ्चावयवत्यागसाध्यंव्यावर्त्तनेत इतिलक्षणमुपक्रम्य साध्यसाधनसंबंधव्यावर्त्तकत्वरूप
नेदर्थोपवर्णनेनोपसंहारो विरुद्ध इत्यत आह। शुद्धस्येति। तथा चोन्नायनप्रकारमात्रकथनेन न तु लक्षण।
र्थोपवर्णनमिति न विरोधः। प्रथमव्याख्यानुसारेणाह। पक्ष इति। द्वितीयव्याख्यानुसारेणाह। क्वचित्साध
नवतीति। एकमिति। साधनावच्छिन्नसाध्यव्यापकोपाधिर्नुरोधेनैतत्प्रकारमात्रप्रणीयत्वेऽपि शुद्धसाध्यव्यापकस्य
लेपितत्प्रकारः संभवतीत्याशयेनोभयसाधारणोन्नायनप्रकारकथनमितिभावः। साध्यसाधनसंबंधाभावसि
द्धौ कथं साध्याभावसिद्धिरत आह। साधनवत्त्वेनेति। विशिष्टाभावस्यैव तत्संबंधाभावस्यापि उन्नतिरिक्तत्वा
दिति भावः। ननु साध्यसाधनसंबंधाभावोन्नायकत्वप्रदर्शने प्रकृते कर्त्तव्ये शुद्धसाध्याभावोन्नायकत्वप्रद
र्शनमसंगतमतस्तत्संगमयितुं शंकामवतारयति। नन्विति। साध्याभावसत्त्वेति। तथा च साध्याभावस्य साध
नसंबंधाभावव्याप्यत्वात्। व्याप्यस्य सुतरां व्याप्यत्वादिति। अभिप्रायेणोपाध्यभावे साध्याभावव्याप्यत्वं

दर्शयितुं शुद्धसाध्याभाववर्त्तकमिति भावः॥ वायोः प्रत्यक्षत्वे साध्ये प्रत्यक्षस्पर्शाश्रयत्वस्यैव हेतुत्वेन प्रतिपादना
द्द्रव्यत्वे सतीति मूलं नुपपन्नमत आह। द्रव्यत्व इति। द्रव्यपदं बहिरिंद्रियपरं प्रत्यक्षपदं वा बहिरिंद्रियजप्रत्यक्षपरं।
। ननूत्क्रमेणोन्नायकतयोपाधेरीश्वरत्वे यत्र साध्यसाधनसंबंधाप्रतिग्राहकस्य साधनवत्त्वेनाज्ञाने न व्यापक गौरवमत्र
त्वेन वोपाधेर्नैष्फल्यकारसंभवः तत्र निरुक्तलक्षणस्यासंगतत्वादसंगतिरत आह। अयं चेति। आशय इति। त
याद्रशाधिकोयं प्रकारो न सार्वत्रिक इति भावः। शुद्धसाध्याभाव इति साधनाय इत्यग्रेतनेनान्वयः। अवच्छेदकव
त्तीति। विशेषणवत्वेन ज्ञाते विशिष्टाभावबुद्धेर्विशेष्याभावावलंबितत्वादिति भावः। विशिष्टाभावस्याति
ते रिक्तत्वपक्षेप्याह। अवच्छेदकत्वविशेषेणेति। आशय इत्यस्य व्याख्यां स्पष्टयति। स्पर्श एवेति। गगनं प्रत्य
क्षस्पर्शाश्रयत्वाद्यत्र गगने तदुभयसंबंधाभाववत्त्वमुद्भूतरूपाभावादित्यत्र पक्षे गगने स्पर्शात्मकसा
धनवत्त्वेन ज्ञानाभावात् नोक्तक्रमेण शुद्धसाध्याभावपर्यवसानं। अत्र कश्चित्स्पर्शवति तदुभयसंबंधाभाव
स्य साधने शुद्धसाध्याभावोन्नायकत्वसंभवात् द्वितीयहेत्वनुसरणं तत्र गुणादौ व्यभिचारात्स्वस्य हेतुत्वसमेयत्व
संबंधव्यापकत्वाभावादुद्भूतरूपस्य न तथोन्नायकत्वमिति। तादृशसाध्याभावेति। बहिरिंद्रियत्वेन विशेषितेग

णेन वह्निरीव्यत्वावच्छिन्नप्रत्यक्षत्वाभावस्य वह्निरीव्यत्वे सति उद्भूतरूपाभावादिति क्रमेणवाप्रत्यक्षत्वरूपगुरु
साध्याभावस्योन्नायकत्वमित्यर्थः। यच्चाश्रुतार्थस्यागेवाजमादर्शयितुं यथाश्रुतार्थमाह। पत्वइत्यादिनायत्सा
धनसंबंधीत्येतावन्मात्रेण साधनविशिष्टसाध्याभावोन्नायकत्वालाभात्तदर्थमाह यत्साधनविशिष्टमिति।
वैयर्थ्यमुक्त्वा विपरीतार्थकत्वमप्याह। जलमिति। पृथिवीत्वस्य जलत्वे द्रव्यत्वाभावानुन्नायकत्वेनालक्ष्यत्वा
द्गंधविशिष्टद्रव्यत्वाभावोन्नायकत्वेन चलक्षणगमनत्वादित्यर्थः। एवमग्रेप्यूह्यं। तदेत्यादि इष्टगंधर्वत्वजापि वे गन्धंगंधवत्त्व
ध्यं। साधनविशिष्टसाध्याप्रसिद्धेरिति। साध्यसाधनयोर्भयंनिवृत्तिरत्यर्थः तु अप्रसिद्धं न्नायकेच्छपि नायंदे
नः। विरुद्धयोरुभयत्वेनाभावस्यानुल्लभत्वात्तथापि पृथग्भिन्नसंबंधेन साध्यसाधनभावस्तत्रसइतिपर्वतोव
अव्याप्येन ह्निमानेतद्रूपादित्यादौ तु तारदृष्टेदरेनैवौभंसंयोगेन तु उभयाभावस्यकेवलान्वयितया नानुन्नायकपर्वतत्वादि
साधनतेन रूपव्यतिरेकप्रतियोगिनि पर्वतत्वाभावादावतिव्याप्तिरिति प्रसाध्यवत्वप्रकारकप्रमाविशेष्यत्वसंबंधेसा
केन धनवत्वप्रकारकप्रमाविशेष्यत्वोभयं निवृत्तित्वंस्यर्थत्वहेतुकेन साधकेवाऽप्रसिद्धिरित्यादिकम् साध्यतिहेतौ

ष्टं। यथासंभवमस्ति द्वेःसत्त्वत्तिपक्षस्य चोन्नायकत्वं नियामकमिति पक्षे एवं निष्कर्षमाह। साध्यवत्त्वेति
साध्यवत्त्वप्रकारकः साधनवत्त्वप्रकारको यो बोधस्तद्विरोधिनी बुद्धिर्यस्यैवं भूतो यो ऽभावः साध्यस्य साधनस्य वा भा
व पक्षे तदुन्नायकव्यतिरेकप्रतियोगित्वमित्यर्थः पर्वतत्वावच्छेदेन वह्न्यभावभ्रमदशायां पर्वतत्वादिबुद्धेरपि
व्यावर्त्तकधर्मदर्शनविधया तादृशबोधविरोधित्वात्तदुन्नायकेऽतिव्याप्तिवारणाय भावेति ग्राह्याभाव १वतत्वे
मुद्रया विलक्षणविरोधित्वप्रापकं। अत्र यद्यपि साध्यसाधनघटादिमत्त्वबोधस्यापि तादृशत्वात्तद्विरोधि
बुद्धिविषयघटाभावस्योन्नायकेऽतिव्याप्तिस्तादृशबोधत्वावच्छिन्नविरोधित्वं चाप्रसिद्धं तन्मात्रप्रकारकत्वं बोधि
विरोधित्वं च साध्ये साध्यतावच्छेदकाभावादावपि तथापि धर्मितावच्छेदकविशिष्टे धर्मिणि यदभावत्व
ज्ञाने नियमतस्तादृशवत्त्वबोधप्रतिरोधस्तदभावो विवक्षितः साध्यतावच्छेदकाद्यभाववत्त्व साध्यादिहेति
तयाग्रहप्रमाणाएवं तादृशबोधविरोधी न तु अन्यधर्मितावच्छेदके नातिप्रसंगः। भ्रमरूपेति एकधर्मि अन्यधर्मितावच्छे दकसत्त्वेतत्का
णेति।

कसाध्यवत्त्वं बोधस्य तत्र भ्रमेकरूपत्वादिति भावः। भ्रमादिरूपेति पाठे एकधर्मिकत्वं तादृशबोधेन विवक्षि
तं किंतु साध्यसाधनप्रकारकबोधं प्रति समानधर्मितावच्छेदकत्वं प्रत्यासत्त्याविरोधित्वं विवक्षितं तत्र वायु
स्नेहवान् गंधादित्यादौ जलपृथिव्योः स्नेहगंधप्रकारकप्रमादौ यापि मूलभं चावृत्तिहेतुकेन साध्यकेवा भ्र
ममादायैव प्रसिद्धिरिति। एवं व्याख्याने विसाधनस्य साध्यमिति यथाश्रुतार्थत्यागः एवावृत्तिहेतुकादिस्थले
भ्रमासंभवेन लक्षणस्याव्याप्तिर्मूले च लक्षणमुक्तासाध्याव्यावर्तकमेव सर्वत्र दर्शितं न तु भ्रमाविसाधनव्या
वर्तकत्वमित्यादि स्वरसो। पिवंदति भांमृचितः। अस्मिन्नेव पक्षे सार्वभौमव्याख्यानं दूषयितुमुपन्यस्यति
यत्त्विति। पक्षे साध्यसाधनान्यतरव्यावर्तकत्वं लक्षणं वक्तव्यं तत्र जलं गंधवत्प्रमेयात् प्रमेयवद्वा गंधा
दित्यादौ सत्त्वात् पक्षस्यासिद्धेर्वा न्यायके पृथिवीत्वादौ लक्षणगमनाय प्रमेयत्वावच्छिन्नभेदघटितस्यान्य
तरत्वस्याप्रसिद्ध्या अन्यथा तन्निर्वह्निसाध्याप्रवृत्तित्वसमतीति। तत्र नावृत्तिरेव तादृशांशप्रसिद्ध इति नाव्याप्ति
:तादृशाभावः किंसाध्यतावच्छेदकसंबंधेन तु तावच्छेदकसंबंधेन यत्किंचित्संबंधेन वा आद्ये

तेहि

भ०

ाहा। यत्र भिन्नभिन्नेति पर्वतो वह्निमान् तद्रूपादित्यादौ समवायसंबंधेन वह्न्यभावस्योन्नायकेन तद
वयवत्वादौ संयोगेन रूपाभावस्योन्नायकेऽव्यतिरेकिणि धर्ममात्रेऽतिव्याप्तिः। तत्र मेयाह। अन्यत्रापि
चेति। एककसंबंधेन साध्यसाधनभावेऽपि वह्निमान् धूमादित्यादौ समवायादिनासंबंधेन वह्न्यभावस्यो
न्नायकत्वेन वह्न्यवयवत्वादौ अतिव्याप्तिरित्यर्थः। न च साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठप्रतियोगि
तासाधनतावच्छेदकसंबंधावच्छिन्नसाधननिष्ठप्रतियोगितान्यतरवदभावोन्नायकत्वोक्तौ नायं दोष
इति वाच्यं जलं प्रमेयवत्सत्वादित्यादौ स्वरूपसंबंधेन साध्यतायां प्रमेयत्वेन सत्त्वस्यापि हेतोः साध्यतया स्व
रूपसंबंधेन तदभावोन्नायकेऽतिव्याप्तेरिति। संबंधभेदेन प्रतियोगितावच्छेदकभेदेनापि दूषणं दातुमाह।
क्वचिदिति। साध्यसाधनतान्यतरवतीति। तत्र सत्त्वप्रतिपत्स्यापि सिद्धेर्वोन्नायकेऽव्याप्तिरिति भावः। महानसीयेति।
कसाधनता वच्छेद न साध्यतावच्छेदकान्यतरावच्छिन्नप्रतियोगिताकाभावोन्नायकत्वं वाच्यं यत्र भिन्नसंबंधेन साध्यतासा
धनतावच्छेदकतात्त्वप्रयुक्तरीत्या तदवच्छिन्नतादृशाभावोन्नायकेऽतिव्याप्तेः प्रमेयपक्षके प्रमेयत्वहे
भिन्न

वे

तुल्येवातदन्यान्यत्वरूपस्यान्यतरस्याप्रसिद्धेरन्यथानान्निर्वह्निः।पक्षाप्रसिद्धिर्वेत्यतनीति।लाघवादाहपक्ष
साधनवंनावितिपक्षतावच्छेदकस्यसाधनस्यवाप्रमविशेष्येऽद्देववह्निव्यावर्त्तकेतिव्याप्तिवारणायप्रमे वह्निमान धीरेते
ति।तादृशप्रमाच्चसमूहालंबनात्मिकाशृंगग्राहिकृतयोपादेया।तेनपर्वतोवह्निमान्धूमादित्यादौ
पर्वतधूमवंतौरूदश्वेतिसमूहालंबनप्रमाविशेष्येऽदेववह्निव्यावर्त्तकेवह्निमामग्यादौनातिव्याप्तिः।प
क्षतावच्छेदकादेरपिविषयत्वात्तद्विशेष्येनेति।ळोपक्षसाधनवंतौ।तत्रतादृशप्रमाविशेष्येऽअवर्त्तिहे ते
तुकेवह्निसमानाव्याप्तिरूपबाणस्यासत्वनिर्णयएवसंभवाल्लसंदेहढयितुमाह।तत्रेति।तत्रतादृशाल
क्षणे।रूपकृतावीजेलक्ष्यतानियामकमितिनिरोषः अफलमिति।सत्वस्वितिपक्षेऽन्वयेनेसाधनवतः।
व्यभिचारोन्वयनेवपक्षस्यानुपयोगित्वेनोपादानंनिःफलंस्यादितिभावः।अवर्त्तिहेतुकइतिज
लंवह्निमदाकाशादित्यादावित्यर्थः।अव्याप्तिरिति।साधनवतोऽप्रसिद्ध्यानिरुक्तलक्षणासंभवा
दितिभावः।पक्षतावच्छेदकमनुपादायापिपक्षस्यतद्व्याप्तित्वेनोपादानेअवर्त्तिपक्षतावच्छेदके

स्थले व्यभिचारोऽन्वायके। व्याप्तिर्न संभवतीति विशेषो विशिष्योपादेयः। सानौ त्वाऽऽह परत्विहेतुसत्वप्रति
पक्षोऽन्वायके व्याप्तिमुद्धर्तुं प्रकारांतरमुपन्यस्यति। यदपीति। पक्षतावच्छेदकसाधनेपीति। इष्टत्वाक्षिप्त
ति विशेषो विशिष्योपादेयः तेन न सम्मूतालंबनमादाय दोषः। यद्यपि साधनतावच्छेदकरूपानुपादाने द्रव्यं
विशिष्टसत्वादित्यत्र सत्ताश्रयेऽद्रव्यत्वाभावोऽन्वायके। तिक्वानित्तदुपादाने च तद्रूपमादायातिव्याप्तिवारणा
य प्रमात्वोपादानमुचितं तथापि तादृशप्रतीतिविशेषस्य तद्व्यक्तित्वेनोपादाने कर्त्तव्ये प्रमात्वं न निविशते इत्या
शयेन प्रमात्वं नोपात्तं। तत्रापि। तादृशवाक्यार्थेपि। अभिमतमित्यनेनान्वितं। तेनेत्यादितृतीयांतत्रिकं
तादृधर्माश्रयइत्यनेन संबध्यते। संयोगेनेति। समवायेन हेतौ जलत्वस्य समवायेनाश्रयत्वे वह्निव्या
वर्त्तकत्वेन लक्षणासंभवादिति भावः। पक्षतावच्छेदकस्येति। तथा च तदाश्रये साध्याव्यावर्त्तकत्वेन लक्ष
णागमनमिति भावः। संयोगेन साधनवत्त्वप्रसिद्धावपि नत्वसाध्यव्यावर्त्तकत्वाभावान्न लक्षणागमन
मित्याह [illegible] संयोगेन ध्वमवतश्चेति। समवायित्वादावितिपक्षतावच्छेदकघटत्वस्य समवायेन मेयत्व
स्यावृत्तेः। पक्षतावच्छेदकघटत्वाश्रये च जातिमत्त्वस्य साध्यस्य सत्वनियमादिति। अत्रैव कस्येति व्या

त्तिमप्याह। वह्निमत्पर्वतेति। निर्वह्निपर्वतपक्षकेसत्प्रतिपक्षोन्नायकत्वेन संग्राह्यत्वात् वह्निमदिति। धूमा
वयवइति। तस्यपक्षतावच्छेदकताघटकसमवायेन साधनाश्रयत्वादितिभावः। ज्ञप्तएव। उक्तेतिव्याहे
रेवानुपाधिपदवाच्यत्वादिरूपापाद्यस्यनाशसिद्धिरतो व्याचष्टे। आपाद्यस्येत्यादिना। वह्नीतिनचधूमाभा
त पकेपक्षेतरेवह्निव्यापकत्वस्यापाद्यत्वेनाशसिद्धिरिति वाच्यं। व्यतिरेकधर्मत्वस्यतदव्याप्यत्वेनानापादक
त्वादिति। ननु यद्रूपावच्छिन्नं यद्व्यभिचारित्वेनेत्यादिलक्षणमपि नानुमिति प्रतिबंधकतावच्छेदकमितित्त्वयोगा
नुयोगइत्यतआह। अस्मदुक्तमिति। तदुन्नायकत्वेन स्वरूपयोग्यमिति। हेत्वोपधानरूपतदुन्नायकत्वस्य व्याप्ति
पक्षधर्मतारूपत्वासंभवादितिभावः। तथापीति। साध्यव्यभिचारव्याप्यत्वघटि। व्यभिचारस्यैव तद्व्याप्यत्व
ताज्ञानस्याव्याप्तिधाविशेषाधित्वादितिभावः। पर्वतवह्नितूलादिकं चेति उपाधिशरीरभानेव्यभिचारा
दिविषयकत्वसहिष्णुतायां साध्यव्यभिचारित्वेन साधनविशेषणादितरघातु व्यभिचारव्याप्यतावच्छे
दकसाध्यव्यापकभावसमानाधिकरणत्वत्वावच्छिन्नघटितत्वात् तदपि प्रतिबंधकतावच्छेदकमेवेति
स

भावः। व्यावृत्त्योपधेयकं। ननु इष्टकं पल्लेतरत्वस्य शुद्धसाध्यव्यापकत्वाभावात् नातिव्याप्तिः संभवती
ति तदुपपादयति यथाश्रुतइत्यादिना। यथाश्रुते। शुद्धसाध्यव्यापकत्वघटिते। वह्निना धूमस्येति। पर्वती
धूमवान्वह्नेरित्यत्र धूमवत्त्वं तस्य पक्षतायां पक्षेतरस्य निरुक्तपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिरूप
पर्यवसितसाध्यव्यापकत्वादुपाधिलक्षणगतार्थं तितया। सिद्धांतिनये। लक्ष्यत्वादिति भावः। तदुपे
तीयत्वेऽपि विरुद्धधर्मावच्छिन्नसाध्यव्यापकत्वघटितोपाधिलक्षणज्ञानादित्यर्थः। व्यवहारोपयिकमिदंन
तु दृ[illegible]बलमिति यदि ब्रूयात्तत्राह। व्यवहारोपयिकत्वे चेति। ननु धर्मविशेषधर्मावच्छिन्नसाध्यव्यापकत्वं
तद्धर्मावच्छिन्नसाधनाव्यापकत्वमेव तदघटितं वाच्यं तद्धत्यत आह। पर्यवसितेत्यादीति। अनंतरमाह। व्यवहा
रोपयिकमित्यादिना। व्यवहारोपयिकं उपाधिव्यवहारोपयिकं लक्ष्यतावच्छेदकं। तेन सोपाधि तिपद्योक्ता।
यत्केसाधनव्यापकेवक्ष्यमाणलक्षणगतिव्याप्तिर्न दोषायेति भावः। तत्र त्साध्येति। धूमसमानाधिक
रणत्वे सति तद्व्यापकत्वमित्यादिकमित्यर्थः। नन्वेवमननुगमइत्यत आह। साध्यसाधनेति। लक्षणसा
म्यननुगतत्वादित्यर्थः। नन्वेवं वह्निमान्धूमादित्यादौ धूमाव्यापकवह्निसमानाधिकरणे महानसत्वा

इतो बह्निकाकृताव
वह्निसमाधे
[illegible]

वेतिप्रसंग इत्यत आह। अवच्छेदकेति। अवच्छेदकत्वान्न तु व्यभिचारित्वेन तत्र केशोयेनोपाधिशरीरभाने व्यभिचारानु
मानमफलं स्यादिति भावः। नातिप्रसंगः वह्निमान् धूमादित्यादौ मन्वयरूपे लेत्यादि। स्वरूप एव तु द्रव्यत्वादि
त्यादौ पृथिवीत्वाभावः संग्राह्य एवेति भावः। इदं गुरुत्वादित्यत्र पृथिवीत्वाभावेन संग्राह्य एवेति भावः
पृथिवीत्वाभावादेरिति। तस्यापि गुरुत्वसमानाधिकरणस्य रूपाव्यापकत्वादिति गुरुत्वव्यभिचारीति।
पृथिवीत्वाभाव नाद्दशतेजसस्वरूपव्यक्तेरपि व्याप्यत्वात्। तदव्याप्येति। पृथिवीत्वाभावव्याप्येत्यर्थः। तथा च वक्ता तोय
व्यभिचारियत्साधनं तन्निष्ठस्य व्यापकत्वं लक्षणार्थो न तु व्यभिचारितावच्छेदकसाधनतावच्छेदकावच्छि
स्तौ न्नाव्यापकत्वं येनौति व्याप्तिः स्यादिति भावः। इत्थं च नोपयि दूषितमिति। इत्थं च व्यभिचारोन्नयनादि। यद्धर्मावच्छि
ना न्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाध्यव्यापकत्वं व्यभिचारोन्नयनोपयोगि ऽयं पक्षधर्मावच्छिन्नसाध्यव्यापक
त्वे सति पक्षावृत्तित्वं स्वव्याप्तिपक्षस्येत्यादिकमित्यर्थः। साध्यतावच्छेदक[redacted]गर्भ[redacted]त्वे बीजमाह। तत्रेदि
ति। सकलगुणव्यक्तिष्विति। यदि रूपसंयोगादिगुणव्यक्तौ द्रव्यत्वं निरुपाधिः स्यात्तदा गुणत्वेन निरुपाधिव्यव

323

म०

हारे सैव व्याप्तिर्विषयस्तत्रैवोपाधीहारसंभवे साध्यतावच्छेदकगर्भतानोपादीयेत नत्वेतत्संभवतीति भा
वः। निरुपाधित्वादिति। तथा च साध्यतावच्छेदकावच्छेदेन तत्रगुणसमानाधिकरणस्य द्व्यापकस्य गुणत्वा ला
वच्छिन्नसाध्यव्यापकत्वेऽप्युपाधिव्यवहारः स्यादिति भावः साधनतावच्छेदकगर्भतायां बीजमाह। गुणत्वेन गुण
त्वादिना। गुणकर्मान्यत्वेति। साधनतावच्छेदकत्वावच्छेदेन गुणत्वावच्छिन्नसमानाधिकरणस्य द्रव्यत्व
स्य सत्तावत्त्वव्यापकस्य विशिष्टसत्तात्वावच्छिन्नहेतुतायामुपाधिव्यवहारः स्यादिति भावः। उक्तातिप्रसं
गवारणाय साध्यतावच्छेदकादिगर्भं तु उपाधित्वं वक्तुं तथैव लक्षणं द्रष्टुं जिज्ञासामाह। तथा चेत्यादिना
अनुगतमिति। तद्रूपावच्छिन्नसाध्यसाधनकयावदुपाध्यनुगतमित्यर्थः। ननु साधनतावच्छेदका
नुधावनपुरस्सरमेव तद्व्याप्तिगर्भतायां नरूपेण गुरुत्वे साध्ये पृथिवीत्वाभावादावतिव्याप्तिर्न वागु
णत्वे न गुरुत्वसाध्ये सत्तायाः सोपाधित्वे गुणकर्मान्यत्वविशिष्टसत्तात्वेन सोपाधितापत्तिरित्यादिदोषात
आह। नत्विति। अननुगमादिति। व्यभिचारिसाधनव्यक्तीनामेकव्यक्तिव्यापकस्यापि व्यक्त्यंतराव्याप
कस्य व्यक्त्यंतरव्यापकस्यापि एतद्व्यक्त्यव्यापकस्य तदुपाधित्वे न तद्व्याप्तिघटितलक्षणस्य तत्र साधनक
तै

यावदुपाधिसाधारण्याभावादिति भावः। रूपत्वावच्छिन्नाव्यापकस्येति। न चात्र रूपत्वावच्छिन्ने तेजोत्वेऽपि व्या-
पकमेति वाच्यमित्यत्राह। तथा सति शब्दे व्याप्त्यभावादिति। ननु साध्यव्यभिचारित्वं साधनतावच्छेदकावच्छि-
न्नं तदव्यापकत्वस्योक्तौ नाननुगम इत्यत आह। व्यभिचारित्वेनेति उपदर्शितमिति उपाधिशरीरभानस्य
साधननिष्ठसाध्यव्यभिचारादिविषयत्वसहिष्णुतायामित्यादिना। नन्वन्ये त्विति लक्षणायामननुपपन्नत्वे
तत्रापि साधनाव्यापकत्वस्योपाधित्वसत्त्वेऽपि विशेषादर्थतः साधनव्यापकस्योपाधित्वस्वीकारात्त्वे वि
त्वित्यादिना तन्मतात्पर्यविषयेण मतोपन्यासोऽनुचित इत्यत आह। उपाधिलक्षण इत्यादिना। दूषकतायां
सत्प्रतिपक्षोन्नायकतायां। आनुकूल्याभावमुखेनाप्यतिरूपमप्याह। उपाधीति। करकादृष्टिविशे-
ह्निनसंयोगरत्वादित्यत्रानुष्णाशीतस्पर्शवत्त्वादौ साधनव्यापकेऽप्याद्रिकरत्वादित्यर्थः। अभिप्रायं प्रका-
शयति। तथा चान्ये त्विति लक्षणायामननुपपन्नत्वे तस्य नाशयन्न काशानं ह्येवि त्वित्यादिना। एतं ननु मतान्तर-
ती मेतदिति भावः। धूमवान्वह्नेरित्यादौ साध्यस्याप्ययोरे गोलकादिरत्वादिनोपाधित्वादाह। साध्यताव

छेदकेति। साध्यतावच्छेदकरूपेणापि साध्यव्यापकत्वरूपोपाधित्वस्य सत्त्वात् इति पक्षेपोऽसंगत इत्यत आह।
परं प्रतीति। साध्याविशेषस्येष्टसक्तताबीजं दर्शयति। पक्ष इत्यादिना। अन्यथा हेतेचस्यापनाहेतुरेव पक्षः तत्र सा
ध्यव्यभिचारसाधनस्य निर्णयेऽनुमानवैयर्थ्यादनिर्णये च पक्षधर्मतायाः अनिर्णयात् तस्य अनुमानुसा
योग्यादिनार्थः। तदुद्भावनेन साध्यतावच्छेदकावच्छिन्नसाध्योद्भावने। ननु यत्रानुकूलतर्कादिना हेतौ
न साध्यव्यभिचारसंदेहस्तत्रैवानुमानं भविष्यतीत्यत इष्टापत्तिमाह। हेताविति। आदिना संदिग्धो
पाधिग्रहः। साध्यव्यापकादिलक्षणोपाधित्वसंदेहेनाकर्षतस्येति। साध्यस्य व्यापकताया निर्णया
त्साधनव्यापकताया संदेहे नैव संदिग्धोपाधित्वस्य प्रसक्तत्वादिति भावः। ननूपाधिसंदेहः किंविधया
साध्यव्यभिचारसंशयाधायक इत्यत आह। व्याप्यसंशयस्येति। साधनाव्यापकत्वसंदेहे साध्यव्यापकोपा
धिव्यभिचारस्य [redacted] साध्यव्यभिचारव्याप्यस्य साध्यव्यापकत्वसंदेहे च साधनाव्यापक
साण व्याप्यत्वस्य साधनाव्यापकत्वस्य संदेहः तज्ज्ञापकसंशयाधायक इ[redacted]ति भावः। ननु तेन संशयानुप

चिता १

घत्रिरेवतत्र मानमत आह । कोटिस्मरणादितर इति । एवकारेण व्याप्यसंशयस्यु दासः । तदुपपन्नैः । व्याप
कसंशयोपपत्तेः । ननु संशयस्य सामान्यस्य व्याप्यसंशयं विना संभवे पि संशयविशेषे तदन्वयाद्यनुविधानां हे
तुत्वं भविष्यतीत्यत आह । ब्रूविदिति । तदनुविधानस्य व्याप्यसंशयानुविधानस्य । न स्मरणे एवं व्यापकतद
भावयोः स्मरणे एव न तु संशये इति भावः । ननु यत्र यत्साहचर्यं गृहीतं तत्रैव तदनुविधानात्कारणत्वं न
भविष्यतीत्यत आह । तदग्रहे इति । तादृशसाहचर्याग्रहे इत्यर्थः । स्मरतामिति । तथा च व्याप्यसंशयस्य को
टिस्मारकतयान्योपयोग इति भावः । धर्म्मिज्ञानादि कारणान्तरेणान्यथासिद्धिं निरसितुमाह । पर्वतादि
कमपीति । आदिना धर्मसंशय स्मरणत्वरादि रूपधर्मिपरिग्रहः । धर्म्मादीति । एवं तेन धर्म्मादि संशयस्य भी
वेन कुतादृशान संशयस्याभावः । चत्वारादोधर्मसंशयस्याभावेन धर्मेसंशयस्याभावः । त्रिविधोद्दर्शनादि इत्याशय
ति भाव इत्यर्थः । अत एव । व्याप्यसंशयस्य कारणत्वादेव । व्याप्यांशे उत्कटकोटिकात्संशयाद्व्यापकांशे
उत्कटकोटिकसंशय इत्यर्थः । उत्कटत्वं चाज्ञाव्याप्यवत्त्विनिर्णीतिविषयताविशेषो वा इति भावः । कारणेत्वके
लेवेत्येवकारेण कारणोत्कर्षस्य व्यवच्छेदः । नन्वेवं सत्ते व्याप्यसंशयस्य हेतुत्वदर्शनात्र द्विरोध इत्य

भ०

तत्प्राह। समानेत्यादिसूत्रे त्विति। उपलक्षणपरं। आप्यसंशयोपलक्षणत्वे तात्पर्यग्राहकं। चकारस्य निर
र्थकत्वापत्यानस्यैवं तदर्थकत्वसंभवे पदांतरे लक्षणा। स्या ख्येत्यत आह। तत्र त्ववकारो वेति। समानाने
कधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातः विशेषापेक्षो विमर्शः संशय इति सूत्रं। अस्यार्थः। सू० २
यो समानोऽनेकश्चांतत्कोटितदभावकोटिमतां धर्मः तदुपपत्तेर्धर्मिणि तद्वत्वज्ञानात् विप्रतिपत्तेर्विरुद्धकोटिद्व
यप्रतिपादकाद्वाक्यात् नित्यो न वेत्यादिवाक्यात् उपलब्धेरनुपलब्धेश्च तत्कोटेः तथा च यत्र तत्कोटेरु
पलब्धिर्यत्र चानुपलब्धिः अभावोपलब्धिः कार्यकारणोपचारात्तयोरव्यवस्था अभावनिश्चयः तस्मात्संप्रत्त
विप[redacted]स्यात् तद्धर्मवत्त्वज्ञानादिति यावत् विशिष्यते अनेन इति विशेषादर्शनं विशेषो यस्मात्स विशेषो विशे
षादर्शनं तत्सापेक्ष इत्यनेन कारणमुक्त्वा लक्षणमाह। विमर्श इति। एकधर्मिकविरुद्धोभयावगाही विमर्श
इत्यर्थः। अत्र च शब्दो नित्यो न [redacted] वेति संशयस्यासाधारणादिधर्मदर्शनादितः उत्पत्तिसंभवात् परामर्शानु
मित्योरिवाव्यवहितोत्तरत्वं कार्यतावच्छेदकीकृत्य हेतुताग्रहः साधारणधर्मस्य धर्मितावच्छेदकत्वेन संश
यविषयत्वसंभवेऽपि असाधारणत्वस्य स्वरूपसत्साध्यतदभावनिश्चयगर्भतया विप्रतिपत्तेश्च तथात्वात् सं ३२५